792

दानमयूख (by नीलकंठ)

Dana mayūkha			Title
		Nilakantha	Author
			Editor
			Year, Vols.
			Publisher
792			Remarks

७९२

॥ दानमयूखःस्पष्टमः॥८॥

॥पत्र १८३॥

॥१॥ ॥श्रीगणेशाय नमः॥ श्रीरविर्जयति॥ यो लीलया संतनुते त्रिविधं तत्त्वा लयत्यात्मनि विश्वरूपे । लयं न त्वा शुच
श्रूर्णरूपः शिवं तनोतु श्रुर विर्मामसौ ॥१॥ श्रुतीः स्मृतीर्वीक्ष्य पुराणजातं तंतन्त्रनिबंधानपि सान्निबंधात् । श्री
शंकरस्यात्मजएषदाने श्रीनीलकंठो विवृणोति हृत्स्थं ॥२॥ परस्वोत्पत्त्यंतोऽव्यक्ता गोदानं । व्युत्पत्या विनिम
माद्यसत्वेतच्चार्याणं वदानपदप्रयोगादिति केचित् । परप्रयोगस्य भाक्तत्वात्तद्भिन्नत्वे नापि विशेषणीय
मित्याहुः । दामोदरवक्कुरस्तु क्रमादिवारयितुमदृष्टार्थत्वेन विशेषणीयं प्रात्यादि दाने दानपदं गौणमि
त्याचेतन्न सोमक्रयातिव्याप्तिवारणात् गौडायां मानाभावाच्च । इदं दूरस्य विप्रंच्यु देशेनतत्क्षस्या पहर्त्तान्तु
प्रसत्वैत्येव । तादृशापहारे शिष्टविगाने न निषेधकल्पनात् । परस्वं नाददीतेत्येवंप्राकारकः प्रत्यक्षस्तु निषे
धोन प्रवर्त्तते । अपहारदशायां कस्यापि स्वत्वाभावात् । दातुः पुनरुत्पत्तौ तु मानाभावः । रक्षणं तु परकीय-
स्यापः प्रात्यादिनोपपद्यत एव । अस्तु परदेशे त्यक्तपुरोडाशादाविव अन्यथा त्वन्नादिपुनरुत्पत्तिप्रयोजकस्वि रामः
ष्टादिविधिः सएव पुनरुत्पत्तिर्नान्यथात्यक्तोपाने पिविगानादिः । इति निरणायितं त्वरलादौ । तत्यागकालेस्व ॥५५४॥

पगमः । किंतु विप्रकर्तृकस्वीकारकाल इति तु कस्यचिद्व्याहतप्रलापउपेक्षणीय एव । यदि केचित्कंचि द्ब्राह्मण
मुद्दिश्य किंचिद्द्रव्यं सुवर्णरजतादि मनसा पात्रमुद्दिश्य जलम प्रेज तं हिपेत् । दाता तत्फलमाप्नोति प्रति
ग्राहीनदोषभागित्यादिवचनप्रतिपादिते न विधिनोत्सृष्टं पदे शांतरस्थाय तस्मै मत्तद्द्रव्यं प्रहितं तच्च यदि म
ध्ये मार्गनिष्टं चौरैर्वापहृतं तदा दातुर्न कोपि प्रत्यवायः प्रमाणाभावात् दानफलं तु नैव प्रजायते । ब्राह्मणस्वत्वा
पत्त्यवसानकत्वे स्वर्गस्याजातत्वात् । नचानेवंचसादानानुकल्पेत पात्रोद्देशकः संकल्प एव विधीयते । ननु पा
त्रस्वत्वोत्पत्तिपर्यंततापि । उद्देशमात्रम्भवणादिति वाच्यं । प्रजापतिव्रतांतर्गतो घटादिस्नानीक्षणसंकल्पवदत्रा
पि फलपर्यंततायां आवश्यकत्वात् । अन्यथा तत्रापि संकल्पमात्रादेव फलं स्यात् । अस्त्विति चेन्नैवं तस्य व्रतमि त्या
वरूपा संकल्पक्रियां लक्षयति । तत्र च परिपाजितेनिराक्षणादौ व्यभिचारात् संकल्पलक्षणे दुर्घटास्यात् । अतो
न संकल्पमात्रात्तत्र फलं । किं चात्र वैधदेशकालावच्छेदेन पात्रहस्तप्रक्षेपासंभवे तस्यानमात्रस पात्रोद्देश
कोजलाधिकरणको जलप्रक्षेपे विधीयते ननु पात्रस्वत्वापत्तिपर्यंततापि बाध्यते । पात्रदाष्टप्रतिग्रहीष्ट

श्रपदैः त्यागप्रतिग्रहयोः प्रतीतेः। अतो न प्रतिग्रहाद्व्यापारं विनोद्देशविशिष्टजलप्रक्षेपमात्रात्फलमितिदिक्
यत्तु देवलः। अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनं। दानमित्यभिनिर्दिष्टं व्याख्यानं तस्य कथ्यत इति तद्वक्ष्यमाण
सात्विकदानोक्तार्थं न दानसामान्यपरं। इति दानस्वरूपं। एतत्प्रशंसा सामवेदोपनिषदि। दानेन सर्वान्कामानवा
प्नोति चिरंजीवित्वमिति। व्यासः। यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने। तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्ष
सि। ग्रासादर्धमपि ग्रासमर्थिभ्यः किं न दीयते। इच्छानुरूपो विभवः कदा कस्य भविष्यतीत्यादि। तच्च दानं चोक्तं भग
वद्गीतासु। दातव्यमिति यद्दानं दीयतेऽनुपकारिणे। देशे काले च पात्रे च तद्दानं सात्विकं स्मृतं। यत्तु प्रत्युपकारार्थं फ
लमुद्दिश्य वा पुनः। दीयते च परिक्लिष्टं तद्राजसमुदाहृतं। अदेशकाले यद्दानमपात्रेभ्यश्च दीयते। असत्कृतमवज्ञा
तं तत्तामसमुदाहृतं। विष्णुधर्मोत्तरे। तामसानां फलं भुंक्ते तिर्यक्त्वे मानवः सदा। वर्णसंकरभावेन बालके यदि वा पु
नः। बाल्ये वा दासभावे वा नात्र कार्या विचारणा। अतोन्यथा तु मानुष्ये राजसानां फलं भवेत्। सात्विकानां फलं भ
ुंक्ते देवत्वेनात्र संशयः। मात्स्ये। येषां पूर्वकृतं कर्म सात्विकं मनुजोत्तम। पौरुषेण विना तेषां। केषांचिद्रूपतेफ रामः
॥५५५॥

लं। कर्मणा प्राप्यते लोके राजसस्य तथा फलं। कृच्छ्रेण कर्मणा विद्धि तामसस्य तथा फलं। हारीतः। मुमुक्षुस्तामसं
यश्चापाकृतं ददाति। अत्र प्रकृतोऽसावधानः। गारुडे। अर्हते यस्तु वर्णादिदानं तत्कायिकं मतं। आर्त्तानां
मभयं दद्यात्येतद्वाचिकं स्मृतं। विद्यामादाय यज्जप्येत्त दानं मानसं द्विजा इति। अथ दानसामान्येतिक
र्त्तव्यता। तत्र दानाधिकारस्तु चतुर्णामपि वर्णानां स्त्रीणां च। वर्णानामाश्रमाणां च चातुर्वर्ण्ये युधिष्ठिर। दानध
र्मं प्रवक्ष्यामि यथा व्यासेन भाषितमिति व्यासोक्तेः। स च निषादस्थपतिवत् वैदिकमंत्रवत् स्वपि समंत्रक एव स्त्रीशू
द्रयोरविद्वन्मदनरत्ने जातूकर्ण्यः। अधिकारी भवेच्छूद्रः पूर्तधर्मे न वैदिके। पूर्ते धर्मास्तत्रैस्मृत्यंतरे। बहिर्वेदि च यद्दा
नं तत्पौर्तिकमुदाहृतं। तत्रैव व्यासोपि। अंतर्वेद्यां च यद्दानमिष्टं तदभिधीयते इति। अथ पात्रं याज्ञवल्क्यः।
न विद्यया केवलया तपसा वापि पात्रता। यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते इति। व्यासः। प्रथमं तु गुरोर्दानं द
त्वा ज्येष्ठमनुक्रमात्। ततोन्येषां तु विप्राणां दद्यात्पात्रानुरूपतः। भविष्यपुराणे। सन्निधाने स्थितान्विप्रान्दौ
हित्रं विट्पतिं तथा। भागिनेयं विशेषेण तथा बंधून्गृहागतान्। नातिक्रामेन्नरस्त्वेतान्सुसुमूर्खानपि

गोपते॥ अतिक्रम्य महारौद्रं रौरवं नरकं व्रजेत्॥ विट्पतिर्जामाता विष्णुः। मातृष्वसा चैव तत्पैव च पितृष्वसा॥ माता
महा भागिनेयी भागिनेयस्तथैव च॥ दौहित्रश्चैव जामाता तेषु दत्तमिहाक्षयं॥ भ्रातृश्रेष्ठसुतयादत्तं तदप्यक्षयमुच्य
ते॥ मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि॥ दीनानाथविशिष्टेभ्यो दातव्यं प्रतिमिच्छता॥ व्यास॥ पितुः शतगु
णं दानं सहस्रं मातुरेव च॥ अनंतं दुहितुर्दानं सोदर्ये दत्तमक्षयं॥ एतत्प्रसंसामात्रं दत्तं॥ सममब्राह्मणे दानं
द्विगुणं ब्राह्मणब्रुवे॥ सहस्रगुणमाचार्ये त्वनंतं वेदपारगे॥ व्यासः॥ ब्रह्मबीजसमुत्पन्नो मंत्रसंस्कारवर्जितः॥ जा
तिमात्रोपजीवी च भवेद्ब्राह्मणः स तु॥ गर्भाधानादिभिर्युक्तस्तथोपनयनेन च॥ न कर्मकृन्न चाधीते स भवे
द्ब्राह्मणब्रुवः॥ तथा देवार्चनपरो नित्यं विद्यार्थी कूपवत्सरत्रयं॥ असौ देवलको नाम हव्यकव्येषु गर्हितः॥ यत्तु
वृहस्पतिना शूद्रे समगुणं दानं वैश्ये तु द्विगुणं स्मृतं॥ क्षत्रिये त्रिगुणं प्रोक्तं ब्राह्मणे षड्गुणं स्मृतमिति॥ स्कांदे
नामपि पात्रतो ज्ञा सान्नाच्छादनपरा॥ अन्नाच्छादनदाता तु पात्रं नैव विचारयेत्॥ अन्नस्य क्षुधितं पात्रं विव
स्त्रो वसनस्य चेति विष्णुधर्मोक्तेः॥ अपात्राय अंत्यकदानं॥ मंत्रपूर्वं तु यद्दानं न पात्राय प्रदापयेत्॥ दातुर्निंह

सहस्रं तु श्रोत्रियोक्तं का निक्तं तत्तातिस्रा तातयोक्तेः॥ तथा॥ यस्य वेदश्च वेदी च विच्छिद्येते त्रिपुरुषं॥ स वै दुर्ब्राह्मणो
नाम यश्चैव वृषलीपतिरिति पात्रमित्यर्थः॥ अपदेयादेये॥ यथाविधनाद्धर्मेण यत्किंचित्कुरुते नरः॥ तथा
विधं शुक्लेन सुखं शबलेन दुःखसंमिश्रं कृष्णेनासुखोदयं॥ शुक्लादिस्वरूपं तु स्मृतौ॥ श्रुतशौर्यतपः क
न्यायाजशिष्यान्वयागतं॥ धनं सप्तविधं शुक्लं उदयोऽप्यस्य तद्विधः॥ कुसीदकृषिवाणिज्यशिल्पशुल्कानुवृत्ति
तः कृतोपकारादाप्तं च शबलं समुदाहृतं॥ पार्श्विकद्यूतचौर्यार्तिप्रतिरूपकसाहसैः॥ व्याजेनोपार्जितं यत्तत्स
र्वेषां कृष्णमुच्यते इति॥ पार्श्विकं सर्वदा समीपास्थित्या सेवा प्रतिरूपकं वेषपातरग्रहणं॥ शिवधर्मे तस्मात्त्रिभा
गं वित्तस्य जीवनाय प्रकल्पयेत्॥ भागद्वयं तु धर्मार्थमनित्यं जीवितं यतः॥ सर्ववित्तस्य भागं पंचकं कृत्वा भाग
त्रयं जीवनार्थं भागद्वयं धर्मार्थमिति हेमाद्रिः॥ भागत्रयं सर्ववित्तस्य तत्रैको भागो जीवनाय भागद्वयं धर्माये
त्यन्ये इत्यपरा शक्तिविषये तु भारते॥ एकां गां दशगुर्दद्याद्दश दद्याच्च गोशती॥ शतं सहस्रगुर्दद्यात्सर्वे समफला
॥ स्मृता इति॥ गोपदं वित्तमात्रोपलक्षणार्थं॥ अन्यथा पंचगवादेः सहस्रावधिकवादेश्च गोदानेनधिकारः स्यादि

तिहेमाद्रिः॥ यमः॥ सुवर्णरजतं ताम्रं यतिभ्यो यः प्रयच्छति। न तत्फलमवाप्नोति तच्चैव परिवर्जते॥ यतये कांचनं दत्वा
दाता पि नरकं व्रजेत्॥ अपि च प्रद्यात्प्रतिगृह्णातापि॥ अंगिराः॥ देवतानां गुरूणां च मातापित्रोस्तथैव च॥ पुण्यं दे
यं प्रयत्नेन नापुण्यं चोदितं क्वचित्॥ तथा॥ पापदः पापमाप्नोति नरोऽल्पज्ञगुणं सदा पुण्यमाप्नोति प्रातश्चोपस
हस्रशः॥ आपत्स्वपि न देयानि न च वस्तूनि सर्वदा॥ अन्वये सति सर्वस्वं दाराश्च शरणागतान्॥ न्यासाधीकुलवृत्ति
च निक्षेपः स्त्रीधनं सुत॥ यो ददाति स मूढात्मा प्रायश्चित्तैर्विशुध्यति॥ अंगिरा॥ बकुम्भो न प्रदेयानि गोग्रहशयनं
स्त्रियः॥ विभक्तदक्षिणाह्येता दातारं तारयंति हि॥ विभक्त दत्ता हृष्यन्त्यानि॥ अयाह्युत्कांडे॥ अजिनं मृतशय्यां च
मेषां चोभयतोमुखीं॥ कुरुक्षेत्रे च गृह्णीतो न भूयः पुरुषो भवेत्॥ अयाह्यं प्रकृतं तत्रैव॥ हस्त्यश्वरथयानानि मृ
तशय्यानदय॥ अयाह्याः स्मृताः॥ आसनं भूतस्यैव॥ पद्मपुराणे ब्रह्मांड भूमिदानं च याह्यं नैकेन तद्भवेत्॥ अ
घ्नंच मणिमातंग तिलस्नेहानि वर्जयेदिति॥ वसिष्ठः॥ आद्यं विषं सुरावाप्रतिग्राह्या रिजास्त्रणस्य॥ हेमाद्रौ पाद्मे
अतिदुष्टा प्रेतशय्या न याह्या द्विजसत्तमैः॥ गृहीतायां तु तस्यां तु पुनः संस्कारमर्हति लोहे तिलाश्च महिषीतैलं

लवणमेव च॥ तिलधेनुर्मणिश्चैव घोराः सप्तप्रतिग्रहा इति॥ मनुः॥ हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान्घृ
तं॥ अविद्वान्प्रतिगृह्णानो भस्मी भवति काष्ठवत्॥ प्रतिग्रहसमर्थोऽपि प्रसंगं तत्र वर्जयेत्॥ प्रतिग्रहेण विप्रा
णां ब्राह्मं तेजो विनश्यति॥ इति देयद्रव्यं॥ अथ कालः॥ दर्शे शतगुणं दानं तच्चतुर्दिनक्षये॥ शतघ्नं तच्च संक्रां
तौ शतघ्नं विषुवे ततः॥ युगादौ तच्छतगुणं अयने तच्छताहतं॥ सोमग्रहे तच्छतघ्नं तच्छतघ्नं रवेर्ग्रहे॥ तच्छतघ्नं
व्यतीपाते दानं वेदविदो विदुः॥ विष्णुधर्मोत्तरे॥ वैशाखी कार्त्तिकी माघी पौर्णिमासु महाफला॥ पौर्णमासीसु वै
सुमासर्क्षसहितासु च॥ दत्तानामिह दानानां फलं शतगुणं भवेत्॥ यस्यां पूर्णेंदुना योगं याति जीवो महाब
लः॥ पौर्णमासी तु विज्ञेया महापूर्वा द्विजोत्तम॥ स्नानं दानं तथा जप्यं अक्षय्यं वै सदा स्मृतं॥ शंखः॥ अमावा
स्या तु सोमेन सप्तमी भानुना सह॥ चतुर्थी भूमिपुत्रेण सोमपुत्रेण चाष्टमी॥ चतस्रस्तिथयस्त्वेतास्तुल्याः सूर्यग्रहेण
हि॥ सर्वमन्त्र यमत्रोक्तं स्नानदानजपादिकं॥ अमावास्याव्यतीपातोपग्रहणं चेंद्रसूर्ययोः॥ मन्वादयो युगादिश्च
दसंक्रांतिर्वैधृतिस्तथेतादि॥ भारते॥ रात्रौ दानं न शंसंति विना त्वभयदक्षिणां॥ विद्याकन्यां द्विजश्रेष्ठ दीपमन्नं

दानम.

प्रतिश्रयं। विनेति पदं विद्यादिभिरपि संबध्यते। तथा। महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयं। स्नानं तत्र न कुर्वीत
॥५॥ काम्यनैमित्तिकादृते। नेच्छंत्येके स्नानदानं रात्रौ मध्यमयामयोः। नैमित्तिकं तदा कुर्यान्नित्यं तु गमनागपि। उक्त
यतो मुख्यातुरदाना न यदानान्नदानादिकं तु सर्वदा भवतीति तत्र तत्र स्पष्टं। अथ पुण्यदेशाः। मनुः। दृषद्वतीसर
स्वत्योर्देवनद्योर्यदंतरं। तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते। कुरुक्षेत्रं च मत्स्याश्च पंचालाः शूरसेनकाः। एष ब्र
ह्मर्षिदेशो वै ब्रह्मावर्तादनंतरं। मत्स्यो विराटदेशः। पंचालाः कान्यकुब्जादिक्षेत्रादिदेशः। शूरसेनिका मथुरादि
देशः। हिमवद्विंध्ययोर्मध्यं यत्प्राग्विनशनादपि। प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः। विनशनं मंतद्धनि
भविष्यत्पुराणे। वाराणसी कुरुक्षेत्रं प्रयागं पुष्करं क्षेत्रं गंगासमुद्रतीरं नैमिषामरकंटकं श्रीपर्वतमहाका
लगोकर्णदेवपर्वतादीनि पुण्यानीति पाद्मे। लिंगं वा प्रतिमा वापि दृश्यते यत्र कुत्रचित्। तत्सर्वं पुण्यतां यां
ति दानेषु च महाफलं। भविष्योत्तरोक्तो ग्रामात्रं भवेत्क्षेत्रं शिवस्य परमात्मनः। प्राणिनां तत्र पंचत्वं शिवसायु राम:
ज्यकारकं। फलं दत्तं कृतानां च स्नानं तं परिकीर्तितं। मनुजैः स्थापिते लिंगे क्षेत्रमानमिदं स्मृतं। स्वयंभुविसह ॥५५८॥

स्यादार्षे चैव तदर्धकं। तथा। गृहे दशगुणं दानं गोष्ठे चैव शताधिकं। पुण्यतीर्थेषु माहस्रं अनंतं शिवसंनि
धौ। मात्स्ये। शालग्रामसमुद्भूतः शैलचक्रांकमंडितः। तिष्ठते यत्र वसुधे तत्क्षेत्रं योजनत्रयं। द्वारवत्याः शिला
देवि मुद्रिता मम मुद्रया। यत्रापि नीयते तस्मात्क्षेत्रं वै द्वादशयोजनमित्यादि। काशीखंडे। अन्यत्र यत्कृतं कर्म ब्र
तं कर्म व्रतं दानं तपो जपः। गंगातटेषु तत्सर्वं कृतं कोटिगुणं भवेत्। मात्स्ये। अग्निहोत्रिगृहे चैव पदं त्यमपि दी
यते। तदनंतफलं सर्वं भवतीति विनिश्चयः। इति देशाः। प्रतिग्रहे देशनिषेधः। पाद्मे। न तीर्थे प्रतिगृह्णीया
त्प्राणैः कंठगतैरपि। ब्रह्मपुराणे। प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयं। तत्र न प्रतिगृह्णीयात्प्राणैः कंठ
गतैरपि। दानधर्मे। भाद्रशुक्लचतुर्दश्यां यावदाक्रमते जलं। तावद्गर्भं विजानीयात्तदूर्ध्वं तीरमुच्यते। ब्राह्मे
पि। सार्धहस्तशतं यावद्गर्भतस्तीरमुच्यते। स्कांदे। तीराद्गव्यूतिमात्रं तु परितः क्षेत्रमुच्यते इति इदं च गंगायां
गर्भप्रतिग्रहनिषेधः प्रसिद्धनदीषु। प्रसिद्धतरगंडक्यादिषु तु तीरेपि। गंगायां तु क्षेत्रेपीति सर्वशिष्टाचारः। अ
पदात्कृत्स्नं मनुः। प्रभुः प्रथमकल्पस्य योनुकल्पेन वर्तते। न सांपरायिकं तस्य दुर्मतेर्विद्यते फलं। कात्यायनः। कु

दानम॰
॥६॥

ङ्गोपग्रन्थिनिविष्टेन तथा यज्ञोपवीतिना। देयं प्रतिग्रहीतव्यं अन्यथा विफलं भवेत्। स्मृत्यंतरे। दद्यात्पूर्वमुखो दानं गृ
ह्णीयादुत्तरामुखः। आयुर्विवर्धते दातुं ग्रहीतुः क्षीयते न तत्। हेमाद्रौ। नामगोत्रे समुच्चार्य संप्रदानस्य चात्म
नः। संप्रदेयं प्रयच्छंति कन्यादाने तु पुस्त्रयं। शाखामप्युच्चारयंति शिष्टाः। वस्त्रादिना विप्रवरणं चक्रुर्वंति मध्य
देशे। तथा। नामगोत्रे समुच्चार्य सम्यक् श्रद्धान्वितो ददेत्। संकीर्त्य देशकालादि तुभ्यं संप्रददे इति। नममेत्य
पि कीर्त्तयंति शिष्टाः। वाराहे। सुस्नातः सम्यगाचांतः कृतसंध्यादिकक्रियः। कामक्रोधविहीनश्च पाखंडस्पर्श
वर्जितः। इत्यादितिशेषः। गौतमः। अंतर्जानुकरं कृत्वा सकुशं सतिलोदकं। फलैरन्यापि वसंधाम प्रदद्यात् श्रद्धया
न्वितः। तथा। नामगोत्रे समुच्चार्य प्राङ्मुखो देयकीर्त्तनात्। उदङ्मुखाय विप्राय दत्वा तं स्वस्तिकीर्त्तयेत्। सदे
वताकं देयकीर्त्तनानंतरं दत्वेत्यर्थः। देवलः। प्रदाय पात्रा कस्तुष्टिं वा यस्तुश्च द्धा समन्वितः। महते पात्ररूपाय सर्वा
स्तुदयमाप्नुयात्। पात्रसंनिधानेनारण्ये। मनसा पात्रमुद्दिश्य जलं भूमौ विनिक्षिपेत्। विद्यते सागरस्यांत रा॰मं॰
स्तस्यांतो नैव विद्यते। पात्रसंनिधानेऽप्यविप्रकरे दानं देयमिति धौम्यस्मृतौ। पात्रासंनिधाने त्वप्सु विनिक्षि ॥५५९॥

पेदिति षड्विंशन्मते। देयपात्रासंनिधाने तत्रैव विशेष उक्तः। द्रव्यपात्रविकर्षश्चेत्परोक्षे दत्तमुद्घृतगतं ध्या
याद्दैवं पात्रं द्रव्यमादित्यदैवतं। तथा। परोक्षे कल्पितं दानं पात्राभावे कथं भवेत्। गोत्रजेभ्यस्तद्दद्यात्तद
भावे स्वबंधुषु। गोत्रजाः पात्रस्यस्कांदे। तस्मात्तु एवमुच्चार्य कार्यो दानप्रतिग्रहौ। याज्ञवल्क्यः। प्रतिग्रहे सूनिच
क्रिध्वजिवेश्यानराधिपाः। दुष्टा दशगुणं पूर्वात्पूर्वादेते यथाक्रमं। राजाशास्त्रातिक्रमवर्त्ती। नराज्ञः प्रतिगृ
ह्णीयाल्लुब्धस्योच्छास्त्रवर्त्तिन इति स्मृतेः। तदपवादः। अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणः। अन्यत्र कुलटा षं
ढपतितेभ्यः स्तथा द्विषः। तथा। चंडालो जायते यज्ञकरणाच्छूद्रभिक्षितात्। यज्ञार्थं लब्धमददद्भासः काकोपि वा भ
वेत्। यज्ञोद्देशेन न याचेत्यर्थः। प्रकारांतरेण लब्धेन यज्ञे कृते न दोषः। अत एव ज्ञायते वेदपादे यज्ञोद्देशेनापि
याचनीयः। अथ प्रतिग्रहप्रकारः। ॐकारमुच्चरन् प्राज्ञो द्विरासकुशोदकं। गृह्णीयाद्दक्षिणे हस्ते तं ददतेस्व
स्तिकीर्त्तयेत्। पुराणांतरे। प्रतिगृह्णीतासावित्रं सर्वत्रैवानुकीर्त्तयेत्। ततस्तु कीर्त्तयेत्साई इ दद्येणा द्रव्यदैवतां।
समापयेत्ततः पश्चात्कामस्तुत्या प्रतिग्रहं। तद्दत्ते कीर्त्तयेत्स्वस्ति प्रतिग्रहविधिस्त्वयं। सावित्रो देवस्यत्वेत्यादि

आदित्यपुराणे। प्रतिग्रहरूपवेदुः चैव प्रतिगृह्य द्विजोत्तमान्। मंत्रं प्रवेत्तु राजन्यात्तूपांशु च तथा विशि। मनसा
शूद्रतु तथाप्युक्ते स्वस्तिवाचनमेव च। सोंकारं ब्राह्मणे कुर्यान्निरोंकारं महीपतौ। उपांशु च तथा वैश्ये मनसा शूद्र
जेमति। प्रतिग्रहश्च दक्षिणहस्तमध्ये कर्तव्यः। हस्तमध्ये ब्रह्मतीर्थे दक्षिणायहणे तु तदिति स्मरणात्। त
था। प्रतिग्रहस्य यो धर्म्यं न जानाति द्विजो विधिं। दुष्टस्तेन्यसमायुक्तो नरके प्रतिपद्यते। विधिं तु धर्मं विज्ञाय ब्रा
ह्मणस्तु प्रतिग्रहे। दात्रा सह तरत्येवमहार्णपसौ ध्रुवमिति। याज्ञवल्क्यः। प्रतिग्रहसमर्थोपि नादत्ते यः प्रतिग्र
हाये लोका दानशीलानां स तानाप्नोति पुष्कलानिति। अप्रत्याख्येयमप्याह स एव। कुशाः शाकं पयो मत्स्या गंध
पुष्पदधिक्षितिः मांसं शय्यासनं धानाः प्रत्याख्येयं न चारि वा। एधोदकं मूलफलमन्नमभ्युद्यतं च यत्। सर्वत प्रति
गृह्णीयात् मध्वथाभयदक्षिणामिति। एधः काष्ठं अभ्युद्यतं अयाचितागतं। मनुः शय्यां गृहं कुशान् गंधानपः पुष्पं
तथा दधि। मत्स्यान्धानाः पयो मांसं शाकं चैव न निर्णुदेत्। तथा। चर्म मांसं मधु घृतं धानाः क्षीरमयोदितं। गुडं तक्रं
च मयाह्यं निवृत्तेनापि शूद्रत। खलक्षेत्रगतं धान्यं वापीकूपगतं जलं। अभोज्यादपि तद्ग्राह्यं यच्च गोष्ठगतं पयः। इ

क्षुफलानि पिण्याकं प्रतिग्राह्याणि सर्वतः। बृहस्पतिः। विवाहोत्सवयज्ञेषु त्वंतरा मृतसूतके। पूर्वसंकल्पितं
ग्राह्यं न दोषः परिकीर्तित इति। अत्र विवाहोत्सवयज्ञेष्विति यजतिषु ये यजामहं करोति नानूयाजेष्वितिवदुद्दे
श्यविशेषणमविवक्षितं। अन्यथा परिगणनं व्यर्थं स्यात्। अतोन्यत्र पूर्वसंकल्पितस्य सूतकादौ ग्रहणे दोष एवे
ति। द्रव्यदेवतास्तैत्तरीये सोमाय वासः रुद्राय गां। वरुणायाश्वं। प्रजापतये पुरुषं मनवे तल्पं। त्वष्ट्रेऽजां। पूष्णे विनि
कत्या अश्वतरगर्दभौ। हिमवते हस्तिनं गंधर्वाप्सरोभ्यः स्रगलंकरणे विश्वेभ्यो देवेभ्यो धान्यं। वाचेन्नं। ब्रह्मण
ओदनं। समुद्राय अपः। उत्तानायांगिरसायानः वैश्वानराय रथमिति। विष्णुधर्मोत्तरे। अभयं सर्वदेवानां भूमिर्वै विष्णुदेवता
कन्यादासस्तथा दासी प्राजापत्याः प्रकीर्तिताः। तथा चैकशफं सर्वं कथितं यमदैवतं। महिषाश्च तथा याम्यउष्ट्रो वै नै
ऋतो भवेत्। रौद्री धेनुर्विनिर्दिष्टा छागमाग्नेयमादिशेत्। मेषं तु वारुणं विद्यात् वाराहं वैष्णवं तथा। आरण्याः पशवः स
र्वे कथिता वायुदेवता। जलाशयं तु सर्वं तु वारिधानी कमंडलुं। कुंभं च करकं चैव वारुणानि निबोध मे। समुद्भूतानि
सर्वाणि वारुणानि द्विजोत्तमाः। आग्नेयं कनकं प्रोक्तं सर्वलोहानि वाप्यथ। प्राजापत्यानि सस्यानि पक्वान्नमपि वै।

द्विज॥ ज्ञेयास्तु सर्वगंधाश्च वैगंधर्वाश्च विचक्षणैः॥ बार्हस्पत्यं स्मृतं वासः सौम्याज्ञेयान्नपूर्वसंकः॥ रसास्तथा॥ पक्षिणश्च
तथा सर्वे वायव्याः परिकीर्तिताः॥ विद्याब्राह्मी विनिर्दिष्टा विद्योपकरणानि च॥ सारस्वतानि देयानि पुस्तकादीनि
पंडितैः॥ सर्वेषां शिल्पिभांडानां विश्वकर्मा तु दैवतं॥ द्रुमाणां मधपुष्पाणां शाकैर्हरितकैः सह॥ फलानामपि सर्वे
षां तथा ज्ञेयो वनस्पतिः॥ मत्स्यमांसे विनिर्दिष्टे प्राजापत्ये तथैव च॥ छत्रं कृष्णाजिनं शय्यां रथमासनमेव च॥ उपानहौ च
यानं च यच्चान्यत्प्राणिवर्जितं॥ तत्तु चांगिरसत्वेन प्रतिगृह्णीत मानवः॥ शरोपयोगियत्सर्वं शस्त्रं चर्म ध्वजादिकं रणो
पकरणं सर्वं विज्ञेयं सर्वदैवतं॥ गृहं तु सर्वदैवत्यं यदुक्तं द्विजोत्तमा॥ विज्ञेयं विष्णुदैवतं सर्वेषां द्विजसत्तमा
हेमाद्रौ यज्ञः पाद्मानंतरं राजा त्वा वरुणो वयं तु देवि द्विष्णो श्रमुकस्मै श्रमुकं तेनामृतत्वमश्यामयो दात्रे त
योमह्यमस्तु प्रतिगृहीत्रे ततः कामस्तुतिः॥ ॐ स्वस्तीति विशेषः॥ विष्णुधर्मोत्तरे॥ भूमेः प्रतिग्रहं कुर्यात् भूमिं
कुर्वन्प्रदक्षिणं॥ करे गृहीत्वा विन्यस्य धर्मोऽग्ने यः प्रतिग्रहः॥ आरुह्य तु गजस्येक्ष कर्णे वाश्वस्य कीर्तितः॥
तथा चैकशफानां तु सर्वेषां च विशेषतः॥ तथा॥ कर्णे प्रतिगृह्णीतत्तान् शृंगे पुच्छे कृष्णाजिनं तथा॥ तान्नरक

शफान्॥ स्वत्रं शृंगे गिरणां॥ मेकशफानां शृंगे इतरेषां तु कर्त्तृप्रतिग्रहवत्स्था॥ कर्णेऽजः परावः सर्वे याश्च पुच्छे विचक्ष
णैः॥ गृह्णीयान्महिषं शृंगे खरं वैश्रष्टदेशतः॥ प्रतिग्रहसमर्थो हि स्पयानानां चाधिरोहणं॥ बीजानां मुष्टिमादाय
रत्नामादाय सर्वतः॥ वस्त्रं दशांतादादद्यात्परिधायाथवा पुनः॥ आरुह्योपानहौ मंचमारुह्य वस्तु पादुके च
र्म ध्वजौ च संस्पृश्य प्रविश्य च तथा गृहं॥ अवतार्य च सर्वाणि जलस्थानानि वै द्विजा॥ ईषां यां तु रथो याह्य
छत्रं दंडं तथैव च॥ द्रुमं च प्रतिगृह्णीयान्मूलमस्तकरो द्विजः॥ आयुधानि समादाय तथा सुच्य विन्दुपरणं॥ प
रिशिष्टे तु प्रतिगृह्णात गां पुच्छे कर्णे वा हस्तिनं करे॥ मूर्ध्नि दासीं समजं चैव पृष्ठे श्वतरगर्दभौ॥ अश्वं कर्णे सटे वा
पि स्वन्यसु द्विरप धारयेत्॥ शय्यासनं गृहं क्षेत्रं संस्पृश्य पादाय कांचनं॥ उष्ट्रं च कुक्कुटं स्पृष्ट्वा ग्राम गां श्वमहि
षादिकान्॥ गोधाम्य विधानेन पुच्छे संस्पृश्य पत्रिणः॥ दंष्ट्रिणो दंशिनश्चैव तथा इग्नगाश्चये॥ तु जस्विनो
चसत्वानामेष एव विधिः स्मृतः॥ छत्रं सचामरं स्त्रले फलं संगृह्य गौरवात्॥ प्रगृह्योपानहौ मंचं वाचयेत्स्व
तिमुच्यैवै वासस्त्वप समादाय कंन्यां शां स्पृश्य वाकरे रति नाप्यां पर पूर्वं प्रतिगृह्णीत चासतः पुत्रमुक्ष

गमारोप्य प्रतिगृह्णीत दत्तकं ॥ रथं रथ्यसुरैर्वस्त्र ह्यप्रतिगृह्णीत तत्क्रवरो क्रवरो युगा धारं काष्टं ॥ युग्मकांचनवस्त्रा
णां नागसुक्ते प्रतिग्रहः ॥ इतिमामान्येतिकर्तव्यता निरूपणं ॥ अथ परिभाषा ॥ वामनपुराणे ॥ सर्वमंगलमं
गल्यं वरेण्यं वरदं शुभं ॥ नारायणं नमस्कृत्य सर्वकर्माणि कारयेत् ॥ भविष्ये संकल्पेन विना विप्र यत्किंचित्कु
रुते पुनः ॥ फलं चाप्यल्पकं तस्य धर्मस्यार्द्धक्षयो भवेत् ॥ जपहोमोपवासेषु धौतवस्त्रधरो भवेत् ॥ अलंकृतः शु
चिर्मौनी श्रद्धावान् विजितेंद्रियः ॥ याज्ञवल्क्यः ॥ यदि वाग्यमलोपः स्याज्जपादिषु कथंचन ॥ व्याहरेद्वैष्णवं मंत्रं स्मरेद्वावि
ष्णुमव्ययं ॥ रौद्रपित्र्यासुरान्मंत्रांस्तथा चैवाभिचारिकान् ॥ व्याहृत्यालभ्य चात्मानमपः स्पृष्ट्वान्यदा भवेत् ॥ कात्या
यनः ॥ पित्र्यमंत्रानुद्रवणे आत्मालंभेऽधमेक्षणे ॥ अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे ॥ मार्जारमूषकस्प
र्शे आक्रुष्टे क्रोधसंभवे ॥ निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नपः स्पृशेत् ॥ आत्मालंभो हृदयस्पर्शः ॥ स च कर्मणि
विहित इति केचित् ॥ स्मृत्यर्थसारे ॥ कर्तॄणां नामतुल्यौ तु दक्षिणांगं भवेत्तथा ॥ छंदोगपरिशिष्टे पुत्राद्विद्विःप
मोना त्तिजपादिषु कथंचन ॥ तिष्ठन्नस्तत्र दिशः प्रोक्ताऐंद्री सौम्यापराजिता ॥ आसीतऊर्ध्वः प्रह्वो वा नियमो य ॥ राम: ॥५६२

त्र नेदृशः ॥ तदासीनेन कर्तव्यं न प्रह्वेण न तिष्ठता ॥ तथा ॥ पंचाशद्भिर्भवेद्ब्रह्मा तदर्धेन तु विष्टरः ॥ दक्षिणाव
र्तकौ ब्रह्मा वामावर्तस्तु विष्टरः ॥ तथा ॥ अनंतगर्भिणं साग्रं कौशं द्विदलमेव च ॥ प्रादेशमात्रं विज्ञेयं पवित्रं य
त्र कुत्रचित् ॥ तथा ॥ सदोपवीतिना भाव्यं सदा बद्धशिखेन च ॥ विशिखो व्युपवीतश्च यत्करोति न तत्कृतं ॥ वि
ष्णुधर्मोत्तरे ॥ मंत्रेणोंकारपूतेन स्वाहांतेन विचक्षणः ॥ स्वाहावसानजुहुयाद्ध्यायन्वै मंत्रदेवतां ॥ ब्राह्मे ॥ शमीपलाश
न्यग्रोधप्लक्षवैकंकतोद्भवाः ॥ अश्वत्थोदुंबरौ बिल्वश्चंदनः सरलस्तथा ॥ शालश्च देवदारुश्च खदिरश्चेति या
ज्ञिकाः ॥ कर्मप्रदीपे ॥ नांगुष्ठादधिका कार्या समित्स्थूलतया क्वचित् ॥ न वियुक्ता त्वचा चैव न सकीटा न पाटिका ॥
प्रादेशान्नाधिका नोना न तथा स्याद्विशाखिका ॥ न सपर्णा समित्कार्या होमकर्मसु जानता ॥ तथा ॥ प्रागग्राः
समिधो याह्याः सर्वदा नोपपाटिताः ॥ काम्येषु तु नृप कर्मादौ विपरीता जिघांसतः ॥ विशालादिदलाश्च स्यावक्रा व
ऊशिराः ॥ कृशाद्दीर्घास्थूलास्तु गोजुस्सकर्मसिद्धिविनाशकाः ॥ वायुपुराणे ॥ कंडनं पेषणं चैव तथैवोल्लेखनं तथा
सह हेवपित्र्यं स्यादेवानां तन्निरुच्यते ॥ भविष्यत्पुराणे ॥ न समास्थितेन पात्रेण विष्टेनेन च पाणिना ॥ वामेन पद्

दानम्.

॥१०॥

शार्दूलनांतरिक्षे तु दृश्यते ॥ धनासु दीरेरे खासु सोमती पर्यंतु मध्यमं ॥ लाजादिहवनं तेन कर्तव्यं वपनं तथा ॥ वप
नं निर्वापः ॥ कात्यायनः ॥ पाणपाकृति द्विदिशापर्व पूरिकारसादिना चेत्सु विपर्वपूरिका देवेन तीर्थेन च दृश्यते
हविः स्वं गारिशिखिर्चिषित चयावके येन चिंषितु होत्पयोऽव्यंगा शिखि चमानवः ॥ मंदाग्निरामयावी च दरिद्रश्चै
व जायते ॥ तस्मात्समिद्धे होतव्यं नासमिद्धे कथंचन आरोग्यमिच्छतायुश्च श्रियमात्यंतिकीं तथा ॥ जुहूर्षुश्च ज
ते चैव पाणिश्चूर्पस्तु वादिभिः ॥ न कुर्यादग्निधमनं कुर्यात्तु व्यजनादिना ॥ मुखेनैव धमेदग्निं मुखाद्धेषो ध्यजाय
त ॥ नाग्निं मुखे नैतु तु यज्ञौ किं के योजयंतितत् ॥ बह्वृचपरिशिष्टे ॥ अपाबुधः स धूमेतु जुहुयाद्योजनाशने ॥ य
जमानो भवेदंधः सपुत्र इति च श्रुतिः ॥ मात्स्ये ॥ होमो यज्ञादिपूजायां शाष्टम षोत्तरं भवेत् ॥ अष्टाविंशति र
ष्टौ वा यथाशक्ति विधीयते ॥ गृह्यपरिशिष्टे ॥ बहुत्वं वा सगृह्यस्थं यस्य कर्म प्रकीर्तितं ॥ तस्य तावति शास्त्रार्थे
कृते सर्वं कृतं भवेत् ॥ प्रवृत्तमन्यथा कुर्याद्यदि होमात्कथंचन यतस्तदन्यथा भूतं तत एव समापयेत् ॥ अ
न्यथा भूतं विपर्यस्तं छंदोगपरिशिष्टे यन्नाम्नातं स्वशाखायां तारकाम विरोधि यत् विद्वद्भिस्तदनुष्ठेय

रामः

॥५६३॥

मग्निहोत्रादिकर्मवित् ॥ समाप्ते यदि जानीयान्मयैतदपयथाकृतं ॥ तावदेव पुनः कुर्यान्नावृत्तिः सर्वकर्मणः ॥ प्रधान
स्याक्रियायां त्र सांगं तत् क्रियते पुनः ॥ तदंगस्याक्रियायां तु नावृत्तिर्न च तत्क्रिया ॥ तथा दर्भाः कृत्स्ना जिनं मंत्रा
ब्राह्मणा हविरग्नयः ॥ अयातयामान्येतानि नियोज्यानि पुनः पुनः ॥ लघुहारीतः ॥ चितौ दर्भाः पथि दर्भाः ये दर्भा
यज्ञभूमिषु स्तरणासनपिंडेषु षट् कुशान्परिवर्जयेदिति ॥ वास्येपि पयो क्रयत्त्वसंपत्तौ ग्राह्यं तदनुकारियत
यवानामिव गोधूमा व्रीहीणामिव शालयः ॥ आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते मंत्रस्य देवताया अप्रज
पतिरिति स्थितिः ॥ अनादेशे त्रो अविधाने ॥ प्राजापत्यमंत्रः समस्तव्याहृतय इति मदन ॥ स्मृत्यंतरेपि ॥ न व्याहृता
समं कृत इति गारुडे ॥ प्रणवादि नमोंतं च चतुर्थ्यंतं च सत्तम देवतायाः स्वकं नाम मूलमंत्रः प्रकीर्तितः ॥ विष्णुश्च
मैत्रेरेद ध्वलाभे पयः कार्यमध्यलाभेत पायसं ॥ हूतपति धिकुर्यापयो वा दधि वान्यप ॥ सर्वभावे यवः प्र
तिनिधिरिति पैठीनसिनोक्तं ॥ बौधायनः ॥ पालाशाश्च खदिररौहितकौ तु वराणामिध्मास्तदलाभे सर्ववन
स्पतीनां बौधायन ॥ आज्यहोमेषु सर्वेषु गव्यमेव भवेद्धृतं ॥ तदलाभे महिष्याश्च आज्यमादिकमेव च ॥ तदला

शेतुते लंस्यात द भावेतु जातिलं॥ तदभावे तकौसुंभं तदभावेतु सार्षपं॥ याज्ञवल्क्यः॥ आर्षं छंदश्च दैवत्यं विनियोगं त
थैव च॥ वेदितव्यं प्रयत्नेन ब्राह्मणांच विशेषतः॥ अविदित्वातु यः कुर्याद्यातनाध्यायनं जपं॥ होमं मंतर्जलादीनि तस्य
चाल्पं फलं भवेत्॥ आदित्यपुराणे॥ सुवर्णं रजतं मुक्ता राजावर्तं प्रवालकं॥ रत्नपंचकमाख्यातं शेषं वस्तु प्रवाम्य
हं॥ अन्यस्मिंतरे तु॥ कनकं कुलिशं नीलं पद्मरागं च मौक्तिकं॥ एतानि पंचरत्नानि रत्नशास्त्रविदो विदुरिति॥ तत्रैव
अभावे सर्वरत्नानां हेम सर्वत्र योजयेत्॥ विष्णुधर्मोत्तरे॥ गायत्र्यादाय गोमूत्रं गंधद्वारेति गोमयं॥ आप्यायस्वेति
च क्षीरं दधिक्राव्णेति वै दधि॥ तेजोसि शुक्रमित्याज्यं देवस्यत्वा कुशोदकं॥ एभिस्तु पंचभिर्युक्तं पंचगव्यमिति स्मृ
तं॥ मदनरत्ने कात्यायनः॥ आज्यं क्षीरं मधु तथा मधुरत्रयमुच्यत इति॥ आसे॥ अश्वत्थोदुंबरप्लक्षचूतन्यग्रोधपल्ल
वाः पंचभंगा इति प्रोक्ताः सर्वकर्मसु शोभनाः॥ पंचभंगाः पल्लवाः॥ चतुःसमा गरुडे कस्तूरिकाया द्वौ भागौ चत्वा
रश्चंदनस्य च॥ कुंकुमस्य त्रयश्चैव शशिनश्च चतुःसमं॥ शशी कर्पूरः॥ कर्पूरं चंदनं दर्पं कुंकुमं च समांशकं॥ सर्व राम:
गंधमिति प्रोक्तं समस्तासुरवल्लभं॥ तथा॥ कर्पूरमगरुश्चैव कस्तूरी चंदनं तथा॥ कंकोलं च भवेदेभिः पंचभि ॥५६४॥

र्यक्षकर्दमः॥ छंदोगपरिशिष्टे॥ कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेय चंदनं॥ वचा चंपक मुस्ता च सर्वौषध्यो दश स्मृता
॥ या स्ये॥ इक्षवस्तरुराजं च निष्पावाजाजि धान्यकं॥ विकारवच्च गोक्षीरं कुसुंभं कुंकुमं तथा॥ लवणं चाष्टमं त
त्र सौभाग्याष्टकमुच्यते॥ तरुराजस्तालरसस्तत्र अजाजी जीरकं॥ विष्णुधर्मोत्तरे॥ मुक्ताफलं हरितकं वैदू
र्यं पद्मरागकं॥ पुष्परागं च गोमेदं नीलं गरुत्मतं तथा॥ प्रवालयुक्तान्युक्तानि महारत्नानि वै नव॥ स्कांदे॥ दधिक्षीरम
थाज्यं च माक्षिकं लवणं गुडं तथैवेक्षुरसश्चेति रसाः प्रोक्ता मनीषिभिः॥ भविष्यत्पुराणे॥ आपःक्षीरं कुशाग्राणि दध्य
क्षततिलास्तथा॥ यवाः सिद्धार्थकाश्चेति ह्यर्घोष्टांगः प्रकीर्तितः॥ तत्रैव॥ सुवर्णं रजतं ताम्रं मारकूटं तथैव च॥
लोहं त्रपु तथा सीसं धातवः परिकीर्तिताः॥ पंचरात्रे॥ रजांसि पंचवर्णानि मंडलार्थे हि कारयेत्॥ शालितंडुलचूर्णे
न शुक्लं वायवसंभवं॥ रक्तं कुसुंभसिंदूरं गैरिकादि समुद्भवं॥ हरितालोद्भवं पीतं रजतीसंभवेत्तथा॥ कृष्णं दग्ध
यवैर्हरितं पीतकल्कविमिश्रितं रजनिहरिद्रा॥ भविष्यत्पुराणे॥ दूर्वा यवांकुरश्चैव बालकं चूतपल्लवाः॥ हरिद्राद्वय
सिद्धार्थशिखिपत्रोरगत्वचः॥ कंकणौषधयश्चैवाः कौतुकाख्या नव स्मृता इति नव कौतुकानि॥ दशांगधूपो म

दानमः
॥२२॥ द्र॰नरले गंधयुक्तो॥ षड्भागकुष्टं द्विगुणं गुडश्च लाक्षाच पंचनखस्य भागा॥ हरीतकी सर्जरसः समांसी भागैकनेकं त्रि
लवं शिलाजं॥ घनस्य चत्वारि उरस्य चैको धूपो दशांगः कथितो मुनींद्रैः॥ शिलाजं शैलेयं॥ घनो मुस्ता॥ पुरो गुग्गुलु
न विष्णुपुराणे विशेष॥ अथ उक्तद्व्यतसंख्या देवताप्रतिमान्यपि सौवर्णी राजती ताम्री दारुजा मार्त्तिकी तथा॥ चि
त्रजा पिष्टलेपोत्था निजविज्ञानुलेपतः॥ आमाषात्पलपर्यंता कर्त्तव्या शाक्यवर्जितैः॥ अंगुष्ठपर्वप्रभृति वितस्त्यवा-
धिकास्मृतेति॥ तत्र दशांगदेवताप्रतिमालक्षणानि तत्र तत्र वक्ष्यंते॥ तुल्याधिष्ठितदेवताप्रतिमानां तु लक्षणानि त्रि
नेत्रो वृषभस्थस्त्रिशूलधृक्कपालपाणिश्च शार्दूलचर्माईशः॥ पीतांबरधरः सोमो गदापाणिर्वरप्रदः॥ धावद्धरिणह
स्तो ध्वजधारी समीरणः॥ रक्तवर्णस्त्रिनयनो द्विभुजश्चंद्रमौलयः जटिलः स प्रकर्तव्या रुद्रो बाणधनुर्धरः॥४॥
श्मश्रुलः श्मश्रुः सिंहारूढः सप्रभापद्मासनः पद्महस्तकरो भूषितां गौरद्युनावरः सूर्यः॥५॥ श्मश्रुलो रक्तनाधरा संदशपा
णिर्द्विभुजो भृत्तिधिरो महान्विश्वकर्मा॥६॥ पीतांबरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशांतो दंडकमंडलुव रामः
क्षसूत्रधृक्कृगुरुः॥७॥ कमंडलुं स्रुवं चैव शक्तिं दक्षिणमयि क्रमात्॥ कलयस्तं गिरो नाम्नः करायाणिसमंततः॥८॥ ॥५६५॥

पाणयश्चाग्निनाम्नो पिंगलयंति जयस्तजं॥ शक्तिं च पुस्तकं चैव क्रमाद्देवकमंडलुं॥९॥ यज्ञोपवीती दंतस्थ एकव
क्रचतुर्भुजः॥ स्वदंतव्रजं स्रुवं धत्ते कुंडिकां च प्रजापतिः॥१०॥ विश्वेदेवास्तु सर्वे पि द्विभुजा बाणपाणयः॥ कर्त्त-
व्या वामपाणौ तु सशरासनपाणयः॥११॥ क्रतुर्दक्षो वसुः सत्यः कालकामौ धुरिलोचनौ पुरूरवार्द्रवसश्चेति
विश्वेदेवा दश स्मृता॥१२॥ जगद्विधातृरूपं प्रजापतितुल्यं चतुर्मुखत्वमात्रमस्याधिकं॥ पर्जन्यनामा विज्ञेयो
गजवक्त्रत्रयान्वितः॥ यो धत्ते सर्वजीवात्मा वरं जीवं विशेषकं॥ कुठारं च पयोजं च चिंतारत्नं महाशुचि॥ पाशं चक्रं कि
त्रासयं कुंडं च दशाभिः करैः॥१४॥ शंतनुरागतुल्य॥१५॥ कुशविष्टरपद्मस्थापितरः पिंडपात्रिणः॥१६॥ पीतांबरः पी
तवपुस्तवपुः किरीटी चतुर्भुजो दंडधरश्च हारी॥ चर्मासिधृक्सोमसुतः सदा सिंहाधिरूढो वरदो बुधश्च॥१७॥ चतुर्व
क्त्रश्चतुर्बाहुः सितमाल्यसितांबरः॥ सर्वाभरणवान्ध्येतो धर्मकार्ये महावपुः॥१८॥ चतुर्दंतगजारूढो वज्रपाणिः
पुरंदरः॥ प्राचीपतिः प्रकर्त्तव्यो नानाभरणभूषितः॥१९॥ द्विभुजौ देवभिषजौ कर्त्तव्यावश्विवाहनौ॥ तयोरोषधयः
कार्या दिव्या दक्षिणहस्तयोः॥ वामयोः पुस्तकौ कार्यौ दर्शनीयौ तथा द्विज॥२०॥ वरुणः पाशभृत्सौम्यः प्रतीच्याम

कराश्रयः॥ मित्रे कमलपाणिश्च कमलासनसंस्थितः॥ द्विभुजश्चेतमूर्त्तिश्च सर्वभूतहिते रतः॥ वरुणस्तु पूर्ववत्॥ २३॥
देवागणो न पंचाशद् वेदसमतेजसः॥ भ्रातरः पुरुहूतस्य मरुतः सूर्यवर्चसः॥ किरीटहारकेयूरकटकादिविभूषि
ताः खड्गचर्मधरा नित्यं शक्रस्यानुचराः सदा॥ २४॥ कृष्णमापिंगनेत्रं च गाढितं पीतविग्रहं पुष्पकस्थं धनाध्यक्षं ध्या
येच्छिवमरवं सदा॥ २५॥ वरदो नरवाहनो कानां किरीटांकुंडलांगदी॥ कपोलस्तूपंगं घवीवीणा वाद्यरतस्तथा॥ २६॥ जले
शः पूर्ववत्॥ पदक्षिणं दक्षिणाधःकरा दारम्यनित्यशः॥ २७॥ कौमोदकी पद्मशंखचक्रैरलंकृत इति विष्णुलक्षणं
ब्रह्मवैवर्त्ते दानकालेषु देवत्वं प्रतिमानां प्रकीर्त्तितं धेनूनामपि धेनुत्वं ब्रह्मसंकं दानयोगतः दातुर्वैदानकालेतु धे
नवः परिकीर्त्तिता॥ विप्रस्यव्ययकालेतु द्रव्यं तदिति निश्चय इति विष्णुधर्मोत्तरे हेमराजतताम्राश्च मृन्मयालक्षणा
न्विता या त्रैवस्य प्रतिष्ठादौ कुंभास्तु रत्निषेचने पंचाशांगुलवैपुल्याः उत्सेधे षोडशांगुलाः द्वादशांगुलमूलस्त्वोत्सुमु
खमष्टांगुलं भवेत्॥ संचत्वाराशच्च पंचाशा॥ स्वात्रादत्राः पंचाधिकशतमंगुलानि वैपुल्यमिति केचित्॥ पंचदशांगु
लमित्सतो पंचाधिकाशाः पंचदशा तावान्वैपुल्यं व्यास इति युक्तं तथा कलशास्तमुखेवब्रह्मायोवायांचमहे

रः मूलेतु संस्थितो विष्णुर्मध्ये मातृगणास्मृता॥ शेषास्तु देवताः सर्वा वेष्टयंति चतुर्दिशं॥ पृथिव्यां यानि तीर्थानि
कलशे निवसंति हि॥ यशांतिश्च पुष्टिश्च प्रीतिश्च मतिरेव च॥ ऋग्वेदश्च यजुर्वेदः सामवेदस्तथैव च अथर्ववेद
हिताः सर्वे कलशसंस्थिता इति॥ षड्डू शान्मते यवगोधूमधान्यानि तिलाः कंगुस्तथैव च॥ श्यामाकं चीनकं चैव सप्त
धान्यमुदाहृतं॥ मार्कंडेयपुराणे॥ व्रीहयश्च यवाश्चैव गोधूमाः कंगुकास्तिलाः॥ प्रियंगवः कोविदाराः कोरदूषः सतीन
काः माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः॥ आढक्यश्चणकाश्चैव ममणाः सप्तदश स्मृता कोरदूषाः कोद्रवाः स
तीनकाः सकलाया स्कांदे यवगोधूमधान्यानि तिलाः कंगुकुलत्थकाः माषा मुद्गा मसूराश्च निष्पावाः श्यामसर्ष
पाः गवेधुकाश्च नीवारा आढक्योथ सतीनकाः॥ चणकाश्चीतकाश्चैव धान्यान्यष्टादशैव तु॥ श्यामाः श्यामाका
ः व्याम॥ सुवर्णपरमं दानं सुवर्णं दक्षिणापरा॥ सर्वेषामेव दानानां सुवर्णं दक्षिणोच्यते॥ परेत्स क्तेउरुषा हारोपयि
कं तंडुलादिकमपि दक्षिणेति हेमाद्रिः॥ यत्त्वन्येषामेव दानानां सुवर्णं दक्षिणा स्मृताः सुवर्णादिप्रमाने तु रजतं द
क्षिणोच्यत इति वचनं तन्मूलं सर्वं सुवर्णं रजतं ताम्रं तंडुला धान्यमेव च॥ नित्यश्राद्धं देवपूजा सर्वमेव दद्दक्षि

दानम
॥२४॥

णमितिव्यासेनकेवलसुवर्णदानेदक्षिणापर्युदासात्॥ अयंचपर्युदासःकेवलसुवर्णदानएवनतुसुवर्णब्रह्मां
डादिदानइतिमदनादयः॥ देयद्रव्यशततोयांशंदक्षिणांपरिकल्पयेत्॥ अनुक्तदक्षिणेदानेदशांशंवावित्रा
क्रिता॥ तुलापुरुषदानादावन्यथिकल्पलिंगपुराणे॥ दक्षिणांचशतंसाग्रंवाप्रदापयेत्॥ ऋत्विजांचैवसर्वेषांदश
निष्कांश्चदापयेत्॥ भविष्योत्तरे॥ ज्ञेयंनिष्कशतंपापदानेषुविधिरुत्तमः॥ मध्यमस्तुतदर्धेनसर्वेषांदशोनितदर्धेन॥
धमःस्मृतः॥ मेषांवाचाकालपुरुषेतथान्येषुमहत्सुच॥ एवंद्रोणेयेंडेचधेनोकृष्णाजिनस्यच॥ अशक्तस्यापिकृ
प्तोयंपंचसौवर्णिकोविधिः॥ हेमकल्पपादपे रथेहिरण्मयरथे हेमहस्तिरथेचब्रह्मांडेब्रह्मांडे॥ धेनोःसुवर्णकाम
धेनो॥ अतोल्पेनयोदद्यान्महादानंनराधमः॥ प्रतिगृह्णातिचातस्यदुःखदोकावहेभवेत्॥ अन्येषुमहत्सुति
लगर्भादिषुजलाभिषेकमभिधायलिंगपुराणे॥ अष्टषष्टिपलोन्मानंदद्याद्दक्षिणांगुरौ॥ होतृणांचैवसर्वेषांत्रि
शत्पलमुदाहृतं॥ अथोत्तरणांतदर्धेनद्वारपालानतदर्धतः॥ अपंचगुरुर्त्विक्जापकद्वारपालानांचअर्धदक्षिणावि
भागेअनुक्तविभागविशेषेषुदानांतरेष्वपिद्रष्टव्यः॥ गृह्यपरिशिष्टेदक्षिणालाभेमूलानांफलानांवा दानमः
॥५६७॥

णांदक्षिणांददातीति॥ अथद्रव्यमानं॥ याज्ञवल्क्यः॥ जालसूर्यमरीचिस्थंत्रसरेणुरजःस्मृतं॥ तेष्टौलिक्षास्तुता
स्तिस्रोराजसर्षपउच्यते॥ गौरस्तुतेत्रयः॥ षट्तेयवोमध्यस्तेत्रयः॥ कृष्णलःपंचतेमाषस्तेसुवर्णस्तुषोडश॥ प
लंसुवर्णाश्चत्वारःपंचवापिप्रकीर्तितं॥ द्वेकृष्णलेरूप्यमाषोधरणंषोडशैवते॥ शतमानंतुदशभिःधरणैःपलमे
वतु॥ निष्कःसुवर्णाश्चत्वारइति॥ धरणपुराणौपर्यायौ॥ तथाशतमानपले॥ स्वर्वेक्ताश्चत्वारःसुवर्णराजतोनिष्क
इति॥ कार्षिकस्ताम्रिकःपणइतिताम्रस्योन्मानं॥ पलचतुर्थांशेनकर्षोन्मितः॥ कार्षिकःस्ताम्रसंबंधीपणोभवति॥
कर्षसंज्ञश्चनिघंटौ तेषोडशमाषाःकर्षोस्त्रीपलंकर्षचतुष्टयमिति॥ तेषोडशमाषाःषोडशमाषःसरावकर्षइत्यर्थः
कर्षांपणसंज्ञश्चनारदेनोक्तंस्मृत्यंतरेपि॥ षोडशपणपुराणःपणोभवत्काकिणीचतुष्केणपंचाहतैश्चतुर्भिर्व
राटकैःकाकिनीचैकेति॥ तथाचदेशादिभेदेनपणादिव्यवहारोज्ञेयः॥ अथधान्यादिमानं॥ भविष्यपुराणे॥ पणद्वयं
तुपस्रतंद्विगुणंकुडवंमतं॥ चतुर्भिःकुडवैःप्रस्थःप्रस्थाश्चत्वारआढकः॥ आढकैस्तैश्चतुर्भिश्चद्रोणस्तुकथितोबुधैः
॥ कुंभोद्रोणद्वयंशूर्पःखारीद्रोणास्तुषोडश॥ द्रोणद्वयसेवश्चर्पइतिसंज्ञ गोपथे॥ पंचकृष्णलकोमाषस्तेश्चतुःषष्टि

दानम.

॥१५॥ निःपलं॥ पलैर्द्वात्रिंशज्जिशाद्विप्रस्थो मागधेषु प्रकीर्तितः आढकैस्तैश्चतुर्भिश्च द्रोणः स्याच्चतुराढकः॥ विष्णुधर्मोत्तरे
पलं च कुडवः प्रस्थ आढको द्रोण एव च॥ धान्यमानेषु बोधव्याः क्रमशोमी चतुर्गुणाः॥ द्रोणैः षोडशभिः खारी विंशत्या
कुंभ उच्यते॥ कुंभैस्तु दशभिर्वाहो धान्यसंख्या प्रकीर्तिता॥ विंशत्येत्यत्र द्रोणैरिति संबध्यते॥ तथा च कुंभो द्रोणद्व
यमिति पक्षाद्विंशतिद्रोणमितः कुंभ इति पक्षांतरं॥ पलसहस्रमितः कुंभ इत्यपि पक्षांतरं ज्ञेयं॥ वाराहे॥ पलद्वयं
तु प्रसृतं मुष्टिरेकपलं स्मृतं॥ अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौ तु पुष्कलं॥ पुष्कलानि च चत्वारि आढकः प
रिकीर्तितः॥ चतुराढको भवेद्द्रोण इति तन्मानलक्षणं॥ एतत्पक्षांतराणां शक्तिदेशकालाद्यपेक्षया व्यवस्था॥ उक्तश्चानी
लकेंगरव्य परिभाषाधिकं पुरा॥ दानाद्योपयिकं कुंडमंडपादि विवक्षया॥ तत्र भूमानं॥ आदित्यपुराणे॥ जालांत
रगते भानौ यत्सूक्ष्मं दृश्यते रजः॥ प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते॥ त्रसरेणुस्तु विज्ञेयो अष्टौ ये परमा
णवः॥ त्रसरेणवस्तु तेष्टौ रथरेणुस्तु संस्मृतः॥ रथरेणवस्तु तेष्टौ वालाग्रमेतत्स्मृतं तत्तु ध्रौ वालाग्राचाष्टकं
लिक्षा यूका लिक्षाष्टकं तथा॥ अष्टौ यूका यवं प्राहुरंगुलं तु यवाष्टकं॥ अन्यत्रापि॥ यूकाष्टकं यवं प्राहुर्यवा ॥५६६॥

नामुदरैस्तथा॥ अष्टभिश्चांगुलं तिर्यक् यवानामुत्तमं मतं॥ सप्तभिर्मध्यमं प्रोक्तं षड्भिः स्याद्धमांगुलमिति॥ द्वा
दशांगुलमात्रो वै वितस्तिः परिकीर्तितः॥ अंगुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते॥ तालस्मृतो मध्यमया गो
कर्णश्चाप्यनामया॥ कनिष्ठया वितस्तिस्तु द्वादशांगुलमानिका॥ रत्निरंगुलपर्वाणि विज्ञेयस्त्वेकविंशति
चत्वारि विंशतिश्चैव हस्तः स्यादंगुलानि तु॥ किष्कुः स्मृतो द्विरत्निस्तु द्विचत्वारिंशदंगुलः॥ षण्णवत्यंगुलिश्चैव ध
नुर्दंडः प्रकीर्तितः॥ धनुर्दंडयुगं नाडी ज्ञेया ह्येते यवांगुलैः॥ धनुषां त्रिशतं नल्वं आहुः संख्याविदो जनाः॥ धनुः
सहस्रे द्वे चापि गव्यूतिरपदिश्यते॥ अष्टौ धनुःसहस्राणि योजनं परिकीर्तितं॥ विष्णुधर्मोत्तरे॥ यद्युतन्त्रमपा
श्नातिनरः संवत्सरं द्विजः॥ एकं गोचर्ममात्रं तु स्तुवः॥ प्रोक्तं विचक्षणैः॥ स्मृतिः॥ दशहस्तेन दंडेन त्रिंशद्दंडनिवर्त्त
नं॥ दशतान्येव गोचर्म ब्राह्मणेभ्यो ददाति यः॥ सिद्धांतशेखरे॥ मात्रांगुलेन हस्तः स्यात्कुंडमाने शिवेदितः॥ मध्य
मांगुलिमध्यस्य पर्वदैर्घ्येण चोत्तमं॥ मात्रांगुलेन वा नेन मेखलाकंठनाभयः॥ कर्तव्याः कंठयोनिश्च यथाशास्त्र
प्रमाणतः॥ इति भूमानं॥ मार्जनखननाद्यन्यतमप्रकारेण यथोचितं भूमिसंशोध्य॥ तत्र मंडपस्थलं सिद्धांतशे॥

द्वानम·
॥२६॥

खरो स्थलादर्कांगुलोच्छ्रायं मंडपं स्थलमारिमिति॥ मंडपं प्रकल्पकपिलपंचरात्रे॥ उच्छ्रायो हस्तमात्रं स्यात्तु समे
वसुशोभनमिति॥ ततो दंडत्रयनिर्मितदीर्घत्रिकोणाकारयंत्रे दंडायाम्यां तु विन्यस्तेयंत्रमस्तकान्तिर्यग्दंडोप
रिलंबितमधोभारवद्भूमिमप्राप्तं सूत्रं यथा तिर्यग्दंडमध्यचिह्ने पतेत्तथा निम्नोन्नतं पूर्वोक्त्यावारवाननीयेत्॥
द्विशल्यसाम्बरात्मा तां समीकृत्य च मंडपाद्युपयुक्तां प्राचीं साधयेदेवं तद्दाहमदनरत्ने नारदः॥ एवं लक्षणसंयु
क्तेदेशे सम्यक्समीकृते दिक्शोधनाय तन्मध्ये समं मंडलमालिखेत्॥ पूर्वोक्तलक्षणशंकुं तन्मध्ये स्थापयेत्तत्रा॥
तच्छायाग्रं स्पृशेद्यत्र वृत्ते पूर्वापराह्णयोः॥ तत्र कार्यौ तु नेचिह्ने पूर्वापररेखयोः॥ अयमर्थः॥ समायां तु विंशद्दशां
गुलाधिकव्यासार्धमेकं तन्मध्ये चापरं नवांगुलव्यासार्धमिति वृत्तद्वयं कृत्वा तन्मध्ये द्वादशांगुलं हस्तपृथुमूलं स
स्माग्रं ऋजुं शंकुं निधाय नवांगुलवृत्तरेखायां च ततो दिक्षु॥ प्रकल्पितासु वृत्तस्तो ऋज्याः पंचदशांगुलाः शल
काः शंकवः प्रहयाः स्थाप्याः॥ शंकुसमंतात्पंता हशांकं प्रछायाचमहहतरेखां पूर्वाह्णे पत्रस्पृशति सा प्रस
क्तायत्ता परह्ने साप्राक्॥ अस्मिन्प्राचीज्ञानार्थं तु परदिनेपि तस्मिन्नेव वृत्ते शंकुछायानिर्गमप्रवेशयोश्चिह्नं

रामः
॥५६९॥

कृत्वा पूर्वापरदिनछायानिर्गम।नचिह्नयोरंतरालमिष्टैस्त्रिचतुरांशैर्भागैर्विभज्य पूर्वदिनछायाप्रवेशनिर्गमां
तरालघटीपादच्छायाघटीयंत्रादिनाज्ञात्वा तानि घटिकाभिः कल्पितान्भागानुगुणयेत्षष्टिनिघ्नं हरेत्
ततो लब्धांशेन प्राच्यामेव पूर्वदिनकृतापगमचिह्नादुत्तरायणउत्तरस्मिन्दक्षिणायने दक्षिणस्मिन्नकंपये
त्॥ तदुपरि पूर्वछायाप्रवेशचिह्नौ परिचय्यतेस्तत्वेस्तस्मा प्राची भवति दिक्ज्ञानोपायांतरं च सूक्ष्मलेकतकाव
वगः पुष्याश्विन्यास्वात्योपदंतरं॥ एतत्प्राच्यादिशोरूपंयुगमात्रोदिते सतीति॥ अत्रायं गुरूपदेशः॥ ऋज्वीस
स्मरेध्रांतलिकांकाष्टादौ बध्नात दधोयुगमात्रमुपरिगते कृत्तिकाहिनक्षत्रेनेत्रदृष्टांतलिकांतान्याप्राक्
प्रत्यग्देशयोः॥ अस्मैपाषाणद्वयमवलंबद्वयं न्यमौ प्रक्षिप्यतच्चिह्नयोः॥ प्राची स्तनेदयंडति एवमेव ध्रुवं दृष्ट्वा दी
चीसाध्या चित्रास्वात्यंतरालज्ञानार्थं तनलिकाद्वयेनैकेन च दंडांतरेण त्रयस्त्राकारं यंत्रं कृत्वा दंडं च मध्येक
येत्॥ नलिकाद्वयांतौ तु तथा तद्धृणादिना परस्परं योजनीयौ यथैकेनैव प्रयत्नेन युगपन्नक्षत्रद्वयमपि दृश्य
ते॥ एवं दृष्ट्वा मिलितान्नलिकाद्वयांताडुमध्यां काष्ठपाषाणावपलंबौ प्रक्षेप्याविति॥ अथ मंडपारिलस्यां

॥२७॥ तत्र पंचरात्रे कनीयान् दशहस्तस्याम् मध्यमो द्वादशोन्मितः। तथा षोडशभिर्हस्तैर्मंडपस्यादुत्तमः। प्रतिमासारसंग्र
हे मंडपः कलाहस्तो वा सर्वलक्षणसंयुतः। दशद्वादशहस्तो वाद्विद्विवृध्यात्ततः क्रमात्। लिंगपुराणे तुलापु
रुषदानप्रकरणे। विंशद्धस्तप्रमाणेन मंडपं कल्पयेद्बुधः। अथवा द्वादशहस्तेन कलाहस्तेन वा पुनः इति
वचनेन तुलादानादौ षोडशविंशतिहस्तौ मंडपाविकल्पेनोक्तौ। मध्यस्तंभवलिकोपरिगतैश्चतुर्भिरिष्ट
भिर्वाग्निद्वंगाकारकलशास्तोतैः काष्ठैर्मध्ये शिखराकारस्तुतः कूटं। कूटो स्त्री शिखरं श्रृंगं इत्यभिधानानुसारा
त् मध्यस्तंभोपरि समंतयाच्छादितां मंडपः इति हेमाद्रिः। संप्रति तु कुंडएवादृशो लोकामांतत्रैव च मंडपा-
न्तेमः। द्वादशहस्तमंडपस्तु एकमेखलकुंडपक्षे एकाग्निविधानपक्षे चोपयुक्तो भवतीति मदनरत्ने। पंच
रात्रे कुर्याद्दैमवयागेषु चतुर्द्वारांश्च मंडपान्। सारदारुमयान् स्तंभान् द्वादश कुर्याद्विजन्मसमान् मंड
पाद्वीस्थितान्वेदसंख्यांश्चूडासमन्वितान्। वलिकान्धर्तत्तेषांस्तंभान् द्वादशकं पुनः। बाह्यपादप्रमाणेन
तत्र सूत्रविधानतः। कल्पयेद्विकरं चतुरंगुलवर्द्धितं। मध्यमोत्तमयोर्वेदीमंडपस्य त्रिभागतः। चतुर्थांशोच्छ्रि रामः

॥५७०॥

तिस्तस्यास्त्रिसप्तपंचतोपि वा नवैकादशद्वादशहानं वा इष्टकाभिः प्रकल्पयेदिति। चूडाशिखावलिकामिति तेषां चतुःस्तं
भानां शिखाभिर्वेतश्छिद्रा एपमयतच्छिद्रद्वयोपेतानि वलिकाख्यानिति यत्काष्ठानि विधेयानीत्यर्थः। ब
बाह्य इत्यादि। आदौ मध्यस्तंभचतुष्टयं विन्यस्य तद्बाह्यपरिधौ मंडपक्षेत्रविस्तारपर्यायपीवपरिमितसूत्रतृ
तीयांशेन तुल्यांतरद्वादशचिह्नकरणपूर्वकं पंचहस्तप्रमाणा द्वादशस्तंभा निखेया इत्यर्थः। तदेवं षोडशा
स्तंभाः संपद्यंते। तेषु चत्वारो मंडपायामार्द्धमितोच्छ्राया अष्टहस्ता नवहस्ता वा भवंति। अथ मध्यमोत्तमरूपेष्व
ष्टहस्ताः एते चत्वारः। तथा च शारदातिलके षोडशस्तंभसंयुक्तं चत्वारस्तेषु मध्यगाः। अष्टहस्तसमुच्छ्रायाः सं
स्थाप्या द्वादशान्यतः। पंचहस्तप्रमाणास्ते निश्छिद्राः कृजवः शुभाः। तत्रापि स्तंभेषु चूडास्त्वेवतिर्यक्काष्ठनि
वेशनं बाह्येषु तु चूडासुस्तंभकर्षेपि वेत्यनियमः। सर्वेषां च पंचमांशेन्यसेद्भूमौ सर्वसाधारणो विधिरिति। कृत्वा तत्स्त
त्रं पंचमांशेन निखेया। सर्वेपि दशांगुलसूत्रवेष्टनयोग्यस्थौल्या विधेया। कल्पयेदित्यादि कनिष्ठमंडपे द्वार
चतुष्टयं द्विहस्तविस्तारं। तथा मध्यमे चतुरंगुलाधिकद्विहस्तविस्तारं। एवमुत्तमेष्टांगुलाधिकद्विहस्त

हानम.

॥२६॥

विस्तारं वेदी स्यादि॥ मंडपस्य त्रिभागमाना वेदिः॥ स्वायामत्तृतीयचतुर्थपंचमसप्तमनवमैकादशान्यतमेनोच्छ्रि
ता पुरुषे तु मात्स्ये॥ सप्तहस्ता नवे देहीमध्ये पंचकरा यवेति॥ सिद्धांतशेखरे चतुःकोणा वेदी सर्वफलप्रदा
तडागादिप्रतिष्ठायां पद्मिनी पद्मसन्निभा॥ राज्ञः स्यात्सर्वतोभद्रा चतुर्भद्राभिषेचने विवाहे श्राधरी वेदी वि
ख्यातपत्रसमन्वितेति॥ द्वारदेहल्या बहिर्हस्तमात्रे द्वारशाखा निवेश्या॥ इति निबंधांतरे॥ व्रतखंडे तु हस्तद्वयं
बहिस्त्यक्त्वा तोरणानि निवेशयेदित्युक्तं॥ मात्स्ये॥ द्वारेषु कार्याणि च तोरणानि चत्वार्यपि क्षीरवनस्पतानामि
ति॥ स्वयमर्थः॥ पूर्वद्वारे अश्वत्थशाखा॥ दक्षिणे उदुंबरशाखा॥ पश्चिमे प्लक्षशाखा॥ उत्तरतो वटशाखा॥ तदुक्तं वि
श्वंभरवास्तुशास्त्रे॥ अश्वत्थोदुंबरप्लक्षवटशाखाकृतानि तु॥ मंडपस्य प्रतिदिशं द्वाराण्येतानि कारयेत्॥ पंचहस्त
प्रमाणानि तु विस्तारेण द्विहस्तकाः॥ षडंगुलानि खाताः सप्तहस्ताय योत्तमं॥ विस्तारेण तिर्यक्फलका मानं
तोरणस्तंभानामधिकृतस्त्वाशारदातिलके॥ दशांगुलप्रमाणेन तत्परीणाह ईरितः॥ परिणाहो विशालता॥ शाखा
स्वाधमसमध्यमोत्तममंडपेषु क्रमात् पंचषट्सप्तहस्तोच्छ्रायास्तासु परिक्षतचूडासु तिर्यक्फलमुन्नयतः स रामः

॥५१२॥

छिद्रं चूडानां तच्छिद्रं निदध्यात्॥ तत्र द्विहस्तमध्ये मंडपे॥ अंगुलषट्काधिकं द्विहस्तं मध्ये॥ सार्द्धहस्तद्वयमुत्तमे
तिर्यक्फलकोपरि मध्ये मंडपेषु क्रमात् चतुरंगुला॥ सार्द्धचतुरंगुला॥ पंचांगुला पीठिका ज्ञा निवेश्या॥ तिर्यक्
फलकं कीला अश्वत्थकाष्ठजा एवं यद्वा वास्तुशास्त्रे॥ मस्तके द्वादशांशोन्नतेशो शंखचक्रगदांबुजं॥ प्रागादिक्रमयो
गेनन्यसेत्तेषां स्वदारुजं॥ द्वादशांशो त्र फलकस्य चतुरंगुलादिरेवोक्तः॥ शंखचक्रगदांबुजाकारकरणं वैष्ण
वयागविषयं॥ शैवयागे तु ते कीला त्रिशूला॥ सुत्रिशूलाकारत्वं चैवं॥ मध्यकीलोनवांगुलोच्चः सपादश्यंगु
लविस्तारः॥ तन्मुन्नयतो न्यौ किंचिदूनौ॥ दैर्घ्यमध्ये शूलस्य मूलांगुलद्वयं बिले प्रविशति॥ इतरमंडपे मध्य
मे तेकादशांगुलउच्छ्राय॥ पादोनत्र्यंगुविस्तारः त्र्यंगुले बिलप्रवेशः॥ उत्तमे त्रयोदशांगुलमुच्छ्रायः सपादत्र्यंगु
लो विस्तारश्चतुरंगुलो बिलप्रवेशः॥ इदं च पिंगलमते॥ शूलेन चिह्निता कार्या द्वारशाखा वास्तुमस्तके॥ शूले न
वांगुलैर्दैर्घ्यं तुरीयांशेन विस्तृतिः॥ ऋजु वै मध्यशृंगं स्यात् किंचिद्वक्रं च पक्षयोः॥ अथ मंतस्मारव्यातं द्व्यंगुलंरोप
ये तत्पेता दिनोक्तं एषामलाभे एकद्व्यादिजानि तोरणानि॥ तस्याप्यलाभे ग्रामीडुमजानि एतत्रि वेशानमैत्राश्चाग्नि

दानम:

॥१९॥

मीलनइषेत्वाच्चया आयादिशान्नोदेवीरित्सनुसंधेयाः॥ मध्यस्तंभचतुष्टयोपरिस्थितुराजाकृतिकाष्टे दिग्विदिगंतरं
ध्राष्टकशीताग्रकाष्टाष्टकेनोवृतता कार्या॥ कटैःसद्भिस्तु संछाद्या विजया द्यास्तु मंडपाःस्मृक्तात्॥ द्वारवंशैर्विव
तोमंपञ्चाछाद्याः॥ जयविजयभद्रविश्वरूपसुरूपध्रुवधनधन्वकसुप्रसन्नाः॥ एते ष्टहस्तादयोद्विहस्तवृद्धितो
ज्ञातव्याः॥ यदामंडपद्वयं क्रियते तदा तत्र प्रथमं मंडपपरिमितरज्जुस्त्यज्य द्वितीयो मंडपः कर्तव्य इति वास्तुशास्त्रे
एवं यदा धामाग्रे मंडपः क्रियते तदा तद्धामपरिमाणमंतरमुत्सृज्य परतो मंडपो विधेय इति॥ मात्स्ये मंडपे पताका
उक्ताः॥ लोकेशाः वर्णाः परितः पताका मध्ये ध्वजः किंकिणीकायुतः स्यात्॥ इति संग्रहेपि॥ सप्तहस्ताः पताकास्युः सप्त
मांशेन विस्तृताः॥ लोकपालानुवर्णेन नवमा तुहित प्रभा॥ पीतरक्तादिवर्णो द्विपंचहस्तो ध्वजा स्मृता॥ द्विपंचह
स्तैर्दंडैश्च वंशजैः संयुतास्तथेति॥ लोकपालवर्णाः॥ इंद्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः॥ कुबेरस्तु सुवर्णा
भो ह्यग्निश्चापि सवर्णकः॥ तथैव निरृतिः श्यामो वायुर्धूम्रः प्रशस्यते॥ ईशानस्तु भवेद्रक्त एवं ध्यायेत्क्रमाद्दिमा
न्न गारुडे तु पताकानां प्रकारांतरमुक्तं॥ पंचहस्तध्वजाः कार्या वैपुल्येन द्विहस्तकाः॥ सप्तहस्ता पताकास्तु विं

राम:

॥५७२॥

शत्यंगुलविस्तृताः॥ दशहस्ताः पताकानां दंडपंचाशवेशिताः॥ सिंदूराः कर्बुरा धूम्रा धूसरा मेघसन्निभाः॥ हरिता पां
डुवर्णाश्च धुवाः पूर्वादितः क्रमात्॥ एवं वर्णाः शुभाः कार्याः पताका पाकशासनेति॥ अत्र समचतुरस्रमंडपसाध
नं मंडपादिव्याससमप्रमाणां रज्जुं द्विगुणीकृत्य तन्मध्ये नयतः पाशाभ्यां सप्तदशजा विभज्य पंचमांशांते कर्षणपषष्ठं
शांते वा कर्षं च चिन्हद्वयं कृत्वा मंडपादे प्राचीसूत्रप्रांतद्वये शंकुद्वयं निखाय रज्जुं तयाशैतयोः॥ शंकोराःसज्य
कर्षणचिन्हं दक्षिणत आकृष्य शंकुचिन्हे शंकुं निखाय ततः कर्षणचिन्हमुत्तरत आकृष्य शंकुचिन्हे शंकुं निखा
य व्यत्यासेन वा शंको॥ पाशांता वासज्य पूर्ववद्दक्षिणोत्तरयोः॥ क्रमेण कर्षणचिन्हं आकृष्य शंकुद्वयं निहन्यात्
एतैः तच्छानाद्येयादिशंकुषु पूर्वदक्षिणपतरज्जुवेष्टनान्मध्यादि चतुरस्रक्षेत्रं सिद्धं भवति॥ मध्यवेदीसाधने॥ मंड
पस्त्रं त्रिभागायतं दक्षिणोत्तरायतं च त्रेधा विभाज्य तेन नवभागो मंडपः संपद्यते॥ मध्यमेतत्त्वमेशैतन्मानावेदि
का यजमानहस्तोच्छ्राया च विधेया॥ मात्स्ये द्वारेषु कुंभद्वयमत्र कार्यं सुगंधधूपांबररत्नयुक्तमितिमदनरत्ने
गंधपुष्पाक्षतोपेतान् कुंभांस्तेषु निवेशयेत्॥ ध्रुवं धरं वा कपितिविघ्नेशा तेषु पूजयेत्॥ मंडपस्य तु कोणेषु कलशे

दानम.
॥ २०॥

हुतकर्मारम्भो। चम्पतो ह्युर्जयश्चैव मित्रार्थमिदं उक्तस्तथा॥ पूज्या वारस्तु कुंभेषुराकाद्यास्तु नूमन्तृत्तमेमनुर्मन्त्रः॥ इतिमंड
पनिरूपणं॥ अथ कुंडानि॥ तत्र भविष्यत्पुराणे॥ वेदीपार्श्वांतरं कृत्वा कुंडानि नव पंच वा॥ वेदासाणे वतानिस्तु व
र्तुलान्यथवा क्वचित्॥ न्यायरहस्ये॥ कुंडानि चतुरस्राणि वर्तुलानि कृतानि वा॥ नव पंचाथ चैकं वा कर्तव्यं लक्ष
णान्वितं॥ नवकुंडविधाने तु दिक्षु कुंडाष्टके स्थिते॥ नवमं कारयेत्कुंडं पूर्वेशानदिगंतरे॥ विधाने पंचकुंडानामीशा
ने पंचमं भवेत्॥ अत्र चतुःकुंडीपक्षे खातं नास्तीत्यकं देमाढौ नारदीये॥ यत्र षोडशपते कुंडस्य चतुष्कं तत्र कर्मणि॥ वि
हास्त्रमर्धचंद्रं च वृत्तं पद्मनिभं तथा॥ पाववड्डयेत्कुंडं सुमार्गो घगर्तकं॥ कुर्यात्कुंडानि चत्वारि प्राच्यादिषु विचक्ष
णः॥ कुंडवेद्यंतरं चैव सपादकरसंमितं॥ विशंगुलं प्रकर्तव्यं मध्यंतरं कुंडपार्श्वयोः॥ स्मृत्यंतरे वेदीत्रित्रिपरित्यज्यत्र
योदशांगिरंगुलैः॥ हस्तमात्राणि कुंडानि चतुरस्राणि सर्वत इति सर्वतोदिक्षु॥ काम्येतु ऐंद्र्यास्तंभे चतुष्कोणं त्र
यो भागे भगाकृति चंद्रार्धं मारणे याम्ये त्रिकोणं द्वेषणे ऋतौ॥ वारुणं पद्मशांतिकं वृत्तं षडस्रमुच्चाटने निर्ऋते॥ उदीच्यां पौ
ष्टिके पद्मं रौद्रं सामष्टास्त्रं मुक्तिदं॥ शारदातिलके॥ विप्राणां चतुरस्रं स्यात्राज्ञो वृत्तमिष्यते॥ वैश्यानामर्धचंद्रं रामः ॥५१३॥

शूद्राणां त्र्यस्रमीरितं॥ चतुरस्रं च सर्वेषां केचिदिच्छंति तांत्रिकाः॥ चतुरस्रसाधनं तु मंडपसाधनावसरउक्तं प्रक
रांतरमाह विश्वकर्मा॥ कृत्वा प्राक्सूत्रमर्धार्कं दक्षिणोत्तरमस्य यो॥ न्यस्य सूत्रं ततः कोणे रंकिते चतुरस्रकं॥ तत्रै
कस्मिन्हस्ते चतुर्विंशत्यंगुलानि व्यासः॥ द्वयोस्त्रयस्त्रिंशदंगुलानि सप्त यवाः॥ चतस्रो यूकाः॥ द्विलिक्षे त्रिष्वेक
चत्वारिंशदंगुलानि चत्वारो यवाः॥ चातस्रो यूकाः॥ चतस्रो लिक्षाः॥ चतुर्षु अष्टाचत्वारिंशदंगुलानि॥ पंचसु त्रिपंच
शदंगुलानि पंच यवाः॥ द्वे यूके पंच लिक्षाः॥ षट्सु अष्टपंचाशदंगुलानि षट्यवाः॥ द्वे यूके चतस्रो लि
क्षाः॥ सप्तसु त्रिषष्ट्यंगुलानि यवत्रयं सप्त यूकाः॥ सप्त लिक्षाः॥ अष्टसु सप्तषष्ट्यंगुलानि सप्त यवाः॥ लिक्षाश्चतस्रः॥
नवसु द्विसप्तत्यंगुलानि॥ दशसु पंचसप्तत्यंगुलानि सप्त यवाः॥ एका यूका तिस्रो लिक्षाः॥ एवं षोडशहस्ते षण्णवत्यंगु
लानि॥ अथ योनिकुंडं॥ इष्टचतुरस्रव्यासं चतुर्विंशतिधा विभज्य सपादैः पंचभिर्भागैः॥ मध्यस्त्रं प्राच्यां विव
र्धचतुरस्रमध्ये प्रागुदक्सूत्रपातजातोपरितनात्स्यचतुरस्रयोः कोणसूत्रद्वयपातजातमध्यादेतत्कोण
सूत्रार्धमानेन चतुरस्रोदक्सूत्रदक्षिणांततः प्राक्सूत्रपश्चिमां मंयावत्त्र्यंमये तहृत्तार्धे॥ एवमेवेतरास्यचतु

दानमः
||२१||

स्रेपि इष्टचतुरस्रो दिगंतात् प्राकूसूत्रं पश्चिमांतं परिभ्राम्य वृत्तार्द्धद्वयं दक्षिणोत्तरकोटितो वर्द्धितप्राकूसूत्रांतं या
वत्सूत्रद्वयं पातयेदिति योनिकुंडं तथा चत्वारः ||तिलके|| चतुरस्रीकृतं क्षेत्रं पंचधा विभजेत्सुधीः || न्यसेत्तु
रस्रादेकांशं कोणद्वीद्धिप्रमाणतः || भ्रामयेत्कोणमानेन तत्पार्श्वादपि मंत्रवित् || सूत्रयुग्मं ततो दद्यात्कुंडे यो
निनिभं भवेत् || अत्रोपपत्तिः प्राग्दर्शितं अत्र लंबः सप्तदशांगुलानि || १७ || एको यवः || १ || यूका एका || १ || लिख्याः ५
|| अत्र तु इष्टचतुरस्रमध्योदकसूत्रं चतुर्विंशत्यंगुलं उपरितनास्मत्रेपि || सैव लंबस्तु द्वादशांगुलानि वृत्ता
र्द्धव्यासार्द्धयोस्तु चांगुलानि अष्टौ || ८ || यवाश्चत्वारः || ४ || इति योनिमध्यसूत्रे द्व्यंगुलानि एकहस्ते पंचांगुलानि
एको यव एका यूका पंच लिक्षाः || द्विहस्ते सप्तांगुलानि द्वौ यूकौ एका लिक्षा || त्रिहस्ते अष्टावंगुलानि || ८ || सप्त यवाः तिस्रो
यूकाः || चतुर्हस्ते दशांगुलानि चत्वारो यवाः || तिस्रो यूकाः || द्वे लिक्षे पंचहस्ते एकादशांगुलानि यवचतुष्टयमेका
यूका || षड्हस्ते द्वादशांगुलानि चत्वारो यवाः सप्त यूकाः तिस्रो लिक्षाः || सप्तहस्ते त्रयोदशांगुलानि पंच यवाः || अष्टह
स्ते चतुर्दशांगुलानि यवचतुष्टयं यूकाश्चतस्रः द्वे लिख्ये नवहस्ते पंचदशांगुलानि || यवत्रयं यूकाचतुष्टयं सप्त

रामः
||५१४||

लिख्याः || दशहस्ते षोडशांगुलानि द्वौ यवौ तिस्रो यूकाः तिस्रो लिख्याः || एवं षोडशहस्ते विंशत्यंगुलानि यवचतुष्टयं ष
ड्यूकाः चतस्रो लिक्षाः || रामस्तु इष्टचतुरस्रक्षेत्रमध्यरेखाया द्विनवत्यधिकं शतमंशाः चक्रं त्वा अष्टत्रिंशद्भागान् म
ध्यसूत्रे प्राच्यां एकोनविंशद्दशौ भागान्न्यसेत् || श्रोणिं संवर्ध्य सहद्विश्रोणि चतुर्थांशिकं कर्कटेन सूत्रेण वा पश्चिम
भागे वृत्तार्द्धद्वयं प्राक्तु रवश्रोणिः || सूत्रजन्त्वं विलिख्य दशार्द्धद्वयवाद्यप्रांतयोर्वर्द्धितप्राकूसूत्रे चिह्नया कु
सूत्रद्वयेन योन्याकारं कार्यमित्याह || तत्फल संवादे पि विरूपत्वादयुक्तं || इदं चोदगग्रं कार्यं तत्र मध्यरेखा पंचमांश
द्वाबुदीच्यां कृतायां भवति || इदमुदाहृतं मदनरत्ने सिद्धांतशेखरे || योन्याख्यमुच्यते कुंडं आग्नेय्यां तु नराधु
र्वमिति || अपार्द्धचंद्रमाने || तदुक्तं शारदातिलके || चतुरस्रीकृतं क्षेत्रं दशधा विभजेद्बुधः || एकमेकं त्यजेद्दशमध
र्द्धं च ततो भवेत् || ज्यासूत्रं पातयेद्द्येतन्मानात्तल्लामयेत्ततः || अर्द्धचंद्रं निभं कुंडं रमणीयमिदं भवेदिति || अयम
र्थः || इष्टप्रमाणचतुरस्रमध्यरेखां दशधा विभज्य भागौ परित्यज्य तत्र चिह्नद्वयं कृत्वोपरि चिह्नेति
र्यक्दक्षिणोत्तरं सूत्रं दत्वोपरिचिह्नाध प्रक्रिया वहते नसूत्रेण कर्कटेन वा भ्रमाहृत्तार्द्धं ज्यासूत्रजातको

दिकमर्द्धचंद्रकुंडं कुर्यादिति। अर्द्धे दीर्घव्यासार्द्धंगुलानि एकस्मिन्नेकोनविंशत्यंगुलानि। एकोयवः। एका
यूका पंचलिख्याः। द्वयोः सप्तविंशत्यंगुलानि पंचयूका द्वे लिख्ये। त्रिषु त्रयस्त्रिंशदंगुलानि। एकोयवः। द्वे यूके ष
ड्लिख्याः। चतुर्षु अष्टात्रिंशदंगुलानि द्वौ यवौ। तिस्रो यूकाः। द्वे लिख्ये। पंचसु द्विचत्वारिंशदंगुलानि सप्तयवाः।
यूकाश्चतस्रः तिस्रो लिख्याः। षट्सु षट्चत्वारिंशदंगुलानि। सप्तयवाः। द्वे यूके सप्तसु पंचाशदंगुलानि। पंचय
वाः। द्वे यूके च तस्रो लिख्याः। अष्टसु पंचाशदंगुलानि एकोयवः। द्वे यूके तिस्रो लिख्याः। नवसु सप्तपंचाशदंगुला
नि चत्वारो यवाः। दशसु षष्ट्यंगुलानि चत्वारो यवाः। एवं षोडशसु षट्सप्तत्यंगुलानि। पंच यवाः। अत्रत्रा
मेण चतुरशीत्यधिकत्रिंशत्या विभक्तस्य दृष्टक्षेत्रव्यासस्यैकोंशोधिकस्तोऽयं। क्षेत्रफलसंकरार्थमित्युक्तं
सचैकांशः दृष्टक्षेत्रव्यासचतुर्विंशांशस्य षोडशांशो भवति। एकहस्तचतुरस्रोर्द्धयवमितः। एवं द्विहस्तादि
ष्वप्यूह्यं इदं चोदयं कार्यं तदुक्तं मदनरत्ने उदगग्रं त्वं चोदय ध्यरेखायाः दशधा विभागेन संपादनीयमिति
यत्तु कामिके चतुरस्रे यद्दैर्घ्यक्तं तस्मायतौ तदंशकौ। मध्ये सप्तांशमानेन कुंडं खंडेंदुवत्। समादिति। अत्रेद राम:
।।५७५।।

यात् क्षेत्रफलविसंवादः। पूर्वोक्तशारदातिलकोक्तं त्वल्पं। अथ त्रिकोणं इष्टचतुरस्रमध्यसूत्रस्य चतुर्विंश
तिरंशाः। तत्र सूत्रे प्राच्यां एकांशस्य षोडशांशाः सद्वितानसार्द्धसमांशानुश्रोणिचपार्श्वयोः प्रत्येकं सपादान्
षडंशान्नं वा ध्यंवर्धितश्रोण्यंतयो वृद्धितिषा कतत्रांतं यावस्सत्र दयेदत्ते सममत्रुजं त्र्यस्रि भवति। यथोक्तं शार
दातिलके। चतुर्दशभाजिते क्षेत्रे न्यसेद्गुनयपार्श्वयो। एकैकमंशं तन्मानादयतो लांछयेत्ततः। सूत्रत्रयं बुधः कु
र्यात् त्र्यस्रं कुंडमुदाहृतमिति इदं तु किंचित्फलव्यभिचारित्वतो न्यामिरधिका वृद्धिरुक्ता। राममते तु मध्यसूत्रं द
शाभिरंशैः संवर्ध्यतत्रैकोंशः स्वाष्टमांशोनः श्रोणिसूत्रस्योभयतः पंच पंचांशा वृद्धिरिति तत्तु विषमभुजत्वादुपे
क्ष्यं इदं च निर्ऋतौ प्रागग्रं पश्चिमयोनित्र्यस्रभुजा। एकस्मिन् षट्त्रिंशदंगुलानि चत्वारो यवाः। द्वयोरेकपंचाश
दंगुलानि पंचयवाः। त्रिषु त्रिषष्ट्यंगुलानि। एकोयवः। चतुर्षु त्रिसप्तत्यंगुलानि पंचस्वेकाशीत्यंगुलानि चत्वारो
यवाः। अष्टसु नवोत्तरशतांगुलानि एकोयवः। नवसु नवाधिकशतांगुलानि। यवत्रयं। दशसु पंचदशाधिकश
तांगुलानि यवद्वयं। अथ वृत्तं कर्णाद्यष्टांशासंपाताद्वृत्तं कुंडमिहोदितमिति। अयमर्थः। कर्णार्द्धस्याष्टमांशो

गुलद्वयं यवाधिकमेकहस्ते तस्य सम्यक् न्यासं त्यागं कृत्वा वृत्तिः पयवत् सूत पंचदशांगुलात्मकव्यासार्द्धेन वृत्तं कुं
डं भवति। ग्ररदातिला केचिन्मूष्टादशोरेरेखे त्वेशं न्यसेदेकं बहिर्बुध। यामये तेन मानेन वृत्तं कुंड मनुत्त
ममिति चक्रेऽन्य यत्रापि क्षेत्र मूल विसंवादो बोध्यः। एकोत्रास्य पंचविंशांशासहितव्यासषोडशांशाधिकव्या
सार्द्धमितकर्कटेन सूत्रेण वा कृतं मंडलं वृत्तकुंडं तच्च प्रागग्रं पश्चिमयोरेकोने विंशत्यंगुलानि एकोयवः त्रिषु
निपतीच्यां कार्यं। तत्र वृत्तव्यासा द्वीगुलानि। एकस्मिन् योदशांगुलानि यवचतुष्टयं द्वयोरेकोने विंशत्यंगुलानि एको
यवः। त्रिषु त्रयोविंशत्यंगुलानि यवचतुष्टयं चतर्षु सप्तविंशत्यंगुलानि। एकोयवः। पंचसु त्रिंशदंगुलानि द्वौय
वौ। षट्सु त्रयस्त्रिंशदंगुलानि एकोयवः। सप्तसु पंचत्रिंशदंगुलानि। द्वौयवौ नवसु चत्वारिंशदंगुलानि पंच
यवाः। दशसु द्विचत्वारिंशदंगुलानि पंचयवाः। दशासु द्विचत्वारिंशदंगुलानि सप्तयवाः। अथ षडस्रं इष्टचतु
रस्रमध्यस्तत्रस्य चतुर्विंशतिरंशान् कृत्वा तस्तत्रिभिरंशैः प्राच्यां वर्द्धयेत् तत्रैकोशः स्वाष्टमांशोनः। तावत्प्र
तीच्यां संवर्ध्यातदर्द्धेन वृत्तं कृत्वा तावते वकर्कटेनो दाचिमारभ्य षट्सु स्थानेपु न्यंकयेदिति। अत्रैकहस्ते ता

वदेवं फलं। मध्ये दीर्घचतुरस्रांत द्वीर्घभुजः। पंचविंशत्यंगुलानि। षट्यवाश्च। एवमन्येपि। अस्य भुजस्तु च
तुर्दशांगुलानि सप्तयवाः। सप्त यूकाश्च तत्र फलं पंचाशीत्यधिकात्रिशतत्रयमंगुलानि। चतुरस्रदीर्घभुजसं
लग्ने त्र्यस्ते तु दीर्घभुज एव भूः लंबस्तु वृत्तचतुर्थांशः सप्तांगलं वा। पंचयूकाश्चेति तत्फलं पंचनवत्यंगुला
नि चत्वारो यवाश्च। अपर त्र्यस्त्रेप्येवं। फलत्रययोगे पंचशतानि षट्सप्ततिश्च यत्तु विष्णुमूर्तिं चित्तिवत्कुणि
:फलसंवादपि त्र्यस्त्रहृयपयोगेन बहिर्निर्गतास्ति कंषडस्रं मुक्तं तदयुक्तं। अंतरबाह्यात्र योगेन यादृश्या
तादृशात्तु जतापत्तेः। बहिस्त्रिनाए वास्मातां तर्गता इति चेत्। तथापि वक्रभुजतायां नानानाभाव: चतुरस्त्र
त्वाद्य वपिफलसंवादेन कदाचिन्नयापत्तेश्च। एतेन रामाद्युक्तमपि प्रत्युक्तं। षडस्त्रे भुजांगुलानि एकह
स्तादिक्रमेणादशहस्तपर्यंते चतुर्दशांगुलानि। सप्तयवाः। एकविंशत्यंगुलानि। पंचविंशत्यंगुलानि। ष
ट्यवाः। एकोनत्रिंशदंगुलानि षट्यवाः। त्रयस्त्रिंशदंगुलानि द्वौयवौ। षट्त्रिंशदंगुलानि यवचतुष्कं। ए
कोनचत्वारिंशदंगुलानि यवत्रयं। द्विचत्वारिंशदंगुलानि एकोयवः। चतुश्चत्वारिंशदंगुलानि पंचय

दानमः ॥२४॥

वाः सप्तचत्वारिंशदंगुलानि एकोयवः॥ अथ पद्मं॥ इष्टचतुरस्रमध्यस्तत्रस्य चतुर्विंशतिरंशाः तत्र ग्रहदशाति
रंशैरेकं वृत्तं कृत्वा तद्परिधिस्थांशपंचमांशाधिकान् सार्धान् त्रिनंशान् समवध्याय परं कृत्वा तत्र दिक्षु विदिक्षु तदं
तरालेषु च मत्स्यानुत्पादयेत्॥ ततो तद्वृत्तरेखा प्रान्तस्तत्र मत्स्यान्तरे कांतरितमत्स्याग्रसूत्रद्वयं त्रिकोणान्स्फा
लयेत्॥ तदंतरालमत्स्यसमसूत्र बहिर्वृत्तरेखागतमत्स्यपावतत्तद्वैकसूत्रं समांशतयामध्यंकयित्वा सूत्रा
ई मितकर्कटकोटिमेकां मध्यांके परां च सूत्रारंभकमत्स्यसंस्थाप्य त्रिकोणमध्ये भ्रमणादेकं मत्स्यं बहिर्वृत्त
रेखागं तत्रिकोणांतस्तस्मादेव च सूत्रात् कर्त्रिकोणाद्बहिरपरं मत्स्यं कृत्वा तन्मत्स्यात् त्रिकोणाद्बहिः परिसूत्रा
ईज्याकमेकं बहिर्मत्स्यात् त्रिकोणांतरं धः सूत्राईज्याकमपरमिति संलग्नकोटिकमुपर्यधोनविनच धनुर्द्व
यं कर्या एवमपरसूत्रेपिकृत्वा सूत्रद्वयमार्जने वक्रायं पद्मदलवत्पत्रं भवति॥ एवमन्यापि पत्राणि कृत्वा इ
ष्टचतुरस्र कल्पितचतुर्विंशाम ध्ये त्रिभिः शैव्यासार्धेनमध्ये तद्बहिश्च षडंशव्यासार्धेनेति वृत्तैकायोत
यांतवृत्ते विस्तारे तद्वृत्ते नोद्यतायांतद्व्यासेन समाम्रदा कर्णिका कार्या बहिर्वृत्ते तु केसराइति तत्पाच्च

रामः ॥५११॥

॥ कामिके॥ चतुरस्रांष्टभागेन कर्णिका स्याद्विभागशः॥ तद्बहिस्त्वेकभागेन केसराणि प्रकल्पयेत्॥ तृतीये दलम
ध्यानि चतुर्थे दलकोटयः॥ भ्रमणात्पत्रकुंडस्य द्वाभ्यां दर्शयेद्बहिरिति॥ विभागशः सर्वदिग्भागे क्षिप्त्वा पी॥ भ्रमणाद्वृ
त्तस्येति शेषः॥ एकहस्ते चतुर्थमहवृत्तव्यासार्धं पंचदशांगुलानि॥ १५ पंचापलाः॥ तिस्रो यूका॥ तिस्रो लिक्षा॥ ३ द्वे
वालाग्रे॥ २ द्विहस्ते द्वाविंशत्यंगुलानि॥ २२॥ एकोयवः॥ १॥ तिस्रो यूका॥ ३॥ एका लिक्षा॥ त्रिहस्ते सप्तविंशत्यंगुलानि
॥ २७॥ एकोयवः॥ १॥ एका यूका॥ १॥ द्वे वालाग्रे॥ २॥ चतुर्हस्ते एकत्रिंशदंगुलानि॥ ३१॥ द्वौ यवौ॥ २॥ षड्यूका॥ ६॥ षट्
लिक्षा॥ ६॥ चत्वारि वालाग्राणि॥ ४॥ पंचहस्ते पंचत्रिंशदंगुलानि॥ ३५॥ ०॥ तिस्रो यूका॥ ३॥ षड्लिक्षाः॥ ६॥ पंच वालाग्रा
णि॥ ५॥ ६ हस्ते अष्टत्रिंशदंगुलानि॥ ३८॥ यवत्रयं॥ ३॥ एका यूका॥ १॥ द्वे वालाग्रे॥ २॥ सप्तहस्ते एकचत्वारिंशदंगुला
नि॥ ४१॥ यवत्रयं॥ ३॥ सप्त यूका॥ ७॥ अष्टहस्ते चतुःचत्वारिंशदंगुलानि॥ ४४॥ द्वौ यवौ॥ यूका षट्॥ ६॥ षट् लिक्षा
॥ ६॥ नवहस्ते सप्तचत्वारिंशदंगुलानि॥ ४७॥ द्वौ यवौ॥ २॥ तिस्रो लिक्षाः॥ ३॥ दशहस्ते एकोनपंचाशदंगुला
नि॥ ४९॥ पंच यवाः॥ ५॥ चतस्रो यूका॥ ४॥ सप्त लिक्षाः॥ ७॥ द्वयं एकं वालाग्रं॥ १॥ पंचरथरेणवः॥ ५॥ षट् त्रसरेणवः

॥६॥ त्रयः परमाणवइतिन्हत्त्वत्तृतीयत्त्राष्टमांशास्यन्यास्तूपासाचैकहस्तादिक्रमेणदशहस्तोतेनवांगुलानि
र्यि। एकोयव॥१॥ तिस्रो यूका॥३॥ षट् लिक्षा॥६॥ त्रीणि वालाग्राणि॥३॥ द्वादशांगुलानि॥१२॥ यव॥७॥ यूका॥७॥ लि-
क्षा॥२॥ पंचदशांगुलानि॥१५॥ यव॥७॥ यूको॥२॥ लिक्षा॥०॥ वालाग्र॥४॥ अष्टादशांगुलानि॥१८॥ यव॥३॥ यूका॥०॥ लिक्षा
॥४॥ वालाग्र॥ एकविंशत्यंगुलानि॥२१॥ यव॥४॥ यूका॥१॥ लिक्षा॥३॥ वालाग्र॥२॥ द्वाविंशत्यंगुलानि॥२२॥ यव॥३॥ यूका॥७॥
लिक्षा॥६॥ वालाग्र॥६॥ चतुर्विंशत्यंगुलानि॥२४॥ यव॥३॥ यूका॥२॥ वालाग्र॥३॥ पंचविंशत्यंगुलानि॥२५॥ य॥७॥ यूका॥६॥ लि-
क्षा॥४॥ सप्तविंशत्यंगुलानि॥२७॥ यव॥४॥ यूका॥२॥ लिक्षा॥३॥ एकोनविंशत्यंगुलानि॥२९॥ यव॥१०॥ यूका॥ लिक्षा॥०॥
वालाग्र॥३॥ अस्य द्वयफले ककरणे द्वासप्ततिरंगुलानि॥२७॥ पत्रायवक्रतायां तु तावत्येव लभ्यते तावत्येव
संग्रह्यते इति गणितं क्षेत्रफलमविहितं अष्टानामपि पत्राणां क्षेत्रफलमेलने ऽंगुलानां षट्सप्तत्यधिका पंच
शती॥५७६॥ अथ शास्त्रं इष्टचतुर्विंशतिभागाः। पत्रद्वाभ्यां भागाभ्यां एकभागचतुर्थांशाधिकाभ्यां मध्यसूत्रे सं-
वृषमध्याद्बाह्यांत ध्रुतकर्कटेन वृत्तं कृत्वेशानपूर्वोत्तरालमारभ्यैकादशाग्निरंशैर्मितेनसूत्रेणाष्टसु स्थानेषु चिह्नं कि-

तेषु स्थासंभवति। अत्र चैकादशांशास्त्वाष्टमांशोनःकार्यः। अत्रैकहस्तादावनुपपत्तिः। मध्ये समचतुरस्रे तद्भुजमानं तु
विंशत्यंगुलानि एकोयवो। यूकात्रयं च चतुरस्र चतुर्भागेषु चत्वारि त्र्यस्राणि तत्र तु व चतुरस्र भुजा एव। पूर्वोक्ता
कर्णसूत्रमिताववधी भूजौ। लंबानां तु चत्वार्यंगुलानि एको द्वे यूके। इति तत्र चतुरस्र फलं तु चत्वारिंशतानि सप्तचां-
गुलानि यवाश्च सप्त॥४०७७॥ प्रत्येकं त्र्यस्रफलं द्विचत्वार्यंगुलानि॥४२॥ त्र्यस्रचतुष्टयफले फमष्टषष्ट्यधिकं शतं
॥१६८॥ रामोक्तं त्वष्टास्रं विषमवक्रभुजत्वात् षोडशास्रतापत्तेश्चोपेक्ष्यमिति दिक्। अष्टास्रि भुजांगुलानि एकस्मिन्
दशांगुलानि सप्तयवा। द्वितीये पंचदशांगुलानि त्रयो यवा। त्रिषु द्वादशांगुलानि सप्त यवा। चतुर्थे एकविंशत्यंगुलानि
सप्त यवा। पंचसु चतुर्विंशत्यंगुलानि यवत्रयं। षट्सु षड्विंशत्यंगुलानि षट् यवा। एकोयसप्तस्व सप्तविंशत्यंगुला-
नि सप्तयवा। अष्टसु त्रिंशदंगुलानि सप्त यवा। नवसु द्वात्रिंशदंगुलानि षट् यवा। दशसु चतुस्त्रिंशदंगुलानि यव-
चतुष्टयं। षोडशसु त्रिचत्वारिंशदंगुलानि पंच यवा। अथ चतुर्विंशा। एकस्मिन् एकांगुलं द्वयोरेकांगुलं त्रयो य-
वाः। त्रिषु एकांगुलं षट् यवाः। चतुर्ष्वंगुलद्वयं। पंचस्वंगुले यवद्वयं। षट्सु त्र्यंगुलद्वयं यवत्रयं। सप्तस्वंगुलद्वयं

हानम. पंचयवाः॥ अष्टस्वंगुलद्वयं षड्यवा॥ नवस्वंगुलत्रयं दशस्वंगुलत्रयमेको यवः॥ षोडशसु चत्वार्यंगुलानि॥ एकहस्ता
॥२६॥ दिषु चतुर्विंशा॥ एकस्मिन् षडंगुलानि॥ द्वयोरष्टांगुलानि॥ चत्वारो यवा॥ त्रिषु दशांगुलानि यवत्रयं॥ यूकाश्चत-
स्रः॥ चतुर्षु द्वादशांगुलानि पंचसु त्रयोदशांगुलानि त्रयो यवा॥ यूकाश्चतस्रः॥ षट्सु चतुर्दशांगुलानि॥ षट् यवा
सप्तसु पंचदशांगुलानि सप्त यवा॥ अष्टसु षोडशांगुलानि॥ सप्त यवाः चतस्रो यूकाः॥ नवस्वष्टादशांगुला-
नि दशस्वष्टादशांगुलानि सप्त यवा॥ षट् यूकाः॥ षोडशसु चविंशत्यंगुलानि॥ अथ पादमेखलाः॥ एकस्मिन्नंगुल
त्रयं॥ द्वयोश्चत्वार्यंगुलानि॥ द्वौ यवौ॥ त्रिषु पंचांगुलानि द्वौ यवौ चतुर्षु षडंगुलानि॥ पंचसु षडंगुलानि षड्यवा॥ ष
ट्सु सप्तांगुलानि यवत्रयं॥ सप्तस्वष्टांगुलानि॥ अष्टस्वष्टांगुलानि॥ यवचतुष्कं॥ नवसु नवांगुलानि दशसु नवांगु
लानि चत्वारो यवा॥ षोडशसु षोडशांगुलानि॥ द्वादशांशः॥ एकस्मिन्नंगुलद्वयं॥ द्वयोर्द्व्यंगुले सप्त यवा॥ त्रिष्वंगु
लत्रयं यवचतुष्टयं॥ चतुर्षु चत्वार्यंगुलानि पंचसु चत्वार्यंगुलानि चत्वारो यवा॥ षट्सु चत्वार्यंगुलानि सप्त यवा
॥ सप्तसु पंचांगुलानि द्वौ यवौ॥ अष्टसु पंचांगुलानि पंच यवाः॥ नवसु षडंगुलानि यवत्रयं॥ षोडशस्वष्टांगुलानि रामः
॥५७॥

स्थायने सर्वकुंडानां ध्वजायः सर्वसिद्धिदः॥ इति उपयवाः नवसु षडंगुलानि यवत्रयं॥ षोडशस्वष्टांगुलानि स्थाप्यमानं
क्रत्वात्स्वेष्टु चैतेषु प्रोक्तमानाद् यंगुलयवादिन्यूनमतिरिक्तं वा कृत्वा॥ ध्वजायसाधनीयः॥ विस्तारदैर्घ्यगुणितैर
ष्टभिर्विभक्ते पदे यः परिशिष्यते तदा ध्वजाय इति॥ तदुक्तं॥ ध्वजो धूम्रो पसिंह श्वा सौरभेयः खरो गजः॥ ध्वां
क्षश्चेति क्रमेणैते ह्याया अष्टकसुदाहृता इति॥ भविष्यत्पुराणे मुष्टिमानं शतार्द्धे तु शतेवारत्निमात्रकं सहस्रे
त्वयुतहोते चैकुर्यात्कुंडं करात्मकं॥ द्विहस्तेमयुते तद्वल्लक्षहोमे चतुःकरं॥ अष्टहस्तात्मकं कुंडं कोटिहोमेषु
नाधिकमिति॥ यत्तु शारदातिलके॥ एकहस्तमितं कुंडं एकलक्षे विधीयते॥ लक्षैरेणं दशाकं यावत्तावद्धस्तेन
वर्धयेत्॥ दशहस्तमितं कुंडं कोटिहोमेपि शस्यते इति यत्तु स्कांदे॥ कोटिहोमे चतुर्हस्तं चतुरस्रं समंततः॥ योनि
निवक्त्रद्वयोपेतं तदप्याहुस्त्रिमेखलमिति॥ सद्गादिहोमेष्वेकहस्तादिकुंडविधानं॥ कोटिहोमे दशहस्तस्य त
द्वयोचित शाखादिविरदादि स्थूलद्रव्यविषयं घृतादिक्षिप्तादिद्रव्यविषयं च ज्ञेयं॥ अपरवाते॥ चूडोत्तरे चतुर्विं
शतिमंगागमंगुलं परिकल्प्य तु॥ चतुर्विंशांगुलं हस्तं कुंडानां परिकल्पयेत्॥ हस्तमात्रं खनेत्तिर्यक्कुंडं ऊर्ध्वं

दानम०
॥२९॥ खलयासह। पिंगलमते त्वातो देकांगुलं त्यक्त्वा मेखलानां स्थितिर्नवेत्। तथा। सर्वेषामेव कुंडानामेकादतिस्रमे
खला कुंडलस्य विहस्तौ। कं वांगुला बहिः कार्या मेखले कारवडंगुलेति चतस्त्रि द्व्यंगुला वा पितिस्त्रा। सर्वत्र शो
भनामिति मेखलात्रितयं कार्यं कोणरामयशांगुलेरिति। कोणाग्न्यत्वारः। रामास्त्रयः। यमौ द्वौ। चतस्त्रि द्व्यंगु
लत्वं च विस्तारे उच्चतायां च। अतएव शारदातिलके मेखलामानं प्रकृतम्। विस्तारोत्सेधतो ज्ञेया मेखला
सर्वतो बुधैरिति। रामेणतु तिस्रणामपि त्र्यंगुलोच्चतैव। विस्तारस्तु चतुश्चतुस्त्रिद्व्यंगुल इत्युक्तौ। अथयो
निः। तत्र स्वायंभुवे मेखलामध्यतो योनिः कुंडाद्रभिंन्ना विस्तृते। अंगुष्ठमानो ह्येकं वा कार्याश्वच्छदलाकृति
ः। कुंडार्धदीर्घा त्रिंशद्विस्तृता मूलेयेश्व छदलवत्कुंचिता। अंगुष्ठमानौ श्रोष्ठकं बौ यस्याः। सा अंगुष्ठमाने ष्टकं
वा श्रोष्ठः कुंडमध्यप्रविष्टयोन्यग्रं कं गोपोनि मेखले स्ये के तथा चतुर्विवेष्टितायोनि। कायेसर्पा मेखला
तश्चोनागइत्यपरे। त्रैलोक्यसारे दैर्घोत्सेधांगुलायोनिर्भवेत्। विस्तरेण तु एकांगुलोच्छ्रितासोतप्रवि-
ष्टाभ्यंतरे तथा। कुंभद्वयसमायुक्ता वाश्वच्छदलवन्नता। अंगुष्ठमेखलायुक्ता मध्ये त्वाज्यधृतिक्षमेति। अंशो रामः ॥५६०॥

नायोनिर्दैर्घ्यात्त्र्यंशांगुलेतियावत्। कुंभद्वयेन वृत्तार्धद्वयाकारेणमूलदेशेसमायुक्ता। शारदातिलके स्थला
दारभ्यनालं स्याद्योन्यामध्ये सरंध्रकमिति स्वायंभुवे। प्रागग्नियाम्यकुंडानां योक्ता योनिरुदङ्मुखी पूर्वामुखा।
स्मृताः शेषा यथा शोभासमन्विताइति। प्रागग्नियाम्यकुंडानामिति पूर्वोक्तिस्वायंभुववचनाद्योनिकुंडेयोनिःका
र्येति केचित्। वस्तुतस्तु नवानां चतुरस्रादिपद्मेशतस्पत्वाचकाशत्वा द्विरोषनिषेधाद्यो निर्नैवकार्येतित्रै
लोक्यसारे। नवमस्यापि कुंडस्य योनिर्दक्षेस्थितेति। दक्षस्य पूर्वयाम्येषु जलस्थापश्चिमोत्तरे। दक्षं दक्षिणं ज
लं पश्चिमं। एवं चहोतारो पिपूर्वदक्षिणकुंडयोरुत्तरानिमुखा। पश्चिमोत्तरयोः पूर्वाभिमुखाः सिध्यंति होतुरग्रे
योनिरासामुपर्यश्वस्यपत्रवदि। तितत्रैवोक्तेः। आसां मेखलानामुपरीत्यर्थः। एवमेव रूनारायणीयेपि। शारदायां
योनिकुंडेयोनिमब्जकुंडेनाभिंवर्जयेदिति। सिद्धांतशेखरेपियोनौ योनि न कुर्वीत हि शारदातिलके। कुंडानां कल्प
ये दंतनाभिंबुजसंनिभा तेनकुंडानुरूपां वामानमस्या निगृह्यते। मुष्टारत्निकहस्तानां नाभिरुत्सेधतो मता।
नेत्रवेदांगुलोपेता कुंडे च त्वन्येषु वर्धयेत्। यद्धयक्रमेणौवनाभिप्रपगुदारधीरिति। नेत्रवेदांगुलोपेताउच्चतायां

शा०न०
॥२६॥

ंगुलानि विस्तारायामयोश्चतुरंगुलोत्सेधः॥ द्वित्रिहस्तादिकुंडेषु द्विद्वियववृद्धिस्तु विस्तारायामयोः। षष्ठांशो विस्तारप
रात्रवृतायां शारदशांशापरेति॥ रामार्दयाः। शारदातिलके एकमेखलं कुंडं ईशान्यां वै लवाधुर इति विष्वक
र्मा खाताधिके भवेद्रोगो हीने धेनुधनक्षयः। वक्रकुंडे तु संतापो मरणं छिन्नमेखले मेखलारहिते शोको ऽभ्यधिके
वित्तसंक्षयः। भार्याविनाशनं प्रोक्तं कुंडे योन्या विनाकृते। अपत्यध्वंसनं प्रोक्तं कुंडं यत्कंठवर्जितम्। सिद्धां
तशेखरे। मानहीने भवेद्व्याधिरधिके शत्रुवर्द्धनं। योनिहीने त्वपस्मारो वा कुंडं वा कंठवर्जिते। तत्रैवास्थंडिलं वापि
कुर्वीत सुस्निग्धे सिकतैः सितैः। हस्तमात्रं पविस्तारं सुसमेऽम्यंगुलोन्नतं। ग्रंथांतरेऽपि। नित्यनैमित्तिकाकर्मस्थंडिले
वा समाचरेत्। हस्तमात्रेण तत्कुर्याद्वालुकाभिः सुशोभनं। अंगुलोत्सेधसंयुक्तं चतुरस्रसमंततः इति॥ इति
श्रीशंकरभट्टात्मजभट्टनीलकंठकृतः कुंडमंडपनिर्णयः॥ अथ षोडशारचक्रम्॥ तत्र गुरुर्वेद्यां मध्ये त्रिह
स्तव्यासं चतुरस्रं प्रासाद्य प्रागपरदक्षिणोत्तरं नवरेखा निस्तार्य चतुःषष्टिकोष्ठकं कुर्यात्। तत्र कोष्ठानि प्रत्येकं
नवांगुलानि संपद्यंते। ततो बहिरंत्यपंक्तिषु चतुर्दिक्षु मध्यमानि चत्वारि चत्वारि मार्जयित्वा तदुपर्युपांत्य

राम:
॥५८२॥

पंक्तिषु पार्श्वयोस्त्रयं त्रयं त्यक्त्वा प्रतिदिशं मध्यकोष्ठद्वयं मार्जयेत्तेन चतुर्दिक्षु षट्षट्कोष्ठानि चत्वारि द्वाराणि
सिध्यंति। ततो मध्यस्थितषोडशकोष्ठानि मार्जयेत्। ततो बाह्ये एकैकं कोणकोष्ठं विहाय कोणकोष्ठद्वारपार्श्वां
तरालवर्तीन्यवशिष्टानि पंच कोष्ठानि मार्जयेत्। तथा मध्ये चतुरस्रपीठस्य पादाः। सिध्यंति। ततो मध्याच्चत्वा
रि वृत्तानि कुर्यात्। तत्राद्ये चत्वार्यंगुलानि व्यासः। द्वितीयेऽष्टौ तृतीये चतुर्विंशतिः। चतुर्थे षड्विंशतिः। तच्चतुरंगु
लं वृत्तं कर्णिकारूपं पीतेन रजसा पूरयित्वा कर्णिकावधि स्वां सितेन रजसा निर्माय तद्बहिरष्टांगुलात्मके वृत्ते
पीतरक्तसितरजोभिः संपादितस्वल्पमध्यायामि षोडशकेसराणि संपाद्य तत्केसरावधि रेखां सितेनैव रजसां
गुलोन्नतांसंपाद्य चतुर्विंशांगुलात्मके तद्बहिर्वृत्ते सितरजसा अष्टदिक्ष्वष्टौ पत्राणि रक्तयाणि कुर्यात्। ततो दलां
तरे रेखां सितेन रजसा विधाय दलांतराणि कृष्णेन रजसा पूरयित्वा तद्बहिरेकांगुलांतरं बहिर्वृत्तरेखां सितेनै
व रजसो संपाद्य वृत्तद्वयांतरं परितोऽष्टदलाय तत्संधिषु चिह्नं। षोडशधा विभज्य प्रतिभागं यवाकारान् षोडश
रान् रूपाम पीतारुणश्यामैस्तारजोभिः कल्पयित्वा तदंतराय पायोगौररजोभिः। पूरयित्वा तद्बहिः सितपीतारुणरूपा

दानम:

॥२९॥ महरिताः पंचरेखाल्लिखेत्॥ तद्बहिः पीवद्के नं चतुरस्रं यथाशोभं रजोभिरलं कृत्सपीवावधिरेखां सितेन रजसा चतुर
स्रं रचयेत्॥ द्वारक्षेत्राणि पूर्वादितः पीतश्वेतरूपामहरितरजोभिः पूजयेत्॥ आग्नेयादिकोणकोष्टचतुष्टयं लो
हितहरितरूपामधवलैः पूरयेत्॥ आग्नेयादिपीवपादचतुष्टयं पंचकोष्टात्मकं क्रमात् सितरक्तपीतकृष्णरजो
भिः पूरयेत्॥ ततः सितेन रजसांगुल्या तेन बहिश्चतुरस्ररेखां कुर्यादिति पितामहचरणाः॥ मदनाद्यस्य टक्कुरम
तेतु चतुर्हस्तं चतुरस्रं तत्र प्रत्येकं द्वादशांगुलानि कोष्टानि वृत्तानि तु पंच॥ तत्राद्ये वृत्ते चत्वार्यंगुलानि व्यासः
द्वितीयेऽष्टौ तृतीये विंशति चतुर्थे चतुर्विंशतिः पंचमेऽष्टत्रिंशदिति॥ पंचमकोष्टात्मकं पीवपादचतुष्टयं
आग्नेयादिक्रि हरिमेण रक्तहरितरूपामसितैः पूरणीयं॥ बाकोणकोष्टचतुष्टयं प्रत्येकं त्रिभिस्त्रिभिर्वर्णैरि
तिशेषः॥ इति ग्रहाद्भुतसार चक्रनिर्मितिः॥ इदमेव च वारुणां मंडले तथा॥ वज्रं प्रागुत्तमे भागे आग्नेय्यां शक्तिमु
ज्वलां आलिखेद्दक्षिणे दंडं नैरृत्यां खड्गमालिखेत्॥ पाशं तु वारुणे लेख्यं ध्वजं वै वायुगोचरे कौबेर्यां तु गदां
लिखेदैशान्यां शूलमालिखेत्॥ शूलस्य वामदेशे तु चक्रं पद्मं तु दक्षिणे इति॥ ततो महावेद्युपरि पंचवर्णफला राम:

॥५९२॥

पुष्पोपशोभितं वितानं बध्नीयात् इति॥ ततो महावेदीशानभागे ग्रहयागमंडपे छिद्रैर्हस्तमितायां हादिस्थाप
नार्था परा वेदिर्या विहितास्ति तेऽस्मादिमते वितस्त्युच्छ्रायातस्यां सर्वतो मंडलं लिखेत्॥ तच्चैवं च प्रकारेपात्स्यं॥ प्रागु
ग्रागता रेखा॥ कुर्यादेकोनविंशतिः॥ एवं डेडुस्त्रिपदः कोष्ठः खण्डपंचभिःपदैः॥ एकादशपदावह्नीमंडलं तु न
वभिःपदैः॥ चतुर्विंशत्पदावापी परिधिर्विंशकैः पदैः॥ मध्ये षोडशभिः कोष्टैः पद्ममष्टदलं स्फुटं श्वेतेंदुः श्वेतख
लात्कृष्णावह्नी नीलेन पूरयेत्॥ मंडलारुणा सिता वापी परिधिः पीतवर्णकः॥ बाह्यांतरदलं श्वेतं कर्णिका पीत
वर्णिका॥ परिधावेष्टितं पद्मं मध्ये सत्वं रजस्तमः॥ तन्मध्ये स्थापयेद्देवान् ब्रह्माद्यां ब्रह्मुरानिति॥ अथ ग्रहप्र
जाप्रकारः॥ तत्र ग्रहनामान्येव॥ सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः॥ शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रह
नव स्कांदे [illegible] गोत्रमे तेषां वर्णस्थानमुच्यते च॥ यो ज्ञात्वा कुरुते शांतिं ग्रहास्तेनावमानिताः॥ स्वे स्वे स्था
नमधिष्ठानं एतद्विज्ञायकः कुर्यात्तत्सर्वं सफलं भवेत्॥ वर्णं जन्म नीच्चाह हद्दपराशरः॥ रक्तः कश्यपजो भानुः
शुक्लो वत्ससुतः शशी॥ रक्तो रुद्रसुतो भौमः पीतः सोमसुतो बुधः पीतो बालसुराचार्यः शुक्लः शुक्रो नू[illegible]

ह॥ छस्न: शनी रवे: पुत्र: छस्नो राहु: प्रजायते॥ छस्न॥ केतु: छशान्देछ: छस्न: पापास्त्वयोम॥ तुवमाहसद एव॥ उत्प
न्नोर्कः कलिंगेषु यमुनायां च चंद्रमा॥ अंगारकस्त्ववंत्यां तु मगधायां हिमांशुज॥ सैंधवेषु गुरुर्जातः शुक्रो भो
जकटे तथा॥ शनैश्चरस्तु सौराष्ट्रे राहुर्वैराटिके पुरे॥ अंतर्वेद्यां तथा केतुरित्येतायह नमय॥ गोत्रमाहसहाणां वे
आदित्य॥ काश्यपो गोत्रादात्रेयश्चंद्रमा भवेत्॥ भारद्वाजो भवेद्भौमस्तथात्रेयश्च सोमज॥ शाक्रछज्यो गिरोगो
त्र शुक्रो वै भार्गवस्तथा॥ शनिः काश्यप एवाथ राहुः पैठीनसिस्तथा॥ केतुर्वै जैमिनायाश्च ग्रहा लोकहित
वहा:॥ हामोदरायेयहोन्यकम्प॥ वर्णरूपगुणोमुक्तान्व्याहृत्सवाहयेनुतान्॥ तत्रैव॥ भानुतुमंडलोकारं च
ई चंद्र हृतिध्रुविधुं॥ अंगारकं त्रिकोणं तु बुधं बाणाकृतिं विदु॥ पद्माकारं गुरुं कार्यां चतुःकोणं च भार्गवं॥ द
डाकृतिं शनिं राहुं मकराकारमेव च॥ खड्गाकारास्तथा केतून्स्थापयेदनुपूर्वशः॥ यह दिक्पाणिमास्ये॥ प
द्मासनः पद्मकरा पद्मगर्भसमद्युतिः सप्ताश्वरथसंयुक्तो द्विभुजः स्यात्सदा रवि॥ श्वेतः श्वेतांबरधरा दशा
श्वः श्वेतभूषण॥ गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी॥ रक्तमाल्यांबरधरः शक्तिशूलगदाधरः चतुर्भुजो

मेषगमो वरादः स्याद्धरासुतः॥ पीतमाल्यांबरधरः॥ कर्णिकारसमद्युतिः॥ खड्गचर्मगदापाणिः सिंहस्थो वरदो
बुधः॥ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ॥ दंडिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू॥ इंद्रनीलद्युतिः शूली व
रदो गृध्रवाहनः॥ बाणबाणासनधरः कर्तव्योर्कसुतः सदा॥ करालवदनः खड्गचर्मशूली वरप्रदः॥ नीलसिंहास
नस्थश्च राहुस्तत्र प्रशस्यते॥ धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः॥ गृध्रयानगता नित्यं केतवः स्युर्वर
प्रदः॥ सर्वे किरीटिनः कार्याः ग्रहा लोकहितावहाः॥ केतूनां बहुत्वेएकमेवतात्वं॥ हरूपराशर॥ मध्ये तु भास्करं वि
द्याल्लोहिनं पूर्वदक्षिणे॥ दक्षिणेन धरासुतं बुधं पूर्वोत्तरे न्यसेत्॥ उत्तरेण गुरुं विंद्यात्पूर्वेणैव तु भार्गवं॥ शनैश्चरं प
श्चिमस्यां राहुं दक्षिणपश्चिमे॥ पश्चिमोत्तरत केतून्स्थापयेदनुपूर्वशः॥ मुखानि मास्ये॥ देवानां तत्र संस्थाप्यावेशाति ध
दशाधिका॥ आदित्याभिमुखाः सर्वे साधिप्रत्यधिदेवताः अमास्ये॥ भास्करस्येश्वरं विद्यादुमां च शशिनस्तथा
स्कंदमंगारकस्यापि बुधस्यापि तथा हरिं॥ ब्रह्माणं च गुरोर्विद्याच्छुक्रस्यापि शचीपतिं॥ शनैश्चरस्यापि यमं रा
होः कालं तथैव च॥ केतूनां चित्रगुप्तं च सर्वेषामधिदेवता॥ अग्निरापः क्षितिर्विष्णुरिंद्र ऐंद्री च देवता॥ प्रजाप

दानख० ॥३१॥

निश्वासमर्पश्च ब्रह्मा प्रत्यधिदेवता॥ एते पांचलक्षणानि॥ विष्णुधर्मोत्तरे॥ पंचवक्त्रो वृषारूढः प्रतिवक्त्रं त्रिलोचनः॥ क
पालशूलखट्वांगी चंद्रमौलिः सदाशिवः॥ अक्षसूत्रं च कमलं दर्पणं च कमंडलुं॥ उमा बिभर्ति हस्तैस्तु पूजिता
त्रिदशैरपि॥ कुमारः षण्मुखः कार्यः शिखंडकविभूषणः॥ रक्तांबरधरो देवो मयूरवरवाहनः॥ कुक्कुटश्च तथा
घंटास्य दक्षिणहस्तयोः॥ पताका वैजयंती स्याच्छक्तिः कार्या च वामयोः॥ विष्णुः कौमोदकीपद्मशंखचक्रधरः॥ क्र
मात्॥ प्रदक्षिणाधःकराद्वारभ्य नित्यशः॥ पद्मासनस्थो जविज्ञो ब्रह्मा कार्यश्चतुर्भुजः॥ अक्षमालां स्रुवं बिभ्र
त्पुस्तकं च कमंडलुं॥ चतुर्दंतगजारूढो वज्रांकुशलसत्करः॥ प्राचीपतिः प्रकर्त्तव्यो नानाभरणभूषितः॥ ईषन्नी
लो यमः कार्यो दंडहस्तो विजानता॥ रक्तदृक्पाशहस्तश्च महामहिषवाहनः॥ कालाकरालवदनो नालांगश्च वि
भीषणः॥ पाशहस्तो दंडहस्तः कार्योरश्चि करोमवान्॥ अपाच्यवेषस्वाकारं द्विभुजं सौम्यदर्शनं॥ दक्षिणेऽल
रवनो चित्रगुप्तं वा मेतुपानकं॥ पिंगलश्मश्रुकेशांचः पीनांगजवरोद्धरः॥ छागस्थः साक्षसूत्रोग्निः सप्तार्चिः श
क्तिधारकः॥ चिहिंतं चमरेणास्य करमन्यं प्रकल्पयेत्॥ आपः स्त्रीरूपधारिण्यः श्वेतामकरवाहनाः॥ दधानाः पा रामः ॥५६४॥

शकलश्रौ मुक्ताभरणभूषिता॥ शुक्लवर्णा मही कार्या दिव्याभरणभूषिता॥ चतुर्भुजा सौम्यवपुश्चंडी सुमहद्यो
वरा॥ रत्नपात्रं सस्यपात्रं —मोषधसंयुतं॥ पद्मं करे च कर्त्तव्यं भुवो यादवनंदन॥ दिङ्नागानां चतुर्णां सा कार्या ष
ण्णतात तथा॥ विष्णोरिंद्रस्य चौक्तं वामे शच्याः करे कार्या सौम्या संतानमंजरी॥ वरदामंडिता कार्या द्विभुजा चत
प्याशाची॥ यज्ञोपवीती हंसस्थ एकवक्त्रश्चतुर्भुजः॥ अक्षं रक्तं चं स्रुवं बिभ्रत्कुंडिकां च प्रजापतिः॥ अक्षसूत्रं च स
मालौ कुंडिकां कमंडलुं॥ अक्षसूत्रधराः सर्पकुंडिकापुच्छभूषणाः॥ एकश्लोगास्त्रिश्लोगा वा सर्वे कार्याश्च नौष
णाः॥ ब्रह्मलक्षणमुक्तं॥ ग्रहाणां दक्षिणे पार्श्वे स्थापयेदधिदेवता॥ ग्रहाणामुत्तरे पार्श्वे न्यसेत्प्रत्यधिदेवता
॥ अथ विनायकादिलक्षणानि॥ चतुर्भुजस्त्रिनेत्रश्च कर्त्तव्योत्र गजाननः॥ नागयज्ञोपवीतश्च शशांककृतशेखरः
दक्षे दंतं करे दद्याद्द्वितीये चाक्षसूत्रकं॥ तृतीये परशुं दद्याच्चतुर्थे मोदकं तथा॥ शक्तिं बाणं तथा शूलं —खड्गं च
दक्षिणे॥ चंद्रबिंबमयो वामे खेटकं धेकपालकं सुकं वकं च बिभ्राणा सिंहारूढा दशभुजा॥ एषा देवी समुद्दिष्टा
सुदुर्गा दुर्गनिहारिणी॥ धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः॥ वरं दानकरो धूम्रवर्णः कार्यो विजानता॥ नीलो

दानम·
॥३२॥ त्पलांजनगगनं तदर्णो वरधारिच ॥ चंद्रार्कहस्तं कर्त्तव्यं द्विनजं सौम्यरवं उवत ॥ द्विजुजौ सौम्यवरदौ कर्त्तव्यौ रूपसंयु
तौ ॥ तयोरोषधयः कार्या दिव्या दक्षिणहस्तयोः ॥ वामयोः पुस्तकौ कार्यौ दर्शनीयौ तथा द्विज ॥ एकस्य दक्षिणे पार्श्वे
वामे चान्यस्य यादव ॥ नारीयुग्मं प्रकर्त्तव्यं सरूपं चारुदर्शनं ॥ रत्नभांडकरे कार्ये चंद्रशुक्रौ वरे तथा ॥ अपलोक
पालरूपाणि ॥ तत्रेंद्राग्नियमब्रह्मरूपाण्यधिदेवताः प्रत्यधिदेवतोक्तानि ॥ खड्गचर्मधरो बालो निरृतिर्नरवाह
नः ॥ ऊर्ध्वकेशो विरूपोऽस्ः कराभ्यां कापिय ॥ नागपाशधरो रक्तःस्रषणः पद्मिनीप्रिय ॥ वरुणो बुतिः स्वर्णवर्णो मक
रवाहनः ॥ वायुर्विनायकादि पंच के उक्ताः ॥ सोमोयहेषु ॥ अनंतः प्रत्यधिदेवतासु ॥ विनायकादिस्थापनं यहेभ्य उ
त्तरतः इति संप्रदायः ॥ दक्षिणपश्चिमवायव्योत्तरपूर्वे ॥ युपपाकमित्यन्ये राहुमंदद्दिने शानां उत्तरस्यां यथाक्र
मं गणेशदुर्गावायुश्वराहुकेत्वोश्च दक्षिणे ॥ आकाशमश्विनौ चेति पंचैतान्स्थापयेद्बुधः इति वचनानुसारेणेति
महाः रूपनारायणश्च ॥ पूजाप्रकारमाह ॥ याज्ञवल्क्यः ॥ यथावर्णं प्रदेयानि वासांसि कुसुमानि च ॥ गंधश्च ब दानमः
लयश्चैव धूपो देयो ऽत्र गुग्गुलुः ॥ मार्कंडेय धूपामोदोत्र सुरभिरुपरिष्टाद्वितानके ॥ शोभनं स्थापयेत्प्राज्ञः फल ॥५८५॥

पुष्पसमन्वितं ॥ धूपे विशेषो हेमाद्रौ स्कांदे ॥ रवेः कंदुरुकं धूपः शशिनस्तु घृतं सता ॥ भौमे सर्जरसं चैव अगरुं
च बुधे स्मृतं ॥ सिंहकं गुरवे दद्याच्छुक्रे बिल्वागुरु स्मृतं ॥ गुग्गुलं मंदवारे तु लाक्षा राहोश्च केतवे हुतकुंद्र
सकाः निर्यासः ॥ सर्जः शालः ॥ सिल्हकं सिल्हा इति मध्यदेशप्रसिद्धं ॥ बिल्वागुरु बिल्वफलनिर्याससहितमगुरु ॥ मं
दचारे शनैश्चराय ॥ लाक्षा राहवे ॥ केतुभ्य आदिवाकरकुजाभ्यां हि दापयेद्रक्तचंदनं ॥ चंद्रे च भार्गवे चैव सितवर्णं
प्रदापयेत ॥ कुंकुमेन च संयुक्तं चंदनं जीवसौम्ययोः ॥ अगरुं चापि कस्तूर्या राहुकेत्वर्कजेषु च ॥ अंगदेतानो तु पु
ष्पाणि सितवर्णानि चंदनं च विलेपनं ॥ एतेषां गुग्गुलुर्धूपो नैवेद्यं घृतपायसं ॥ वासांसि शुक्लानीति संप्रदायः ॥ यह
बलिनाह ॥ गुडौदनं रवेर्दद्यात्सोमाय घृतपायसं यावं बुधाय क्षीरषष्टिकं ॥ दध्योदनं तु जीवाय शुक्राय च घृतौद
नं ॥ शनैश्चराय कृशरं आजं मांसं च राहवे ॥ चित्रौदनं च केतुभ्यः सर्वभक्ष्यैरथार्च— त ॥ अथ च सर्वभक्ष्यैरथार्च
येदित्यन्ये दधिमोदकादि देयं हेमाद्रौ हरकुर ॥ संयावो गोधूमचूर्णसाधितो घाटाख्य इत्यपि सर एव ॥ तंडुलम
स्रात्तमिति रूपनारायणः ॥ कृशरस्तिलतंडुलमुद्गसाधितं ॥ चित्रौदनं तिलतंडुलमिश्रं स्यादजादीरं चरौ मि

तं॥ कर्णानामागृहीतं स्यादेतद्विशेषणं स्मृतमिति दामोदरः याज्ञवल्क्यः॥ शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकं
पूजयंतो यथा नेता स्वयं ते सकलं फलं॥ यच्च पृथ्वीचंद्रोदयमादौ॥ वर्णरूपगुणैर्युक्तान् व्याहृत्यावाहयेत्तु तान्
इति वचनात्॥ ॐ भूरादित्यमावाहयामि ॐ भुवः आदित्यमावाहयामि॥ ॐ स्वः आदित्यमावाहयामि ॐ भूर्भुवः स्व
रादित्यमिति व्यस्तसमस्तसमस्तव्याहृतिभी रावाह्य भगवानादित्य नक्षत्राधिपते काश्यपगोत्र कलिंगदेशेश्वर जपा
पुष्पोपमांशुद्युते द्विभुजपद्माभयंहस्त सिंदूरवर्णमाल्यांबरानुलेपनं ज्वलन्माणिक्यखचितसर्वाभरण ना
स्वनेजोनिधत्रिलोकप्रकाशकत्रिदेवतामय मम तेजमत्ते सप्ताश्वाहरण ध्वजपताकोपशोभिते सप्ताश्वरथवाहने
नमेहं प्रदक्षिणां कुर्वन् आगच्छामिरुद्राभ्यां सहेत्यादि विशेषणैरपि युक्तान्यथा नावाहयेदिति तन्मूलं विमृ
श्यकार्यं वामनपुराणे॥ आचार्यप्रभृतिभ्यश्च यदर्चनफलं ततः समिदाज्यचरूणां च तिलहोमफलं ततः॥ ब्रह्मलोके कुं
नपूजायां यावर्चनस्य फलं जयत॥ लोकपालगणेशाद्यास्तु यागदेवता॥ तासां जपफलं तद्वन्न्यूहलीयाज्ञलपूर्व
कं॥ ततस्तेभ्यो यथाशक्तिदातव्यदक्षिणा ततः इति॥ इति ग्रहपूजाविधिः॥ अथ पुण्याहवाचनं त्रिकांडमंडनः

गर्भाधानादिसंस्कारे विशिष्टापूर्तकर्तु च पितृश्राद्धे पुराकार्यं कर्मादौ स्वस्तिवाचनं॥ व्यासः॥ संपूज्य गंधमाल्या
द्यैर्ब्राह्मणान् विशिष्टापूर्तकर्तु च पितृश्राद्धे पुराकार्यं कर्मादौ स्वस्तिवाचनं स्वस्तिवाचयेत्॥ धर्मकर्मणि मांग
ल्ये संग्रामे ऽद्भुतदर्शने इति॥ गृह्यपरिशिष्टे॥ स्वस्तिवाचनमृद्धिपूर्तेषु तत्कर्मणश्चाद्यंतयोः कुर्यात्॥ आश्व
लायनः॥ वैदिके तांत्रिके चादौ ततः पुण्याहमिष्यत इति तद्रूपं नारायणो यद्दृत्थं॥ त्रीनधिकान्ब्राह्मणान्
भोजयित्वोदङ्मुखानुपवेश्य वस्त्रादिभिः परितोष्य पुण्याहं भवंतो ब्रुवंत्विति ब्राह्मणान् यजमानः प्रोञ्जु
खस्त्रिः श्रावयेत्॥ ततो ब्राह्मणाः पुण्याहं पुण्याहमिति ब्रूयुः॥ ततः स्वस्ति भवंतो ब्रुवंत्विति त्रिः श्रावयेत्॥ ॐ
स्वस्तिरिति त्रिर्ब्रूयुः॥ ऋद्धिरित्योंकारपूर्वं त्रिस्थिरे केकामाशिषो वाचयित्वेत्यादिना बोधायनेनोक्तं यमः॥ पु
ण्याहवाचनं दैवे ब्राह्मणस्य विधीयते॥ एतदेव निरोंकारं कुर्यात् क्षत्रियवैश्ययोरिति॥ बह्वृचगृह्यपरिशि
ष्टे तु॥ अवनिकृतजानुमंडलः कमलमुकुलसदृशमंजलिं शिरस्याधारयद्दक्षिणेन पाणिना सुवर्णपूर्णक
लशं धारयित्वा दीर्घानागानद्यो गिरयस्त्रीणि विष्णुपदानि च॥ तेनायुःप्रमाणेन पुण्याहं दीर्घमायुरस्तु॥ शिवा

दानम॰

॥३४॥ आपःमंतुसौमनस्यमस्तु॥अक्षतंचारिष्टंचास्तु॥गंधाःपांतु॥मंगल्यंचास्तु॥पुष्पाणिपांतुसुश्रियमस्तु॥अक्षताःपां
तुआयुष्यमस्तु॥तांबुलानिपांतुऐश्वर्यमस्तु॥दक्षिणाःपांतुआरोग्यमस्तुदीर्घमायुःशांतिःपुष्टिःश्रीर्यशोवि-
द्याविनयोवित्तंबहुपुत्रंचायुष्यंचास्तु॥यंकृत्वासर्ववेदयज्ञक्रियाकरणकर्मारंभाः॥प्रवर्त्तंतेतमहमों
कारमादिंकृत्वाऋग्यजुःसामाशीर्वचनंबह्वृ॥ऋषिमतंसमनुज्ञातंभवद्भिरनुज्ञातःपुण्यंपुण्याहंवाचयिष्ये
वाच्यतां॥द्रविणोदाद्रविणसस्तुरस्य॥सवितापश्चातात्॥नवोनवोभवतिजायमानो॥उच्चादिविदक्षिणावंतो
अस्तुइत्येताऋचः॥पुण्याहंब्रूयात्॥व्रतनियमतपःस्वाध्यायक्रतुदमदानविशिष्टानांसर्वेषांब्राह्मणानां
मनःसमाधीयतां॥समाहितमनसःस्मःप्रसीदंतुभवंतःप्रसन्नाःस्मः॥शांतिरस्तु॥पुष्टिरस्तु॥तुष्टिरस्तु॥अवि
घ्नमस्तु॥आयुष्यमस्तु॥आरोग्यमस्तु॥शिवंकर्मास्तु॥कर्मसमृद्धिरस्तु॥पुत्रसमृद्धिरस्तु॥धनधान्यसमृद्धिर-
स्तु॥इष्टसंपदस्तु॥अनिष्टनिरसनमस्तु॥यत्पापंतत्प्रतिहतमस्तु॥यच्छ्रेयस्तदस्तु॥उत्तरेकर्मण्यविघ्नमस्तु॥उ
त्तरोत्तरमहरहरभिवृद्धिरस्तु॥उत्तरोत्तराःक्रियाःशुभाःशोभनाःप्रवर्त्तंतां॥तिथिकरणमुहूर्त्तनक्षत्रसंपदस्तु

रामः

॥५८७॥

तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताःप्रीयंतां॥तिथिकरणेमुहूर्त्तेनक्षत्रेग्रहेसदैवतेप्रीयेतां॥अ-
ग्निपुरोगाविश्वेदेवाःप्रीयंतां॥इंद्रपुरोगामरुद्गणाःप्रीयंतां॥वसिष्ठपुरोगाऋषिगणाःप्रीयंतां॥माहेश्वरपुरो
गाउमामातरःप्रीयंतां॥अरुंधतिपुरोगाएकपत्न्यःप्रीयंतां॥विष्णुपुरोगासर्वेदेवाःप्रीयंतां॥ब्रह्मपुरोगासर्वेदे
वाःप्रीयंतां॥ब्रह्मचब्राह्मणाश्चप्रीयंतां॥श्रीसरस्वत्यौप्रीयेतां॥श्रद्धामेधेप्रीयेतां॥भगवतीकात्यायनीप्रीयेतां
भगवतीमाहेश्वरीप्रीयतां॥भगवतीऋद्धिकरीप्रीयतां॥भगवतीवृद्धिकरीप्रीयतां॥भगवंतौविघ्नविनायकौ
प्रीयेतां॥सर्वाःकुलदेवताःप्रीयंतां॥सर्वाग्रामदेवताःप्रीयंतां॥हताश्चब्रह्मद्विषः॥हताश्चपरिपंथिनः॥हताश्चवि
घ्नकर्त्तारः॥शत्रवःपराभवंयांतु॥शाम्यंतुघोराणि॥शाम्यंतुपापानि॥शाम्यंत्वीतयः॥शुभानिवर्द्धंतां॥शिवा
आपःसंतु॥शिवाऋतवःसंतु॥शिवावनस्पतयःसंतु॥शिवाअतिथयःसंतु॥अहोरात्रेशिवेस्यातां॥निका
मेनिकामेनःपर्जन्येतितां॥शुक्रांगारकबुधबृहस्पतिशनिराहुकेतुसोमसहिताआदित्यपुरोगासर्वेग्र
हाःप्रीयंतां॥भगवान्नारायणःप्रीयतां॥भगवान्पर्जन्यःप्रीयतां॥भगवान्स्वामीमहासेनःप्रीयतां

दानम॰
॥३५॥ पुण्याहकालं वाचयिष्ये वाच्यतां उक्तातेवत्राकुनेसामगा यत्निज्यपायजति यत्पुण्यं नक्षत्रं तद्वषट्कुर्वतोपस्थ
षं यद्रावैसत्यउदेति यावतितत्रसूर्येगच्छेतितत्रजघन्यंपरेपत् तावतिकुर्वीत यत्कारीस्यात् पुण्याहमेव
कुरुते पुण्याहं भवंतो ब्रुवंतु ॐपुण्याहं स्वस्त्यै वायुसुपवामहे आदित्यउदयनीयः स्वस्ति नइंद्रोवृद्धश्रवा
ः स्वस्ति॰ अयोदेवावसवः सौम्यासः चतस्रोदेवीरजरा अविष्टाः तेयज्ञंपांतुरजसः परस्तात् संवत्सरीणममृ
तंहः स्वस्ति स्वस्ति भवंतो ब्रुवंतु आयुष्मतेस्वस्ति ऋध्यामस्तोम॰ सवांमदिमधुयामिति ऋध्यास्माहव्यैर्न
मसोपसद्य मित्रंदेवं मित्रधेयं नो अस्तु राधान्दूराधान्हविषावर्धयंतः शतंजीवेम शरदः सवीराः त्रीणित्री
णिवैदेवानामृद्धानि त्रीणिछंदांसि त्रीणिसवनानित्रयइमेलोकाः ऋध्यामेवतद्वीर्यएषुलोकेषु प्रतितिष्ठति ऋद्धिं
ऋतां भवंतो ब्रुवंतु ऋध्यतां श्रियेजातः श्रियआ॰ श्रियएवैनं यस्मिन्ब्रह्माभ्यजयत्सर्वमेतममृतंचलोकमिद
मेच नक्षत्रमभिजिद्विजित्यां श्रियंदधात्वहृणीयमानं अहेबुध्नियमंत्रंमेगोपाय यमृषयस्त्रयीवि
दाविदुः ऋचः सामानियजूंषि सा हि श्रीरमृतासतां अस्त्विति भवंतो ब्रुवंतु अस्तु श्रीः पुण्याहवाच दानः
॥५८८॥

नसमृद्धिरस्तु भगवान्प्रजापतिः प्रीयतां इतिपुण्याहवाचनं ततोनीराजनमभिषेकंचयथाशास्त्रंकर
येदिति पुण्याहवाचनंचादिमध्यांतेषुकार्यं आदावंतेचमध्येचकुर्याद्ब्राह्मणवाचनमितिवचनात् ततो
स्मिन्कर्मण्यमुकगोत्रममुकप्रवरममुकशर्माणंगुरुंत्वावृणे इति वृत्वा ऋग्वेदिनौ द्वौ पूर्वकुंडे होमंकर्तुंऋ
त्विकत्वेनत्वामहं वृणे ऋग्वेदः पुष्पपत्राक्षोगामंत्रः सोमदेवतः अत्रिगोत्रस्तु विप्रेंद्रऋत्विक्त्वंमेमखेभवे
वेति प्रत्येकं वृणुयात् सर्वत्रप्रथमं ब्राह्मणस्ततो होतुरितिक्रमः ततोस्मात्स्वप्रतिवचनं यजुर्वेदिनौ दक्षि
णे कातराक्षोयजुर्वेदस्त्वेष्टनोविष्णुदेवताः काश्यपेयस्तु विप्रेंद्रऋत्विक्त्वंमेमखेभवेति सामगोपश्चिमे
सामवेदस्तु पिंगाक्षोज्यागतः शक्रदेवत भारद्वाजस्तु विप्रेंद्रऋत्विकत्वंमेमखेभवेति अथर्वाणवुत्तरे वृ
हन्नेत्रो थर्ववेदोनुष्टुब्भोरुद्रदैवतः वैशंपायनविप्रेंद्रऋत्विक्त्वंमेमखेभवेति ततोजापकानांतेचाष्टा
नितिकल्पतरौ चत्वारइतिरूपनारायणादयः एतन्मतेष्टौऋत्विजः चत्वारोजापकागुरुश्चत्रयोदश अष्टौ
ऋत्विजोष्टौजापकागुरुश्चेतिसप्तदशवा अष्टौऋत्विजश्चत्वारोजापकाश्चत्वारोद्वादशयाजकागुरुश्चेतिवास

दानम.
॥३६॥

शदश॥ एवं वरणेरनंतरं तत्क्रमेणैवाचार्यादीनां मधुपर्क इति हेमाद्रिः॥ संपूज्य मधुपर्केणर्त्विजः कर्म कारयेत्
स्वभ्यर्च्य कारयेत्कर्म क्रियं विषैरेव युज्यते इति च वचनात्॥ ततो रक्षाबंधनं मंत्रेण॥ येन बद्धो बली राजा दानवेंद्रो
महाबलः॥ तेन त्वामभिबध्नामि रक्षे माचल माचल इति॥ अनेन च पीतसूत्रं यजमानतत्पत्नीगुर्वृत्विक्पा
रपालानां हस्ते रक्षार्थं बध्नीत मध्यदेशे॥ ततो गौर्यादिषोडश ब्राह्म्यादिसप्त च मातॄः॥ श्रीश्च लक्ष्मीर्धृतिर्मे
धास्वाहा प्रज्ञा सरस्वती तिवसोर्धारा देवश्च संपूज्य सपिंडमपिंडं वा वृद्धिश्राद्धं कुर्यात्॥ तत्र रूपनारायणी॥
ये विशेषः॥ अग्नौकरणमर्घ्यं चावाहनं चावजनं॥ पिंडश्राद्धे प्रकुर्वीत पिंडहीने न वर्तते॥ तथा पिंडनिर्वा
परहितं यत्र श्राद्धं विधीयते॥ स्वधावाचनलोपोस्ति विकिरस्तु न लुप्यते॥ अक्षय्यदक्षिणास्वस्तिसौमनस्यं यथा
स्थितानीति॥ तत्र संदिग्धप्रयोगः॥ सत्यवसुसंज्ञका विश्वेदेवा नांदीमुखा भूर्भुवःस्व इदं पाद्यं॥ एवं सर्वत्र पाद्यं॥ मातृपि
तामहीप्रपितामह्यः॥ नांदीमुख्यः॥ भूर्भुवःस्व इदं पाद्यमगमद्बहुदेयं च नोस्तु॥ अन्नं च नो बहु भवेदतिथींश्च
लभेमहि॥ याचितारश्च नः संतु मा च याचिष्म कंचन इति संप्रार्थ्य विप्रैर्दातारो नोभिवर्धंतां वेदाः संततिरेव च

रामः
॥५६९॥

॥ श्रद्धा च नो मा व्यगमद्बहुदेयं च वोस्तु॥ अन्नं च बहु भवेदतिथींश्च लभेध्वं॥ याचितारश्च वः संतु मा च याचिध्वं
कंचन इति प्रत्युक्ते शक्रामलकाक्षतनिष्क्रयं वा दक्षिणां दत्वा विश्वेदेवाः प्रीयंतामिति द्वैवे वाचयित्वा वाजेवाज
इति मातृपूर्वं स्थाप्या मा वाजस्य प्रसवो जगम्यादिति नांदीश्राद्धं॥ अथ वास्तुपूजा॥ योसौ वास्तौ च बलिं तु वाहारो भ
विष्यति॥ वास्तुपूजामकुर्वाणस्तवाहारो भविष्यति॥ तत्र वास्तुयजुः समुद्दिष्टस्तदा प्रच्छति शंतयइति॥ ज्ञा
नरत्नावल्यां॥ चतुःषष्टिपदं वास्तुदेवानां परमं हितं॥ एकाशीतिपदं वास्तु गृहाणां तु प्रकीर्तितं॥ प्रपंचसारे॥
कृत्वावनिसमतलां चतुरस्रं संख्यामष्टाष्टकोष्टकेपदांच स कोणसूत्रं॥ तस्य तु पदसमन्वितमध्ये
ब्रह्मासाध्य बोकरेणा समर्चनीय इत्यादि॥ अत्र प्रयोगः॥ मंडपनिर्कृति नागे हस्तमात्रां वेदिं कृत्वा तस्यां तत्रा
पितेव स्वे वास्तुवर्णादिना लाकया नवरेखा प्राक्पश्चिमायता नव च दक्षिणोदगायताः कृत्वा मध्ये कोष्टचतु
ष्टयमेकीकृत्य प्रतिकोणं त्रिषु पदेषु सूत्रं दद्यात्॥ तथा च चतुर्विंशतिः षट्पदानि संपद्यंते॥ अथ कालादि सं
कीर्त्य पारिप्सितस्यामुककर्मणः सांगतासिद्ध्यर्थं वास्तुपूजां करिष्ये इति संकल्प्य वास्तुमंडलस्याग्नेयादि

दानम.
॥३१॥ शुकेशेषु शंकुचतुष्टयं॥ विशंतु भूतलेनागा लोकपाला अवसर्वेष्ट॥ तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तमं
नैऋत्यादिपतिर्नैऋत्यां ये च राक्षसाः॥ बलिं तेभ्यः प्रयच्छामि सर्वे गृह्णंतु मंत्रितं॥ ॐ नमो वायुरक्षेभ्यो ये चान्येता
न्समाश्रिताः॥ बलिं तेभ्यः प्रच्छामि गृह्णंतु सततोत्सुकाः॥ इति मंत्रैः शंकुपार्श्वे यथाक्रमं माषभक्तबलीन्दत्वा
ग्रां तिर्यग्गोवती कांतिर्विशाला प्राणवाहिनी सती सुमना नंदा सुभद्रा इति नव प्राग्गायतरेखा देवताः पूजयि
त्वा हिरण्या सुप्रभा लक्ष्मीर्विभूतिर्विमला प्रियाजया काला विशोका इति नव दक्षिणोत्तरायतरेखा देवता।
अथ संकल्पमध्यसमस्तवाहृतिर्निर्वाप्तु पुरुषमावाह्य पूजयित्वा मातामहप्रमातामहवृद्धप्रमातामहाः नांमु
खाः सपत्नीकाः भूर्भुवः स्वः इदं पाद्यं॥ आचमनं सत्यवसुसंज्ञकानां विश्वेषां देवानां मिदमासनं॥ सुखास
नं नांदीश्राद्धे क्षणौ क्रियेतां॥ ॐ तथा प्राप्नुतां भवंतौ प्राप्नवाव॥ मातृपितामही प्रपितामह्यो नांदीश्राद्धे ७ क्ष
णौ क्रियेतां ॐ तथा प्राप्नुतां भवंतौ॥ प्राप्नवाव॥ पितृपितामहप्रपितामहानां नांदीमुखानां भूर्भुवः स्वः इदमासनं सु
खासनं नांदीश्राद्धे क्षणौ क्रीयतां ॐ तथा प्राप्नुतां भवंतौ॥ मातामहप्रमातामहवृद्धप्रमातामहानां स रामः
॥५९०॥

पत्नीकानामिदमासनं सुखासनं॥ नांदीश्राद्धे क्षणौ क्रीयतां॥ ॐ तथा प्राप्नुतां भवंतौ प्राप्नुवाव॥ ततो गंधादि
दानं॥ सत्यवसुसंज्ञकेभ्यो विश्वेदेवेभ्य इदं गंधाद्यर्चनं स्वाहा संपाद्यतां वृद्धिः॥ मातृपितामही प्रपिताम
हीभ्यो नांदीमुखीभ्य इदं गंधाद्यर्चनं स्वाहा संपद्यतां वृद्धिः॥ पितृपितामहप्रपितामहेभ्यो नांदीमुखे
भ्य इदं गंधाद्यर्चनं स्वाहा संपद्यतां वृद्धिः पीतामहप्रमातामहेभ्यो नांदीमुखेभ्यः पत्नीसहितेभ्य इदं
गंधाद्यर्चनं स्वाहा संपद्यतां वृद्धिः॥ ततः परिवेषणं कृत्वा॥ ॥ य आपोस्पृथिवीते पात्रमिति पात्रमालभ्य स
त्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण स्वाहा संपद्यतां वृद्धिः॥
मातृपितामही प्रपितामहीभ्यो नांदीमुखीभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण स्वाहा सं
पद्यतां वृद्धिः॥ पितृपितामहप्रपितामहेभ्यो नांदीमुखेभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण
संपद्यतां वृद्धिः॥ मातामहप्रमातामहवृद्धप्रमातामहेभ्यो नांदीमुखेभ्यः सपत्नीकेभ्यो युग्मब्राह्मणभोज
नपर्याप्तमन्नममृतरूपेण स्वाहा संपद्यतां वृद्धिः॥ स्वस्ति न इंद्रो वृद्धश्रवा इति पाठः॥ अनेन नांदीश्राद्धेने

दानम.
॥३८॥ कर्मांगदेवताः प्रीयतां वृद्धिः पुरुषस्त्वत्का॥ द्विजपः॥ नांदीश्राद्धं संपन्नं सुप्रोक्षितामस्तु॥ शिवा आपः संतु सौमन-
स्यमस्तु॥ अक्षतं चारिष्टं चास्तु॥ नांदीमुखा मातरः प्रीयंतां॥ नांदीमुखाः पितरः पितामहाः प्रपितामहाः प्रीयं-
तां॥ नांदीमुखाः मातामहप्रमातामहवृद्धप्रमातामहाः प्रीयंतां॥ गोत्रं नो वर्द्धतां॥ वर्द्धतां॥ मित्युक्ते दातारो नोभिवर्द्ध-
तां वेदाः संततिरेव च॥ श्रद्धा च नो मा व्यगमत्॥ वास्तोष्पते नमो बलिं समर्पयामीति पायसादिबलिं दद्यात्॥ ततः पूर्वपदद्व-
ये दक्षिणस्तने ऽर्यम्णो नमः॥ दक्षिणपदद्वये जठरदक्षिणभागे विवस्वते नमः॥ पश्चिमपदद्वये जठरवामभागे
मित्राय वामस्तने पृथ्वीधराय नमः॥ स्तुदर्कपदद्वये॥ आग्नेयकोणे सूत्रं द्विधाकृतपदद्वयोत्तरार्द्धद्वये दक्षिण
हस्ते सावित्राय॥ दक्षिणार्द्धद्वये सवित्रे च॥ एवं नैर्ऋत्यपदद्वयपूर्वार्द्धद्वय परणयोर्विवुधाधिपायात् तत्पश्चिमा
र्द्धे मेढ्रे जयंताय॥ वायव्यपदद्वयपदक्षिणार्द्धे वामहस्ते राजयक्ष्मणे॥ उत्तरार्द्धे रुद्राय॥ ईशानपदार्द्धद्वये उरसिन्य
न्यः दक्षिणार्द्धद्वये मुखे आपवत्साय॥ ततोत्तपंक्तिगते ईशानपददक्षिणार्द्धशिरसि शिखिने॥ तद्दक्षि- रामः
णसार्द्धपदे दक्षिणनेत्रे पर्जन्याय॥ तद्दक्षिणपदयोर्दक्षिणश्रोत्रे जयंताय॥ तद्दक्षिणयोर्दक्षिणांसे ॥पुरां २॥

कुलिशायुधाय॥ तद्दक्षिणयोर्दक्षिणबाहौ सूर्याय॥ तद्दक्षिणयोर्दक्षिणबाहावेव सत्याय॥ तद्दक्षिणे
सार्द्धे दक्षिणकूर्परे भृशाय॥ तद्दक्षिणनैर्ऋत्यपदार्द्धे दक्षिणप्रबाहौ आकाशाय॥ तत्पश्चिमार्द्धे दक्षिण
बाहावेव वायवे॥ तत्पश्चिमे सार्द्धे दक्षिणमणिबंधे पूष्णे॥ तत्पश्चिमयोर्दक्षिणपार्श्वे वितथाय॥ तत्पश्चि
मयोर्दक्षिणपार्श्वे एव गृहक्षताय॥ तत्पश्चिमयोर्दक्षिणोरौ यमाय॥ तत्पश्चिमयोर्दक्षिणजानौ गंधर्वाय॥ त
त्पश्चिमे सार्द्धपदे दक्षिणजंघायां भृंगराजाय॥ तत्पश्चिमे नैर्ऋत्यपदार्द्धे दक्षिणस्फिजि मृगाय॥ तदुत्तर
योः पादयोः पितृभ्यः॥ तदुत्तरे सार्द्धपदे वामस्फिजि दौवारिकाय॥ तदुत्तरयोर्वामजंघायां सुग्रीवाय॥ तदु
त्तरयोर्वामजानौ पुष्पदंताय॥ तदुत्तरयोर्वामजानौ पुष्पदंताय॥ तदुत्तरयोर्वामोरौ वरुणाय॥ तदुत्तरयोर्वा
मपार्श्वे असुराय॥ तदुत्तरे सार्द्धपदे वामपार्श्वे एव शोषाय॥ तदुत्तरे वायव्यार्द्धे वाममणिबंधे यायाय॥ तत्प्रा
गर्द्धे वामप्रबाहौ रोगाय॥ तत्प्राक्सार्द्धे वामप्रवाहवे॥ तत्प्राक्द्वये वामकूर्परे मुख्याय॥ तत्प्राक्द्वये वाम
बाहौ भल्लाटाय॥ तत्प्राक्द्वये वामबाहावेव सोमाय॥ तत्प्राक्द्वये वामांसे सर्पाय॥ तत्प्राक्सार्द्धे वामश्रोत्रे

दानम॰
॥ ३५ ॥

न्यदितै ततः प्राग्देवा मनेचेदितै तत उत्तरे वास्तोष्पत इति वास्तोष्पतिं ततो मंडलाद्बहिरीशानादिक्षु चरकीविदा
र्यै पूतनायै पापराक्षस्यै ततः पूर्वादिषु स्कंदाय अर्यम्णे जंभकाय पिलिपिच्छाय पुनः पूर्वादिषु इंद्रादीन् ततो
मंडलाद्बहिरीशाने कलशं संस्थाप्य तत्र चरुणं तत्वायामीत्यावाह्य पूजयेत् यथा मेरुगिरेः शृंगे देवानामालयः
सदा तथा ब्रह्मादिदेवानां मम यज्ञे स्थिरो भवेदिति प्रार्थयेदिति ततो मंडपदेवताभ्यः पायसबलिं दत्वा दक्षि
णपूर्वप्राग्ज इति सूक्तानि दिनामंडपं त्रिःसूत्रेणा वेष्टयित्वा वास्तुकलशोदकेन यजमानमभिषिच्य पुनः संपूजय यथाश
क्ति दक्षिणां दत्वा ब्राह्मणान् भोजयेदिति ततः उदुंबरादिसमित्तिलाज्यैः स्वतंत्रस्यं उल्लेखाविंशतिरष्टौ वा प्र
त्येकं तत्र नाममंत्रैर्हुत्वा वास्तोष्पत इति चतुर्भिर्हुत्वा ऊं वास्तोष्पते ध्रुवा स्थूणामित्यनेन च पंच बि
ल्वफलानि हुत्वा स्विष्टकृदादि पूर्णाहुत्यंतं कुर्यात्। ग्वारदाति लके। वास्तोष्पते वसिष्ठो वास्तोष्पतिस्त्रिष्टु
प्। वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः। यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विप॰ दे शं राम:
वद्विपदे शं चतुष्पदे ॥१॥ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिंदो। अजरासस्ते सख्ये स्याम ५२

पितेव पुत्रान्प्रति नो जुषस्व ॥२॥ वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या। पातु हि क्षेम उत
योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥३॥ अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशेव ए
धि नः ॥४॥ वास्तोष्पतेप्प्यमेव प्रतिष्ठामंत्रः। होमे नोक्तः। तिलाज्यादिद्रव्याणां विकल्प इति ग्रंथांतरे। इति वास्तु
पूजा। मात्स्ये उपोषितास्ततः सर्वे कृत्वैवमधिवासनमिति। पाद्मे। उपवासो भवेद्देवमशक्तो नक्तमिष्यते।
द्योधिवासनं वाथ कुर्याद्यो विकलो नर इति। अधिवासनं चैवं। शुक्लवेषः सपत्नीकः सरुक्को यजमानः पू
र्णकलशं गृहीत्वा नंदं करोमीत्यादिमंत्रघोषेण मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्य देशकाला
दि स्मृत्वा करिष्यमाणे तत्कर्मांगतया मंडपदेवतास्थापनादि करिष्य इति संकल्प्य गणपतिं संपूज्य मंडपांतः सर्व
तः सर्षपान् विकिरेत्। तत्र मंत्रः। यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा। स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं त
त्र गच्छतु। अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं। सर्वेषामविरोधेन ब्रह्मकर्म समारभे। इति। ततः कुशैः
पंचगव्येन सर्वत्रापो हि ष्ठेति तृचेन प्रोक्षेत् ततः स्वस्ति न इति मंत्रं पठेत्। अथ द्वारपूजा। पूर्वद्वारश्रियेन

दानम्·
॥४०॥

मः। ॐ ध्रुं दिह ल्वैस्त्र्यधः वामदक्षिणस्तंभयोर्गणेशाय स्कंदाय नमः। द्वारस्थितकलशद्वये गंगायै यमुनायै। दक्षिण
द्वारश्रियै। ऊ ध्रुं देह ल्वैस्त्र्यध। स्तंभयोः पुष्पदंताय कपर्दिने। कलशद्वये गोदायै कृष्णायवि ति। पश्चिमद्वा
रे द्वारश्रियै इत्य ध्रुं देह ल्वैस्त्र्यधः स्तंभयोः नंदिने चंडाय। कलशयेद्वेवायै ताप्यै। उत्तरे द्वारश्रियै ऊ ध्रुं दिहलै
स्त्र्यधः। स्तंभयोर्महाकालाय भृंगिणे नमः। कलशद्वये वाण्यै वेण्यै इति द्वारपूजा। ततः पूर्वे बहिर्हस्तमात्रे वटतो
रणमाश्वत्थं वास्तुहृदनामकं सुशोभननामकं वा शंखांकितमग्निमीले इति मंत्रेण न्यस्य संपूज्य राहुकहस्त
ती तत्र न्यसेत् संपूजयेच्च। तत्रैकः कलशः स्थाप्यः। तत्र मही द्यौरिति भूप्रार्थना। ओषधयः समिति यवप्रक्षेपः। आ
कलशे क्षितिकलशनिधानं। इमं मे गंगे इति जलपूरणं। गंधद्वारामिति गंधं प्रक्षिपेत्। या ओषधीरिति सर्वौ
षधीः। कांडात्कांडादिति दूर्वा। अश्वत्थे व इति पंचपल्लवान्। स्योना पृथिवीति पंचमृदः। याः फलिनीरिति
फलं। सहिरत्नानीति पंचरत्नानि। हिरण्यरूप इति हिरण्यं। युवा सुवासा इति वस्त्रादिना वेष्टयेत्। पूर्णादर्
वीति धान्यपूर्णपात्रं परिनिदध्यात्। तत्र ध्रुवावाहनं पूजनं। तत्र ततो दक्षिणे औदुंबरं शाखं वास्तुभद्रं किं रामः

॥५१॥

टं वा चक्रांकितं तोरणमिषे त्वोर्जे त्वोर्जे त्वेति निधाय चंदनादिचर्चितं कृत्वा सूर्यमंगारकं तत्र न्यसेत्। ततः पू
र्ववत्कलशं स्थापयित्वा तत्र धरामावाह्यार्चयेत्। ततः पश्चिमे प्लाक्षमौदुंबरं वास्तुकर्मसुनामं वा गदांकितं
तोरणं अग्न आयाहीति न्यस्य चंदनादिनाचर्चितं कृत्वा शुक्रं बुधं च तत्र न्यसेत्। ततः पूर्ववत्कलशं स्थाप
यित्वा तत्र वायव्यावाहनपूजनादि। तत उत्तरे नैयग्रोधमाश्वत्थं पालाशं वास्तुहृद्रं सुभद्रं वा पद्मांकितं तो
रणं शंनो देवीरिति निधाय पूजितं कृत्वा सोमं शनिं च तत्र न्यसेत्। तत्र कलशं स्थापयित्वा तत्र विघ्नेशा
वाहनपूजनादि। ततः पूर्वद्वारे द्वारशाखाद्वये कलशद्वयं ध्वजतादियुक्तं पूर्ववत्स्थापयेत्। ऐरावतं क
लशद्वये न्यस्यार्चयेत्। तत्र पूर्वस्मिन् ऋग्वेदिनौ ऋत्विजौ द्वारे कं वा शांतिसूक्तपाठत्वेन त्वामहे वरुणे इ
ति प्रत्येकमृग्वेदः पद्मपत्राक्ष इति दत्वाग्निमीले इत्यादिना पूजयेच्च। तत ऐह्येहि सर्वामरसिद्धैरभीष्टतो वज्र
धरोमरेश। संवीज्यमानो प्सरसां गणेन रक्षाध्वरं नो भगवन्नमस्ते। नो इंद्र इहागच्छेह तिष्ठेति इंद्रसांगं सपरि
वारं सायुधं शक्तिकं द्वारकलशे आवाह्य त्रातारमिंद्रमिंद्रमिति पूजयित्वा अभ्युः क्षिशान इति पीतो पता

दानम०
॥५१॥

कांपीतचं ध्वजमुच्छ्रुपेत्॥ ततऐरावतस्थं पीतवर्णं सहस्राक्षं किरीटिनं दक्षिणवामहस्तस्थवज्रोत्पलमिंद्रं ध्या
त्वा इंद्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः॥ शतयज्ञाधिपो देवस्तस्मै नित्यं नमो नम इति नत्वा॥ इंद्राय सांगा
य सपरिवाराय सायुधाय सशक्तिकायैतं माषभक्तबलिं समर्पयामीति दद्यात्॥ ततश्चाचाम्याग्नेयकोणे ग
त्वा पूर्ववत्कलशं स्थापयित्वा तत्र पुंडरीकमष्टं तं च संपूज्य॥ एह्येहि सर्वामरहव्यवाहमुनिप्रवीरैरभितोभिजुष्टते
जोवता लोकगणेन सार्द्धं ममाध्वरं पाहि कवे नमस्ते॥ ओं अग्नेइहागच्छेह तिष्ठेति सांगादिकमग्निं कलशे॥
स्थावाह्य त्वं नो अग्ने इत्यग्निं संपूज्य अग्निं दूतमग्निं दूतमिति रक्तां पताकां रक्तं ध्वजं चोच्छ्रयेत्॥ ततः छागस्थर
क्तं दक्षिणवामकरधृतशक्तिकमंडलुं यज्ञोपवीतिनमग्निं ध्यात्वा॥ आग्नेयः पुरुषो रक्तः सर्वदेवमयो व्ययः॥
धूमकेतू रजोध्यक्षस्तस्मै नित्यं नमो नम इति नत्वा अग्नये सांगायेत्यादि एतं माषभक्तबलिं समर्पयामीति बलिं
दद्यात्॥ ततः कृताचमनो दक्षिणे गत्वा प्रतिद्वारशारवं पूर्ववत्कलशद्वयं स्थापयित्वा वामनं दिग्गजं तत्रार्चये
त्॥ ततो यजुर्वेदिनौ द्वावेकं वा दक्षिणद्वारे शांतिसूक्तजपार्थं त्वेन त्वा महं वृणे इत्युक्त्वा कातराक्षो यजुर्वेदे इत्युक्त्वा

राम:
॥५८॥

प्रत्येकं संप्रार्थ्य इषे त्वोर्जे त्वेति प्रजपेत्॥ ततर्ध्रा ह्येहि वैवस्वत धर्मराज सर्वामरैरर्चित धर्ममूर्ते॥ शुभाशुभा
नंद शुचामधाराः शिवाय नः पाहि मखं नमस्ते॥ ओं यमेहागच्छेह तिष्ठेति सांगादिं यममावाह्य यमाय सोममि
ति गंधादिभिः पूजयित्वा कृष्णां पताकां कृष्णं च ध्वजं पंचहस्तदंडमायं गोशितिउच्छ्रयेत्॥ ततो महिषारूढं धृतदं
डपाशं दक्षिणवामकरं अंजनपर्वततुल्यं रूपमग्निसमलोचनं यमं ध्यात्वा महामहिषमारूढं दंडहस्तं महा
बलं॥ आवाहयामि यज्ञेस्मिन् पूजेयं प्रतिगृह्यतामिति नत्वा सांगाय यमायैतं माषभक्तबलिं समर्पयामीति ब
लिं दद्यात्॥ ततश्चाचम्य नैर्ऋत्यां पूर्ववत्कलशं स्थापयित्वा कुमुदं गजं उर्जं पंच संपूज्य एह्येहि रक्षोगणनायक
त्वं विशालवेतालपिशाचसंघैः॥ ममाध्वरं पाहि पिशाचनाथ लोकेश्वर त्वं भगवन्नमस्ते॥ ओं निर्ऋते इहागच्छे
ह तिष्ठेति सां मावाह्य सुन्वंतमिति संपूज्य नीलां पताकां ध्वजं च मोक्षणाय इत्युच्छ्रित्य नरारूढं खड्गहस्तं नील
वर्णं महाबलं महाकायं बहुराक्षससंयुतं निर्ऋतिं ध्यात्वा निर्ऋतिः खड्गहस्तं च सर्वलोकैकपावनं॥ आवाहया
मि यज्ञेस्मिन् पूजेयं प्रतिगृह्यतामिति नत्वा सांगाय निर्ऋतये एतं माषभक्तबलिं दद्यात्॥ ततश्चाचम्य पश्चिमे

॥४२॥ प्रतिहारस्त्रगरवाकलशाद्दयं पूर्ववन्निधायाजनदिग्गजं न्यस्यार्चयेत्॥ ततः साम गायत्त्विजौ ऋत्विजं वा द्वत्वा सा
मवेदस्तु पिंगाक्षो जागतः शाक्रदैवत॥ नरवाजस्तु विप्रेंद्र शांतिपाठं मखे कुर्विति प्रार्थयित्वा च पश्चिमायां द्वा
ति प्राप्य॥ एह्येहि यादोगणवारिधीनां गणेन पर्जन्यसहाप्सरोभिः॥ विद्याधरेंद्रामरगीयमान पाहि त्वमस्मा
न्भगवन्नमस्ते इत्युक्त्वा ओं वरुण इहागच्छ इह तिष्ठेति सांगं वरुणमावाह्य तत्वायामीति संपूज्य श्वेतां पताकां
ध्वजं चेमं मे वरुणेति उच्छ्रितमकारस्थं पाशहस्तं किरीटिनां श्वेतवर्णं च वरुणं ध्यात्वा पाशहस्तं च वरुणं याद
सां पतिं प्रभो इति बलिं दद्यात्॥ ततो पउपस्थेशावायव्यां पूर्ववत्कलशं संस्थाप्य पयित्वा पुष्पदंतं मिद्धार्थं च तत्र पूजयित्वा
रक्ष मां प्रभो आवाहयामि यज्ञेऽस्मिन् वरुणायन मोनम इति नत्वा सांगाय वरुणायैतं माषभक्तबलिं समर्पयामि
एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढः सह सिद्धसंघैः॥ प्राणाधिपः कालकवेः सहाय गृहाण पूजां भगवन्नमस्ते
ओं वायो इहागच्छ इह तिष्ठेति सांगादिं वायुमावाह्य तव वायवे ह्यस्पते इति संपूज्य धूम्रां पताकां ध्वजं चो राम:
च्छ्रितमृगारूढं चित्रांबरधरं युवानं वरवामहस्तं वायुं ध्यात्वा वायुमाकाशगं चैव यवनं चैव सर्ज इति आवाहया ॥५९५॥

मि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यतां॥ अनाकारो महौजाश्वाद्गगतिर्दिवि॥ ततस्मै पूजायजगते वायवे ह नमामि
ते इति नत्वा सांगाय वायवे एतं माषभक्तबलिं समर्पयामीति बलिं दद्यात्॥ ततश्चाचम्योत्तरे प्रतिहारस्त्रा
व्वंकलशाद्दयं संस्थाप्य पयित्वा सार्वभौमं दिग्गजं न्यस्य पूजयेत् तत्वाथर्ववेदाद्दृत्विजं कृत्विजं वा उत्तरद्वारे शां
तिसूक्तजपार्थं त्वेनाहं वृणे इति उक्त्वा ह हस्तेनोथर्ववेदेन छंदोरुद्रदैवत॥ वैशंपायनविप्रेंद्र शांतिपा
ठं मखे कुर्वित्युक्त्वा प्रार्थ्य शान्तो देवा इति पूजयेत्॥ एह्येहि यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्द्धं
सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते॥ ओं सोम इहागच्छ इह तिष्ठेति सांगं समावाह्य वयं
सोम इति संपूज्य हरितां पताकां ध्वजं चाप्यायस्वेति स्थिरतनस्पनरयुत विमानस्थं कुंडलहारकेयूरशोभितं
वरगदाधरदक्षिणवामहस्तं सुकुटिनं महोदरं स्थूलकायं ह्रस्वं पिंगनेत्रं पातविमूहं शिवसखं वायव्यं कुवेरं
ध्यात्वा सर्वनक्षत्रमध्ये तु सोमो राजाव्यवस्थितः॥ तस्मै सोमाय देवायनक्षत्रयतये नम इति नत्वा सांगाय
सोमायैतं माषभक्तबलिं समर्पयामीति बलिं दद्यात्॥ ततईशान्यां गत्वा चम्य पूर्ववत्कलशं संस्थाप्य प्रसुप्र

होनम·

॥५३॥

तीकनामानंहिगाजंमंगलं च तत्र पूजयित्वा एह्येहि विश्वेश्वर नस्त्रिशूलकपालखट्वांगधरेण सार्द्धं लोकेयज्ञेश्व
र यज्ञभागं गृहाण पूजां भगवन्नमस्ते । ईशानेहागच्छेह तिष्ठेति आवाह्य तमीशानमितिसंपूज्य मध्ये तां सर्व
वर्णां वा पताकां ध्वजं चा । भित्वादेवसत्वादेवसवितइति चो । च्छ्रित्य अष्टमूर्त्तिधरं वरदं त्रिशूलयुतदक्षिणवा
म हस्तद्वयं त्रिनेत्रं शुद्धस्फटिकवर्णं ईशानं ध्यात्वा वृषस्कंदसमारूढं शूलहस्तं त्रिलोचनं । आवाहयामि य
ज्ञेस्मिन्पूजेयं प्रतिगृह्यतां । सर्वाधिपो महादेव ईशानः शुक्ल ईश्वरः । शूलपाणिर्विरूपाक्षस्तस्मै नित्यं नमो नम
इति न त्वा सांगायेशानायैतं माषभक्तबलिंसमर्पयामीति बलिं दद्यात् । ततः आचम्येशानपूर्वयोर्मध्ये गत्वा
एह्येहि पातालधरामरेंद्र नागांगनाकिंनरगीयमान यक्षोरगेंद्रामरलोकसंघैरनंतरक्षाध्वरमस्मदीयं । मोत्र
नंत इहागच्छेह तिष्ठेति सांगमनंतमावाहयं गौरितिसंपूज्य मेघवर्णं मध्ये तां वा पताकां ध्वजं चापं योरित्यु
च्छ्रित्याऽनंतेशायनानेफणासप्तकमंडितं । पद्मशंखधरो ध्वोधो दक्षिणकद्वयं चक्रगदाधरो ध्वोधो वामकरद्व
यं नीलवर्णमनंतं ध्यात्वा योमावनंतरूपेण ब्रह्मांडं सचराचरं । पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नम इति न

रामः

॥५९६॥

त्वा सांगायानंतायैतं माषभक्तबलिं समर्पयामीति बलिं दद्यात् । ततः आचम्य नैरृत्यपश्चिमयोर्मध्ये गत्वा
एह्येहि सर्वाधिपते सुरेंद्र लोकेन सार्द्धं पितृदेवताभिः । सर्वस्य धातास्यमितप्रभावो विशाध्वरं नः सततं
शिवाय । भो ब्रह्मन्निहागच्छेह तिष्ठेति ब्रह्माणमावाह्य ब्रह्मजज्ञानमितिसंपूज्य रक्तां पतांकां ध्वजं च
ब्रह्मजज्ञानमित्युच्छ्रित्य चतुर्मुखं हंसारूढं अक्षसमालाकुशमुष्टिधरो ध्वोधो दक्षिणकरद्वयं स्रुवकमंडलु
धरौ ध्वौधो वामकरद्वयं श्मश्रुलं जटिलं लंबोदरं रक्तवर्णं ब्रह्माणं ध्यात्वा पद्मयोनिश्चतुर्मूर्त्तिर्वेदावासः पि
तामहः । यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमो नम इति न त्वा सांगाय ब्रह्मणे एतं माषभक्तबलिं समर्पयामीति
बलिं दद्यात् । नैरृत्यपश्चिमांतरालेऽनंतबलिदानं ईशानपूर्वांतराले ब्रह्मबलिदानं चेति रूपनारा
यणः । ततः आचम्य मंडपमध्ये ऽसुवर्दंडो दशहस्तदीर्घस्त्रिहस्तविस्तृतः । पंचहस्तदीर्घो हस्तविस्तारो
वा महाध्वजः । किंकिणिकादियुक्तं इंद्रस्य वज्र इति स्थाप्य । तत्रैव ब्रह्मपूजनं च । ततो मंडपषोडशस्तंभेषु सर्वेभ्यो
देवेभ्यो नमः वंशोपुकिन्नरेभ्यो नमः दृष्टेपन्नगेभ्यो नमः इत्यर्चयेत् । ततः पूर्वभागे उपलिप्य मध्ये मावुप विक्षपत्रैर्लो

दानम.

॥५५॥

भूतानि चरतानि स्थावराणि चराणि च। ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वंतु तानि मे। देवदानवगंधर्वा यक्षराक्षसप
न्नगाः। ऋषयो मनवो गावो देवमातर एव च। सर्वे मम अध्वरे रक्षां प्रकुर्वंतु मुदान्विताः। ब्रह्मविष्णुमहेश्व
क्षेत्रपालो गणैः सह। रक्षंतु मंडपं सर्वे घ्नंतु रक्षांसि सर्वतः इति पवित्वा त्रैलोक्यस्थेभ्यः स्थावरेभ्यो भूतेभ्यो
नमः त्रैलोक्यस्थेभ्यश्चरेभ्यो भूतेभ्यो नमः। ब्रह्मणे विष्णवे शिवाय देवेभ्यो राक्षसेभ्यो पन्नगेभ्य ऋषिभ्यो मनु
भ्यो गोभ्यो देवमातृभ्यो नमः इति प्रत्येकं संपूज्य भूमौ माषभक्तबलिं दद्यात्। ततो यजमानः सर्वैः ऋत्विग्भिः
सह प्राग्द्वारेण मंडपं प्रविश्य दक्षिणद्वारपश्चिमभागे उपविश्य गुरुं वदेद्यथाविहितं कर्म कुरुष्वेति व
देत्। प्रतिकुंडमेकैकः कलशो ऋत्विग्भिः स्थाप्य इति केचित् गुरुणा स्थाप्य इत्यन्ये। ततो होता ऋग्वेदादिक्रमा
त् पूर्वादिदिक्कुंडेषु ऋत्विजो निस्थापयेयुः। ततो दक्षिणादिक्कुंडे गुरुर्यजमानान्वितो ग्रहवेद्यां सर्वतोभद्रमंडले
देवताः स्थापयेदिति पितामहचरणाः। यथा अद्येत्यादि० मंडलदेवतास्थापनं करिष्य इति संकल्प्य स्थाप
येत्। तत्र मध्ये ब्रह्माणं। ब्रह्मजज्ञानं ततउदीचीमारभ्य वायवीपर्यंतं। गौतमो वामदेवो ब्रह्मा त्रिष्टुप् ब्रह्मस्था

दानः

॥५५॥

पने पूजने विनियोगः। एवमुत्तरस्यां घायंतान् अष्टौ लोकपालान्। तत्राप्यायस्व गौतमः। सोमो गायत्री। ॐ आ
प्यायस्व। अग्निर्त्वा जगती शुनःशेफो इंद्राग्नी गायत्री। ॐ अग्निस्त्वा देवसवितः। ३। इंद्रं वो मधुछंदा इंद्रो गायत्री
ॐ इंद्रं वो विश्वतः। ४। अग्निं कण्वो मेधातिथिरग्निर्गायत्री। ॐ अग्निं दूतं वृणीमहे। ५। यमाय सोमं यमो अनु
ष्टुप् ॐ यमाय सोमं। ६। मो षूणो घोरः कण्वो निर्ऋतिर्गायत्री ॐ मो षूणः। ७। तत्वा यामि शुनःशेफो वरुणस्त्रिष्टु
प्। ॐ तत्वा यामि। ८। वायो शतं गौतमो वामदेवो वायुरनुष्टुप्। वायो शतं। ९। वायुसोममध्ये अष्टौ वसवस्तत्र
या वां क्षत्रं मैत्रावरुणो वसिष्ठो वसवस्त्रिष्टुप्। ॐ या वां क्षत्रं। १०। सोमेशानमध्ये एकादशरुद्रान्। आ रुद्रासस्त्वा वा
मराका दशरुद्रा जगती ॐ आ रुद्रासः। ११। ईशानेंद्रमध्ये द्वादशादित्यान्। त्यान्नु संमदो मत्स्यो द्वादशादित्या गा
यत्री। ॐ त्यान्नु क्षत्रियान्। १२। इंद्राग्निमध्ये अश्विनौ। अश्विना रागणो गौतमो अश्विनावुष्णिक्। ॐ अश्विनावर्ति
ः। १३। अग्नियममध्ये विश्वेदेवान् सपैतकान्। ओमासो मधुच्छंदा विश्वेदेवा गायत्री। ॐ ओमासः। १४। यमनि
र्ऋतिमध्ये सप्तयक्षान्। अभित्यं वामदेवः सप्तयक्षाः प्रकृतिः। ॐ अभित्यं देवं। १५। निर्ऋतिवरुणमध्ये भूतना

दानम.
॥४५॥

मान् आयंगो: सार्पराज्ञीस र्पो गायत्री॥ ॐ सर्पयंगो॥ २६॥ वरुणवायुमध्ये गंधर्वाप्सरस॥ अप्सरसौमैत सरू।
ष्पग्नंगो गंधर्वाप्सरसोनुष्टुप्॥ ॐ अप्सरसां गंधर्वाणां॥ २७॥ ब्रह्मसोममध्ये स्वंदनं दीप्यर सूलमहाकाला
न्॥ कुमारं कुमार: स्कंदस्त्रिष्टुप्॥ ॐ कुमारं माता:॥ २८॥ ऋषभ मध्ये षश्नौ वैराजो ऋषभोनुष्टुप्॥ ॐ ऋषभ नमा॥ २९॥
ब्रह्मेशानमध्ये दक्षादीन् सप्त॥ आदितिर्लो को बृहस्पति र्दक्षोनुष्टुप्॥ ॐ अदितिर्ह्यजनि ष्ठ०॥ २०॥ ब्रह्मेंद्र म
ध्ये दुर्गां विष्णुं च॥ तामग्निवर्णां सौच रिर्दुर्गा त्रिष्टुप्॥ ॐ तामग्निवर्णां इदं विष्णु: कण्वो मेधातिथि र्विष्णुर्गायत्री॥
ॐ इदं विष्णु:॥ २२॥ ब्रह्माग्निमध्ये स्वधां॥ उदीरतां शंख: स्वधा त्रिष्टुप्॥ ॐ दीरतां शंख: स्वधा त्रिष्टुप्॥ ॐ उदीरता
मन्वता:॥ २३॥ ब्रह्मयममध्ये मृत्युरोगान्॥ परं मृत्यो संकुसुको मृत्युरोगा त्रिष्टुप्॥ ॐ परं मृत्यो अनु॥ २४॥ ब्रह्म
निऋतिमध्ये गणपति॥ गणानां त्वा गृत्समदो गणपति र्जगति ॐ गणानां त्वा॥ २५॥ ब्रह्मवरुणमध्ये अप॥
शन्नोवरी षसिंधुद्वीप आपो गायत्री॥ ॐ शन्नो देवी:॥ २६॥ ब्रह्मवायुमध्ये मरुत:॥ मरुतो यस्य रा हूगणो तमो मरु
तो गायत्री॥ ॐ मरुतो यस्य॥ २७॥ ब्रह्मणा: पादमूले वा र्णिका॥ ध: पृथ्वी स्यो नामेधातिथि र्भूमिर्गायत्री॥ ॐ स्यो

दानम:
॥५[illegible]॥

ना पृथिवी॥ २८॥ तत्रैव गंगादिनदी॥ इमं मे सिंधुक्षित्रैयमेधो गंगायमुना सरस्वत्यो जगती॥ ॐ इमं मे गंगे
॥ २९॥ तत्रैव सप्तसागरान्॥ धाम्नो धाम्नो राजन्नितो वरुण नो मुंच॥ यदापो अघ्न्या इति वरुणेति शपामहे त
तो वरुण नो मुंच॥ मयि का पामोषधा हिंसा रतो विश्वस्य चान्नत्वेतो वरुण नो मुंच॥ ३०॥ तदुपरि मरुंना आपूज
येत्॥ वाह्ये सोमादि समीपेक्रमेणायुधानि॥ गदां॥ त्रिशूलं॥ वज्रं शक्तिं दंडं खड्गं पाशं॥ अंकुशं॥ ततो होत्तरादि
त॥ गोतम भरद्वाज विश्वामित्र कश्यप जमदग्नि वशिष्ठ अत्रि अरुंधती॥ ततो होपूर्वादि॥ ऐंद्री कौमारी॥ ब्रा
ह्मी वाराही॥ चामुंडा वैष्णवी माहेश्वरी विनायकी॥ इत्यष्टौ शक्तय: प्रतिष्ठाप्य प्रत्येकं सह वा पूजयेत्॥ तत
स्तस्यामेव वेद्यां वस्त्र लिखित वक्ष्यमाणमंडले यज्ञादिदेवता: स्थापयेत् पूजयेच्च॥ अस्मिन् कर्मणि यज्ञा
दिस्थापनं पूजनं च करिष्य इति संकल्प्य॥ प्रणवस्य ब्रह्मा ऋषि: परमात्माग्नि र्वा देवता देवी गायत्री छं
द व्याहृतीनां क मदग्निभरद्वाजभृगवो ऋषय:॥ अग्निवायुसूर्या देवता दैवी गायत्री दैवी त्रिष्टुप् दैवी बृहत्य
श्छंदांसि त्र्यां धा वाहने विनियोग:॥ केचित्तन्मंत्रावाहने आहु तत्र यज्ञपा ग्न मध्ये वर्तुले पाशुरं स्वस्वं पं रक्त

दानमः

॥४६॥ पुष्पाक्षतैः। आकृष्णेन हिरण्यस्तूपः सविता त्रिष्टुप् सूर्यावाहने वि०। ॐ आकृष्णेन रजसा०। ॐ भूर्भुवःस्वः
कालिंगदेशोद्भव काश्यपसगोत्र सूर्य इहागच्छेत्यावाह्य इह तिष्ठेति स्थापयेत्। एवं सर्वत्र मंत्रांते व्याहृती
रुच्चार्य इहागच्छ इह तिष्ठेति स्थापयेत्। ततः आग्नेये चतुरस्रे प्रत्यङ्मुखं सोमं श्वेतपुष्पाक्षतैः। आप्यायस्व गो
तमः सोमो गायत्री यमुनातीरोद्भव आत्रेयगोत्र सोम इह०। ततो दक्षिणे त्रिकोणे दक्षिणामुखं भौमं रक्तपुष्पाक्षतैः
अग्निर्मूर्धा विरूप अंगारको गायत्री०। अवंतीसमुद्भव भारद्वाजसगोत्र भौम०। ततः ईशाने बाणाकारे बुधमु
दङ्मुखं पीतपुष्पाक्षतैः उद्बुध्यध्वं बुधः सौम्यो बुधस्त्रिष्टुप्। मगधदेशोद्भव आत्रेयसगोत्र बुध०। ततः उत्तरतो
दीर्घचतुरस्रे उदङ्मुखं बृहस्पतिं पीतपुष्पाक्षतैः। बृहस्पते गृत्समदो बृहस्पतिस्त्रिष्टुप्। सिंधुदेशोद्भव आंगि
रसगोत्र बृहस्पते०। ततः पूर्वे पंचकोणे प्राङ्मुखं शुक्रं शुक्लपुष्पाक्षतैः शुक्रः पाराशरः शुक्रो द्विपदा विराट्। भो
जकटदेशोद्भव भार्गवसगोत्र शुक्र इह०। ततः पश्चिमे धनुषि प्रत्यङ्मुखं शनिं कृष्णपुष्पाक्षतैः। शमग्निरिरिम्बि
ठिः शनिरुष्णिक् सौराष्ट्रज काश्यपसगोत्र शनैश्चर०। ततो नैर्ऋते शूर्पाकारे दक्षिणामुखं राहुं कृष्णपुष्पाक्षतैः। क

रामः ॥५०॥

यानो वामदेवो राहुर्गायत्री राहावाहने०। राठिनापुरोद्भव पैठीनसिगोत्र राहो०। ततो वायव्ये ध्वजाकारे दक्षिणा
मुखं केतुं धूम्रपुष्पाक्षतैः केतुं मधुच्छंदाः केतवो गायत्री०। अंतर्वेदिसमुद्भव जैमिनिसगोत्र केतो। सर्वे च
आदित्याभिमुखाः। अथाधिदेवताः। श्वेतपुष्पाक्षतैः क्रमात् सूर्यादीनां दक्षिणतः स्थाप्याः। त्र्यंबकं वसिष्ठो
रुद्रोनुष्टुप् विनियोगः सर्वत्र ज्ञेयः। त्र्यंबकं०। ॐ भूर्भुवः स्वः ईश्वर०। गौरीर्मिमाय दीर्घतमा उमा जगती सोमद
क्षिणे। यदक्रंदो दीर्घमाः स्कंदस्त्रिष्टुप्। विष्णोर्दीर्घतमा विष्णुस्त्रिष्टुप्। ब्रह्मजज्ञानं गौतमो वामदेवो ब्रह्मा त्रि
ष्टुप्। इंद्रं वो मधुच्छंदा इंद्रो गायत्री। यमाय सोमं यमोनुष्टुप्। मो षु णो घोरः कण्वः कालो गायत्री। तपो वा ते प्र
स्क एवं स्वित्रयुग्मो बृहती। एवमेव शुक्लपुष्पाक्षतैः ब्रह्माणं वामपार्श्वे ते व्याहृतिरिहागच्छेति चोक्त्वा प्रत्यधि
देवताः स्थापयेत्। अग्निं कण्वो मेधातिथिरग्निर्गायत्री०। ॐ अग्निं दूतं०। अप्सु मे धातिथिरापो अनुष्टुप्। स्योना
मेधातिथिर्भूमिर्गायत्री०। इदं विष्णुर्मेधातिथिर्विष्णुर्गायत्री०। इंद्र श्रेष्ठानि गृत्समद इंद्रस्त्रिष्टुप्०। इंद्राणी वृषा
षोपि वा॥ पुमान्प्रद्युम्नवत्सस्यान्नारी स्यात्पार्वती समेति॥ तुलादानस्य सर्वस्य विधिरेष उदाहृतः॥ इति रू
प्यादि तुलादान विधिः॥ अथ रूप्यादि तुलादान प्रयोगः॥ तत्र रूप्यक पूर्वतुलयोः सुवर्णतुलाफलमेवा इति
कर्तव्यतापि पहेसैव रहस्तु जायामपि तदेव फलं॥ फलेषु च तेषु वितेषु विशेषाः केचित्॥ तत्र गंधवस्त्रे कुंकुमे
लवणे गुडे मधूनि वसौभाग्यं वस्त्रेषु वस्त्रप्राप्तिश्च लवणे लावण्यं कुंकुमे भर्तृवियोगश्च सर्वरोगेषु लोहं
पुष्पमणिकांस्यं॥ अर्शास त्रपु अपस्मारे सीसं॥ कुष्टे ताम्रं रक्तपित्ते पित्तलं॥ प्रदरश्लेष्मयोः रूप्यं सर्वरोगेषु म
स्तु निवारणार्थं चु सुवर्णं महद् एणं फलं॥ भस्मके सर्वरोगे च गुडं॥ गंडमालासु पूगफलं॥ अग्निमांदे काष्ठं॥ वा
युजे रोमनाशे पुष्पं॥ कसथ सतजलोदरेषु मधुच्छर्दौ घृतं तेजोवृद्ध्यर्थं चापि तैलं क्षीरं संतापनिवृत्तं च॥ भगंदरेद
धि कंप्ये लवणं॥ दद्रुणि पिष्टं सर्वरोगेषु अन्नं॥ शर्करया सापत्न्यां चंदनेन सौदर्य्यं सर्वासु वस्तुजातसु सर्वाणि फलानि
अत्र तत्फलकामस्य तद्योगनिवृत्तिकामस्य वा तत्तद्वस्तु लाज्ञेया॥ अथ तत्तद्वेषु देवता॥ लोहे महे महाभै
रवः॥ कांसे पूषाश्विनौ वासासे वायुः॥ ताम्रे सूर्यः॥ पित्तले कुजः॥ रूप्ये पितरः॥ सुवर्णे सर्वे देवताः॥ फले सोमः॥ ग

डे आसः॥ तांबूले विनायकः॥ पुष्पे गंधर्वाः काष्ठेग्निः॥ मधुफ नियक्षाः॥ घृते मरुत्जप॥ क्षारे तारागणाः॥ दध्नि सर्पाः॥ पि
ष्टे प्रजापतिः॥ अन्ने सर्वताः॥ तुलातुलाकैंपुटे देवदारुआपणे॥ बिल्वकदंबकांचनादिकाष्ठमयी चतुरस्रा द
शांगुलस्तत्र वेष्टनस्थला वर्तुला प्रतये॥ मध्ये च षडंगुलमित चतुरस्रा कार्या॥ तस्याः षडंगुलयोरधो भागे
च उभयोः कृतिकटकद्वयं निवेश्यं॥ मध्ये वोर्ध्वभागे एकं॥ तस्योतयोतरश्चतुर्विंशतिव धातुमयानि वेश्यपाः॥
एवं फलकद्वयमपि पंचतुः सार्द्धत्रिपादेशमितं व्यासवत्र चतुरस्रं वा पंच चतुरंगुलोच्छ्रितप्रांते वं धनार्थं त्रि
शिखतुर्भिर्वा करकैर्युतं कार्यं॥ अथ सांप्रदायिक प्रयोगः॥ कर्त्ता मासपक्षाद्युल्लिख्यामुकफलकामेमु
करोगगणनिवृत्तिकामः॥ सर्वत्र गौरीसदरमुत्पप्राप्तिशोकदुर्गतिनिवृत्तिकाम ईश्वरप्रीतिकामो॥ कवामु
कतुलादाने करिष्ये इति संकल्प्य गणेशपूजाचार्यवरणं तत्पूजनादि कुर्यात्॥ स्वस्तिवाचनमातृकापूजाभ्युदयि
कश्राद्धान्यप्यति केचित्॥ ततआचार्येपि दत्त्वयंमंस्थितमितिसर्षपान्विकीर्य भूचावोहवेतिल्वेन॥ एतोन्वि
द्रमितितिरचेनापोहिष्ठेत्यादिभिः॥ कर्मभुवं संप्रोक्ष्य स्वस्त्ययनं तार्क्ष्यमिति मंत्रद्वयं जप्त्वा पूर्वोक्तामहाभैरवादि

तत्र द्वयदेवतां गोविंदं सूर्यं धर्मराजं च प्रतिमाचतुष्टये पूजयेत् तुलां गंधपुष्पादिभिरलंकृत्य तस्यां धातुमयेषु स्व
र्णमयेषु वा चतुर्विंशति वंधेषु देवता आवाह्य पूजयेत्॥ तास्वइंद्रः॥ शशी॥ मारुतः॥ रुद्रः॥ सूर्य॥ विश्वकर्मा॥ गुरु
:॥ अग्निरीशः प्रजापतिः॥ विश्वेदेवाः॥ जगद्धिधाता॥ पर्जन्यश्चांभः॥ पितृदेवताः॥ सौम्यः॥ धर्मः॥ अमरराजः॥ अश्विनौ॥ ज
लेशः॥ मित्रावरुणौ॥ मरुद्गणाः॥ निधेशः॥ गंधर्वाः॥ जलेशः॥ विष्णुरिति॥ २४ ततस्तुलांतत्रं गार्हिषुबद्धा फल
कद्वयं तपावलंबे पथाक्रमेविंतितिमात्रमुखं भव तिगोविंदप्रतिमा च हेमपंटरवलयामुक्ताद्यास्त्रांतरेणवाब
दशांगुलेन तुलामध्ये वलंबनीया॥ ततो यजमानः पुष्पांजलिं गृहीत्वा तुलां त्रिः प्रदक्षिणां कृत्वानुमंत्रयेत्॥ ॐ नम
स्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता॥ साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना॥ एकतः सर्वसत्यानि तथान्
तशतानि च॥ धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिते॥ त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता॥ मां तोलयंती सं
साराद्रुद्धरस्व नमोस्तुते॥ योसौ तत्त्वाधिपो देवः पुरुषः पंचविंशकः॥ स एषोधिष्ठितो देवि त्वयि तस्मान्नमो नमः इति
त तोनमो नमस्ते गोविंद तुलापुरुषसंज्ञक त्वं हरेतारयस्व॥ स्यात्तस्मात्संसारसागरादिति गोविंदमनुमंत्र्य पुनः स्ना

दानम.

॥७१॥ ज्ञां गोविंदं समभ्यर्च्य पुनः प्रदक्षिणीकृत्य दक्षिणकरे धर्मराजं सूर्यं सूर्यं च वामे आदाय तुलावलंबितं गोविंदं पश्य
न्नुत्तरशिरो प्राङ्मुख उपविशेत्॥ ततः परीक्षिके आचार्यादयोऽन्यसेयु॥ ततो मुहूर्तं गोदोहमात्रं वा स्थित्वा
पठेत्॥ ॐ नमस्ते सर्वभूतानां साक्षिभूते सनातनि पितामहेन देवि त्वं निर्मिता परमेष्ठिना॥ त्वया धृतं जगत्सर्वं
सहस्थावरजंगमं॥ सर्वभूतात्मभूतेयेन मस्ते सर्वधारिणीति॥ ततो वतीर्य देवः कालो समत्वाऽमुकफलकामो
मुकरोगनिवृत्तिकाम॥ सर्वत्र गौरीसदनपुण्यप्राप्तिशोकदुर्गतिनिवृत्तिकाम ईश्वरप्रीतिकामो वा इदमात्म
सुमतोलितममुकद्रव्यममुकदैवतमाचार्यादिविप्रेभ्यो नानानामगोत्रेभ्यो दातुमहमुत्सृजे नममेति जलं
क्षिपेत्॥ तत्र कांस्ये तिरः प्रियतामिति वदेत्॥ ताम्रे सूर्यः प्रीयतामिति॥ सवर्णे लक्ष्मीः प्री॥ गंधधूपवस्त्रेषु
विष्णुधात्रा प्री॥ गुडे पार्वती प्री॥ वा ततस्माचार्याय गुर्वादि दक्षिणां दद्यात्॥ आचार्यस्तत तद्द्रव्यदेवतां गो
विंदं सूर्यं धर्मराजमाशासीः स्वसं पूज्य उत्तिष्ठ ब्रह्मणस्पते इत्युत्थाप्य यांतु देवगणा इति विसृजेत्॥ ततो यज रामः
मानः प्रतिमादि सर्वमाचार्यादिकरे प्रतिपाद्यन्नविप्रान्संभोज्य भूयसीं दक्षिणां दद्यात्॥ इति श्रीमीमां ॥६२४॥

सकशंकरभट्टात्मजभट्टनीलकंठकृते दानमयूखे तुलादानप्रयोगः॥ अथ हिरण्यगर्भदानं मात्स्ये
अथातः संप्रवक्ष्यामि हेमदानमनुत्तमं॥ नाम्ना हिरण्यगर्भाख्यं महापातकनाशनं॥ पुण्यं दिनमथासा
द्य तुलापुरुषदानवत्॥ ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं॥ कुर्यादुपोषितस्तद्वत् लोकेशावाहनं
ततः॥ उपोषित उपक्रांतोपवासः॥ पुण्याहवाचनं कृत्वा तद्वत्कृत्वाधिवासनं॥ ब्राह्मणैरानयेत्कुंडं तप
नीयमयं शुभं॥ द्वासप्तत्यंगुलोच्छ्रायं हेमपंकजगर्भवत्॥ त्रिभागहीनविस्तारं परसत्तमुरजाकृति॥ ब्राह्मणैरिति ऋ
त्विग्भिः सह यजमान इति कल्पनारायणः॥ ठकुरस्त्वेतैरेवानयेदिति मदनरत्ने होकुंडं हिरण्यगर्भं हैमपंकजेति॥
अधोभागे मध्यस्थिताष्टदलहेमकमलयुतं॥ त्रिभागेति अष्टचत्वारिंशदंगुलविस्तारं मुरजो मृदंगः॥ तद्वदाकृ
तिर्मध्ये किंचित्स्थूलमिति ठक्कुरः॥ मूलमध्याग्रेषु समामिति वाचस्पतिमिश्राः॥ दानसागरे तु विस्तारमित्यस्याये
आन्यद्वाराभिप्रायारितमिति पाठः॥ तत्र तुल्याभ्यामाज्यद्वारभ्यां एकदेशोऽपूरितमित्यर्थः॥ अपि र भागइत्यत्र मरैक
देशवाचित्वात्॥ दशांगानि सरत्नानि दातव्यानि तथैव च॥ हेमनालं सपिटकं बहिरादित्यसंयुतं॥ तथैवावरणं

नाभेरुपवीतं चक्रांचने॥ पार्श्वतः स्थापयेत्तद्वद्धेमदंडं कमंडलुं॥ अंगत्राणि दशखंडानि अस्त्राणीति वा॥ तत्र अस्त्राका
राणि सुवर्णखंडानीति हेमाद्रिः॥ अस्त्राणीति दामोदरः॥ तानि च तत्रैव खड्ग॥ चक्रशक्तिदंडपाशध्वजगदाशूलपर
शुकुलिशाख्यानि दश॥ रत्नानि पंच प्रसिद्धानि॥ पिटकं मंजूषेति हेमाद्रिः॥ स्थालाकारमुपवेशनपट्ट इति दामोदरः
दात्रं नालच्छेदनार्थं॥ सूचीकरणे धार्या॥ नाभेरावरणं वस्त्राकारं उपवीतमुपनयनार्थं दंडकमंडलुसमावर्त
नार्थं॥ एतानि दशखंडानि हेमानीति हेमाद्रिः॥ नालोपवीतदंडा एव हेमा॥ अन्यत्तु प्रकृतमेव प्राप्तमिति तु
क्तं॥ लेखु सर्वैरपि हैमत्वांगीकारात्॥ अस्त्राणां तु नैन रत्नादि दशकमेवोच्यत इति दानसागरः॥ दशास्त्राणि
चेति रूपनारायणः॥ दशांगानीति चन्द्रपालः॥ दशार्हानीति पावेरत्नविशेषणं वेदे॥ पंचरत्नानीत्यर्थ इति विद्याधर
॥ अश्वादिसमं युतं अश्वादित्यप्रतिमायुतं॥ तथा पद्माकारं पिधानं स्यात्समंताद्दशांगुलाधिकं उक्ताव जीसमोपेतं प
द्मरागदलान्वितं॥ तिलद्रोणोपरिगतं वेदीमध्ये ततो न्यसेत्॥ पात्रमुखाद्द्वादशांगुलेन समंतादधिकमष्टद
लकमलाकारं पिधानं स्यात्॥ द्रोणः परिभाषायां ज्ञेयः॥ ॐ उद्धेममानं तु यावता ताद्रुक्प्रमाणं संपद्यते तावद्

द्यं लेगेतु॥ कुर्यात्सहस्रकर्षेण धःपात्रं हिरण्मयं तु॥ तदर्द्धेनोर्ध्वपात्रं तु सहस्रेणार्द्ध्यं तु वा॥ त्रिपादं वार्द्धपादं वा
सपादं सार्द्धमेव वा॥ द्विगुणं वाप्यकर्तव्यं यथाशक्त्या तु वा भवेत्॥ सहस्रजं वा तत्कृत्वा स्वर्णपादैः स्तवेष्टयेदि
ति हेममानमुक्तं॥ ततो मंगलशब्देन ब्रह्मघोषरवेण च॥ सर्वौषध्युदकेनैव स्नापितो वेदपुंगवैः॥ शुक्ल
माल्यांबरधरः सर्वाभरणभूषितः॥ इममुच्चारयेन्मंत्रं गृहीतकुसुमांजलिः॥ उच्चार्य मंत्रणं मंत्राः प्रयो
गोज्ञेयौ॥ एवमामंत्र्य तन्मध्ये आविश्य प्राङ्मुखस्तु हस्तेनमुष्टिन्यासं परिगृह्य धर्मराजचतुर्मुखौ॥ जानुमध्ये
शिरः कृत्वा तिष्ठेदुच्छ्वासपंचकं॥ तथा॥ गर्भाधानं पुंसवनं सीमंतोन्नयनं तथा कुर्युर्हिरण्यगर्भस्य ततस्ते
द्विजपुंगवाः॥ गर्भाधानादित्रयहरणमनवज्ञो नस्यापल्लवकरणं॥ यजावज्जीवपुत्रन्यासे वर्नतत्र आचरेत्॥
दूर्वारसेन कर्तव्यं व्याकृत्या वयजाकृतिरिति हेमाद्रौ वामनोक्ते॥ गीतमंगलघोषेण गुरुरुत्थापयेत्ततः॥
जातकर्मादिकाः कुर्यात्क्रियाः षोडश चापराः॥ जातकर्मादिकाः पराश्च क्रियाः॥ उक्तयतैन षोडशसंपद्यंते इत्यर्थः
॥ एवमेव हेमाद्रिरूपनारायणादीनामाशयः॥ तेन गर्भाधानपुंसवनसीमंतोन्नयनावलोकनानि गुर्वौ द्यम्

तमःकुर्यात्॥ ततो गुरुर्यजमानश्चच्छापयेत्ततोजातकर्म नामकरणानि क्रमेणान्नप्राशनचूडाकरणोपनयनवेद
व्रतचतुष्टयसमावर्त्तनोद्वाहाः कार्याः॥ हेमाद्रौ तु जातकर्मादिषु प्राजापत्यं आग्नेयसौम्यं व्रतचतुष्टयगोदान॥
सावित्र्येनोद्वाहसागेन द्वादशत्वमुक्तं॥ जातकर्मादिषु विवाहपिंडयज्ञमिश्रपंचयज्ञप्रवेशेन च द्वादशवा
राइतिवाच्यं कृतमेव योग्यमितिमिहनन्तमोहरौ॥ एते च जातकर्माद्याःसंस्कारा यजमानशाखयेतितयोराघ॥
पुरौःकुर्ईत्वात् छाखयेतिपरःयुक्तं तु समावर्त्तनोद्वाहपंचपंचयज्ञा यजमानेनैवस्वशाखया॥ इतरेषु गुरुणा
यजमानशाखयैचेति॥ फलिशाखेतिकर्त्तव्यतयैवतेषां फलजनकत्वस्यैव सत्वात् तत्कर्मांतरत्वे तु जातक
र्मादीनां मानाभाव॥ सर्वेभ्यःकामेभ्यो दर्शपूर्णमासाविस्पत्र्वेव्याख्याताभावेनप्रकरणांतरायोगात्॥ त्रैधात
वीयादीष्वाराणयेतिवत्तु तान्येव जातकर्मादीनि दृष्टा नांगतयाविनियुज्यंते॥ कर्मांतरत्वेपि वैतेषां जातकर्मादि
विकृतित्वेन फलिशाखीयैवेतिकर्त्तव्यता प्राप्नोति न गुरुशाखीया॥ तेन गुरुरेव यजमानशाखीयो न्नवु
त्वास्मिन्दाने॥ अध्ययनसिद्धशावत्वात् स्वदेवुगुणापायासत्व इवसमानकल्पायजमानाः॥ तेचसंस्कारास्त

त्कर्मांतु ध्यानपूर्वंतत्तत्प्रधानमंत्रपाठमात्रेणकार्याः॥ स्त्रीशूद्रकर्तृके मंत्रवर्जमनुध्यानमात्रं॥ तत्र स्त्रिया जात
कर्मनामकरणानिक्रमेणान्नप्राशनचूडाकर्मविवाहाख्यसंस्कारषट्कं तत्रापि विवाहःसमंत्रकः॥ शूद्राणां तु
एतेषट्पंचमहायज्ञाश्चेत्येकादशानुध्यानरूपाएवेति सर्वे निबंधकृतः॥ शिष्टास्तु नैवर्णिककर्तृकेप्यमंत्रक
नुध्यानमेवाचरंति॥ युक्तमिवचेदं॥ सर्वपदार्थत्यागेमंत्रमात्रपाठेमानाभावात्॥ त्यागंतुस्वरूपत एवानु
ष्ठानसर्वेषां॥ यत्तु दामोदरोगर्भाधानादीनांकुंडे विवाहस्यवत्काण्डेसंभवात्समंत्रकानुध्यानमेव कार्यमि
ति॥ तन्न दूर्वारसेन कर्त्तव्यं सेचनं दक्षिणपुटे॥ त्रैबाहुंबरफलैःसार्द्धमेकविंशत्कुशान्सदा शक्तोपितावदे
वान्नकुर्यात्सीमंतकर्मणि॥ अन्नप्राशनकेविद्वान्भोजयेत्पायसादिभिः॥ एवंविश्वजिदंताश्च गर्भाधानादिका
ःक्रिया॥ शाक्तिवामेनकर्त्तव्या ब्राह्मणैर्वेदपारगैरितिलिंगपुराणात्॥ दक्षिणपुटेत्वधःपात्रगतरंध्रयो
र्मध्ये दक्षिणेरंध्रे पक्षु हेमाद्रौ टोडरानंदे च॥ उपरिपात्रगतरंध्रयोरिति तत्र अधःपात्रेस्मरेद्दिव्यांगुणत्रय
समन्वितां चतुर्विंशतिकां देवीं ब्रह्मविष्णुशिवरूपिणीं॥ ऊर्ध्वपात्रस्यैवस्त्रीरूपतोज्ञेः॥ तावदेवे तेवकारेणांग

तरपुरिसंरख्या॥ अत्र सेवाचयंतीतिवत्॥ तेनगर्भाधानेरपि निवृत्तिः॥ उद्वहेत्कन्यकां कृत्वा त्रिंशन्निष्केण शोभनां
अलंकृत्य यकृत्वा शिवायविनिवेदयेत्॥ अत्र चतुःसौवर्णिको निष्क इति केचित्॥ षट्पंचाशद्धिशतपणमि
त इति भास्कराचार्याः॥ दीनारे पिचूलसुवर्णो निष्क इत्यमरः॥ सुवर्णपर्याय इत्यन्ये॥ तेषांशास्तपाव्यवस्था॥ दूर्वारसमसे
को यजमानस्य पितरौ तस्यापितरौ नीयं वा मिथुनमानीयत योरन्यतरेण कारयेद्गुरुः॥ कर्त्तारं भार्ययायुक्तं स
र्वालंकारशोभितं॥ स्नानीयकुर्यात्ततस्यास्यगर्भाधानादिकाः क्रियाः॥ भार्यादक्षपुटे ह्यूर्वारससेवनमाचरेत्॥ एकविं
शतिसंख्याता तुहुंबरफलान्वितान्॥ कुशाना नीय मन्त्रा यकुर्यात्सीमंकर्म चेति कामिकोक्तेः॥ षजावज्जीवपुत्रा
ग्न्यासेवनं ततस्त्वाचरेत्॥ दूर्वारसेन कर्त्तव्यं व्याहृत्याच घृताहुतिरिति हेमाद्रौ वातुलोक्तेश्च॥ प्रजावत् ज्ञातेग
र्न इत्यादि जीवपुत्रं त्वग्निरेतु प्रथम इत्यादि॥ सत्यपि वाकेषांचिदसंभवेनसर्वेषामनुध्यानमात्रं युक्तं यत्तुत्वत्र
प्राशने युक्तवतः कर्मान्तुष्ठानविरोध इति सोपि द्रविशेषभोजनवद्विहितत्वादपास्तः॥ किंच सर्वैरपि प्रयोगेन
सर्वसंस्कारमंत्रा उक्ताः॥ चौलादौ होममंत्रानुक्तेः॥ अथ प्रधानकरणीभूता एव मंत्रा अपि चेतास्ततो गर्भाधा

नेयन॥ ओंसुचदंघमिति मूर्धाभिमर्शनार्थस्तूक्ताः॥ ध्यंगमंत्रस्य समावर्तने होमसाधनस्य तम मानैव वर्च इति सूक्त
स्पतत्रैव स्मृतं च मइत्यादे लिरवनं॥ विवाहादौ च भार्योत्पादकप्रधानभूतहोमसमस्त सप्तपदीमंत्राणामनि
रवतमिति कथमिदं पूर्वापरविरुद्धं प्रमाणमन्यमेतेषां लिरवनमादर्त्तव्यं॥ अतः स्वरूपतएव कार्याः सर्वे॥ तत्र
पूर्वादिक्षु कुंडे प्रत्येक क्रमादग्नादिशारवीय यजमानसंस्कारप्रधानहोमाः कामाः॥ उहूने रवनी पलेरवने भूमा धाना
घाराज्यभागाः स्विष्टकृदाधुत्तरांगानि चनकार्याणि तदुपकाराणां सिद्धत्वात्॥ पश्रुतंत्रातः पातिनिपुरोडाशो
मयाजानुयाजनवयाजानुष्ठावत्॥ पाशुकैरेव तैरुपकारसिद्धेः॥ अत्र गर्भाधानादित्रयनिष्क्रमणप्राशनसहि
तषोडशसंस्कारपक्षे निष्क्रमणप्राशनत्यागेन यंच यज्ञसाहित्येनो न विंशतिपक्षे वा गर्भाधानसीमंतेतावत्क
र्मांतरे यावदुक्तेः॥ कामिकसैंगादिष्वनेकगुणश्रुतेः॥ प्रधानवाधाच्च पुंसवनं तु ध्यानमात्रेण कार्यः स्वरूपानु
ष्ठानवाधात्मंत्रपावेमानाभावाच्च तथा कृकूशारवाव्येश्चो जएवाते आयूषीत्याद्याहुतिश्चतु ष्टयं कार्यं नो पनय
नव्रतचतुष्टयसमावर्त्तनविवाहेषु चौलापैरेवाहृष्टैरुपकारसिद्धेः॥ उपनयने विशेषमाह भगजायन॥ अथो

दानम.
॥७५॥

पेतपूर्वस्य कृताकृतं केशवपनं मेधाजननं वा निरुक्तं। पारिदानकाशमतत्सवितुर्वरेण्यमहइतिसावित्री। दूर्वउपे
तउपेतपूर्वस्तस्य पुनरुपनीयमानस्येतियावत्। कृताकृतं वैकल्पिकं अनिरुक्तं वर्जितं। परिदानकाले वा अनि
रुक्तो परिदानमादित्यायव्रतपतये वदुते ददामीति मापत्यास्थाने तत्सवितुर्वरेण्यमहइति ऋचउपदेशः। मनुरप्या
अजिनं मेखलादंडौ भैक्षचर्याव्रतानि च। निवर्तंते द्विजातीनां पुनःसंस्कारकर्मणीति। अत्यत्काये विवाहे सप्तपदी
क्रमणपरिणयनयोनिवृत्तिः प्रतिमायात्त्रसंभवात्। अन्येष्वपि संस्कारेषु वाधितं उप्यतइति दिक्। षोडशक्रियाभा
वात् स्त्रिशूद्रयोर्हिरण्यगर्भदाने अनधिकार इतिकेचित्। तन्न नरो वाथ दिवा नारी एवं वलात्संभवं। यः करो
ति महापुण्यं तस्यापि शृणु यत्फलमिति हेमाद्रि हिरण्यगर्भप्रकरणे विष्णुधर्मोक्तेः। स्त्रीणामधिकारश्चगमात्।
आत्मसंभवं हिरण्यगर्भं स्त्रीशूद्रा अस्य धर्माणइति। वाक्याच्च शूद्रस्येति तथा स्वस्त्यादिकं च गुरवे दत्वा मंत्रमिमं
जपेत्। मंत्रः प्रयोगे ज्ञेयः। चतुर्भिः कलशैर्भूयस्ततस्ते द्विजपुंगवाः। स्नानं कुर्युः प्रसन्नेन। दिव्यान्नरणभूषिता देव
स्त्वेतिमंत्रेण स्थितस्य कनकासनो चतुर्भिः कुंडसमीपस्थैः कुर्युः कारयेयुः। मंत्रः प्रयोगे ततो हिरण्यगर्भं तो ते

राम:
॥६२८॥

भ्योदद्याद्विचक्षणः। अत्रापि सर्त्विगाचार्याणां दानतइव्यविभागस्तुलापुरुषवद्दावगंतव्यः। तत्पूज्याः सर्वभावेन
वल्कवीवाततदाज्ञयातत्रोपकरणं सर्वं गुरवे विनिवेदयेत्। पादुकोपानहच्छत्रचामरासनभाजनं। ग्रामं वा
विषयं वापि यच्चान्यदपि संभवेत्। विषयो ग्रामसमूहः। अन्यद्रत्नादि ग्रामादिकं च तुलापुरुषवत्। अत्रापि द
क्षिणात्वेति। अत्राप्यंतत्रालंकारादिकं गुरवे दद्यात्। इतिहिरण्यगर्भदानविधिः। तथैतत्प्रयोगः। देशकालौ
संकीर्त्य सकलकलुषनिवृत्तिसंभावितनरकनिमग्नपित्रादिपुरुषशततत्त्रिविधबंधपुत्रपौत्रप्रपौत्रादिसमु
द्धरणपूर्वककल्पिद्रसंघसेवितत्वाप्सरोगणकरकलितचामरमालावीज्यमानन्वैकैकमन्वंतरसमयावछिन्न
सर्वलोकपालपुरनिवासोत्तरकल्पकोटिशतावछिन्नब्रह्मलोकमहिमत्वकामोहंश्वो हिरण्यगर्भदानंप्रति
पादयिष्ये इति प्रतिज्ञाय तुलापुरुषवत् गोविंदोमायतिविनायकपूजाविप्राज्ञाग्रहणमातृपूजाभ्युदयिकश्राद्ध
पुण्याहवाचनगुर्वादिवरणमधुपर्कदानमंडपपूजागुर्वादिविनियोगांतं कुर्यात्। अत्रगुरुर्यजमानश्च स्वीयएव
ततो गुरुर्वेद्यां षोडशारोपरिस्थापिततिलद्रोणोपरि प्राग्उक्तहिरण्यगर्भपात्रं ऋत्विग्भिः सहानीय स्थापयेत्। त

दानम.
॥७६॥ ततः कुंडमध्ये हैमं पद्मं निधाय कुंडैकदेशं घृतक्षीराभ्यां पूरयित्वा कुंडस्य बहिः पार्श्वयोर्दशारखंडानि रत्नानि छुरि
कां सुचीं हेमनालं उपवेशनं यद्वा आदित्यप्रतिमां नानावर्णवस्त्रं हैमोपवीतं दंडी कमंडलुमिति स्थापयेत्
ततः कुंडे हिरण्यगर्भायेति स्तपिधानं हिरण्यगर्भं पूजयेत्॥ कुंडसमीपस्थं कुंभस्थापनग्रहस्थापनादि पूर्णकृतानि
षेको तं तुलापुरुषवत् एवमभिषिक्तो यजमानः॥ स्नातः शुक्लवस्त्रालंकारादियुक्तो गृहीतकुसुमांजलिः प्राङ्मुखः पा
त्रमामंत्रयेत्॥ नमो हिरण्यगर्भाय हिरण्यकवचाय च सप्तलोकसुराध्यक्ष जगद्धात्रे नमो नमः॥ भूर्लोकप्रमुखा लोका
स्तव गर्भे व्यवस्थिताः॥ ब्रह्मादयस्तथा देवा नमस्ते विश्वधारिणे॥ नमस्ते भुवनाधार नमस्ते भुवनाश्रय॥ नमो हिर
ण्यगर्भाय गर्भे यस्य पितामहः॥ यतस्त्वमेव भूतात्मा भूते भूते व्यवस्थितः॥ तस्मान्मामुद्धराशेषदुःखसंसारसाग
रात्॥ ततः पात्रेषु पुष्पांजलिं प्रक्षिप्य समंगलघोषं तत्र च विप्रगुर्वृत्विजः पात्रं पिधानेनाच्छादयेयुः॥ यजमानः
स्कतन्त्रोदङ्मुखो दक्षिणवाममुष्टयोः क्रमात् धर्मराजचतुर्मुखौ गृहीत्वा जान्वोः शिरः कृत्वोच्छ्वासपंचकावच्छि रामः
न्नसमयमासीत॥ ततो गुर्वादिर्यजमानस्य धितरोतत्स्था नायमन्य इमिथुनमानीपतद्वाराधःपात्रगतरंध्र ॥६२॥

योर्मध्ये दक्षिणकरं ध्रेण शक्तिबीजेन दूर्वारसं सेवयेदिति गर्भाधानं पुंसवनं स्पधानमात्रं॥ सीमंते गुर्वाधन्यत
म॥ सोदुंबरफलैरेकविंशतिकुशैरेधःपात्रे कांस्यनिक्षे सीमंतं शक्तिबीजेनोन्नाययेत्॥ जाते गर्भायोनिमिति ध्वजा
वनात्तकेन श्चग्निरे त्विति जीवपुत्रेण व दूर्वारसं दर्वेक्षिरे॥ ध्रन्नाच्यकृष्णाखीयादि यजमानक्रमेण धारामाक्षिं
डे ममस्तव्याहृतिभिरेकामाज्याहुतिं जुहुयादिति॥ इदमेवानवेक्षोभनं॥ सीमंतोन्नयनं व्याख्यातमुक्तं एवमुत्तरसंस्का
रेषु पितृत्कुंडे होमः॥ ततो गुरुः शुभलग्ने यजमानमुच्छाप्य आश्वलायनयजमानस्य जातकर्म नामकरणान्नप्राशनचौ
लोपनयनव्रतचतुष्टयानि कुर्यात्॥ तत्रान्नप्राशने पायसभोजनं॥ चौले मातुलसंगोपवेशनाभाव॥ इति नाराय
णः॥ उपनयने त्र्यम्बकं युंजाद्याघाहुतिया वपनमेधाजननादिवायव्रतपतये बहुतेपरिदेहामीति परिदा
नाजिनमेखलादंडभैक्ष्यचर्याव्रताचरणाभाव॥ एवं महानाम्न्यादिव्रतसमावर्तनविवाहे घृताहुतिचतुष्टयाभावः॥ गाय
त्र्या स्थाने तत्सवितुर्वरेण्यं महे वयं देवस्य भोजनं श्रेष्ठं सर्वधातममृतुरमगस्य धीमहि इति ऋच उपदेशः॥ अन्यत्तु
ल्यं समावर्तनविवाहौ स्वेच्छया यजमानः कुर्यात्॥ विवाहे हस्तग्रहे शान्तिक कन्यस्य सुवर्णघटितप्रतिमया सह तत्र

दानम॰
॥७१॥ ग्निपरिणयनसमपदीक्रमणा ॥ अर्वाक्सवतीदर्शनान्निवर्तंते ॥ जातोहीमक्तस्तु वैवस्वन्मनुस्तुल्यं ॥ आइंतुयजमानएवच
कुर्यात् ॥ मरुन्नराभोदरादयस्तु पंचमहायज्ञाःकार्याः नग्राह्मानवलीन्नेस्यात् ॥ यजुःशाखायान्तुजातकर्मा
दिषुप्राजापत्यमेद्रमाग्नेयंसौम्यंचत्वारवेदव्रतानिनि ॥ क्रमणचोक्तं ॥ नामकरणंनोक्तमितिविशेषः ॥ छंदोगानां
तुनामकरणमस्ति ॥ अन्नप्राशनंनास्ति ॥ गोदानव्रतं केशांतव्रतं चत्वारिवेदव्रतानिचेति ॥ अथवैदेजातकर्म
निष्क्रमान्नप्राशनेगोदानोपनयनसाविव्रव्रतवेदव्रतसा ॥ वित्रीव्रतविसर्गसमवर्तनविवाह पंचयज्ञाउक्ता ॥
एतेषामनुष्ठानप्रकारास्तत्रखयावोध्या ॥ शिष्टास्तुसर्वेषांसंस्काराणामनुध्यानमात्रंकुर्वंति ॥ ततोयजमानोद
शखंडाहिगुरवेर्पयेत् ॥ नमोहिरण्यगर्भायत्यादिप्राग्गुक्तमंत्रयेननमस्कुर्यात् ॥ ततःकुंडसमीपस्थकलशज
लैर्देवस्यत्वेत्यादिनाअघजातस्यतेंगानित्रभिषेचयामि हे वयं ॥ दिव्येनानेनवपुषाचिरंजीवसुखीनवेतिवमंत्रे
णकनकासनस्थयजमानमभिषिंचेयुः ॥ ततोदेशकालौसंकीर्त्यसकलेत्यादिमहितेत्वकामइयंतमुत्कातिज्ञ
ष्टोऽस्मिपरिस्थमिदंहिरण्यगर्भपात्रंसवितानकंविष्णुदैवतंयुष्मभ्यंयथोक्तनामगोत्रवत्स्यपासंप्रददेनममेत्युक्त्वा दानः
॥६२७॥

पुनस्तथैवदेशकालाद्युक्त्वैतद्दानप्रतिष्ठासिध्यर्थमिदंसुवर्णादिदक्षिणांगुर्वादिभ्यःसंप्रददइत्युक्त्वादीनाना
थेभ्योपियथाशक्तिदत्वापुण्याहवाचनग्रहयज्ञा ॥ विसर्जनोतंतुलापुरुषवत्सर्वंकृत्वात्मालंकारादि
गुरवेदद्यात् ॥ इतिहिरण्यगर्भप्रयोगः ॥ अथब्रह्मांडं ॥ अथातःसंप्रवक्ष्यामिब्रह्मांडंविधिपूर्वकं ॥ यद्दृष्ट्वासर्व
दनानांमहापातकनाशनं ॥ पुण्यदिनमथासाद्यतुलापुरुषदानवत् ॥ ऋत्विक्मंडपसंभारभूषणाच्छादना
दिनंलोकेशावाहनंतद्वदधिवासनकंतथा ॥ कुर्याद्विंशत्पलादूर्ध्वमासहस्राच्चशक्तितः ॥ सकलद्वयसंयुक्तंब्र
ह्मांडंकांचनंबुधः ॥ शाकलःखंडः ॥ उक्तंचकुंभद्वयोपन्वेषाहकृपतीच्यांदिशिचंद्रमा ॥ उदितःशुक्लपक्षादौवपुरंड
स्यतादृशं ॥ कुंभद्वयोनामयोवाहानंकुर्यान्नइत्यर्थः ॥ दिग्गजाष्टकसंयुक्तंषड्वेदांगसमन्वितं ॥ लोकपालाष्टको
पेतं ॥ मध्यस्थितचतुर्भुजे ॥ शिवाच्युतार्कशिखरमुमालक्ष्मीसमन्वितं ॥ वितस्तेरंगुलशतंयावदायामविस्त
रे ॥ कौशेयवस्त्रसंवीतंतिलद्रोणोपरिन्यसेत् ॥ तथाष्टादशधान्यानिसमंतात्परिकल्पयेत् ॥ दिग्गजाऐरावतपुंडरी
कवामनकुमुदांजनपुष्पदंतसार्वभौमसुप्रतीका ॥ एतद्ब्रह्मांडमादिमपुराणे मुच्यानश्चचतुर्दंतः ॥ श्रीमानैरा

बतोगजः॥ पुष्पदंतो हदन्ना मा:षडंत: पुष्पदंतवान्॥ सामान्यगजरूपेणैशेषादिक्करिणः स्मृता॥ षडंगानि शिक्षा
कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमिति॥ तल्लक्षणं॥ सर्वाणि ब्रह्मणो लोके साक्षसूत्राणि तानि तु॥ द्विभुजानि
शुभास्यानि वामे दधति कुंडिका॥ कुंडिका: कमंडलु:॥ अर्थात्॥ अक्षसूत्राणि दक्षिणकरे पुस्तकानि च॥ पश्चिमे
चतुरो वेदा अंगानि वेदस्थाने प्रधानं नीयमानं॥ हितं नागास यकर्षतां तिमायाता स्थापनानि॥ लोकपालरूपाणि
ह विश्वकर्मा चतुर्दंतगजारूढो वज्रपाणि पुरंदरः॥ प्राचीपतिः प्रकर्तव्यो नानाभरणभूषणः॥ पिंगभ्रूश्मश्रुकेश
श्च पिंगाक्षजवरोहणः॥ छागस्थ साक्षसूत्रश्च सप्तार्चिः शक्तिधारकः॥ इ षत्पीतो यम कार्यो दंडहस्तो विजानता
रक्तदृक् पाशाभृतक्रुद्धो निर्ऋतिर्विकृताननः॥ पुंस्थितः खड्गहस्तश्च भूतवान्रा क्षसैर्वृतः॥ वरुणः पाशहृकू
र्मस्मवतीच्यामकराश्रयः॥ धावन्हरिणपृष्ठस्थो ध्वजकृद्वारी समीरणः॥ दशाश्वर गसोमो गदापाणिर्व
रप्रदः॥ पूर्वोत्तरे त्रिनेत्रश्च वृषभस्थ त्रिशूलधृक्॥ कपालपाणिश्चेशानो भूषणः परमेश्वरः॥ उमारूपे देवीं
राणे चतुर्भुजा द्विवा ऊर्ध्वद्विनेत्रा वा त्रिलोचना॥ कुंडलालंकृता देहे शेषराभरणान्विता॥ गोराचनानिभा गौरी

स्वस्तिका नवयौवना॥ स्वस्तिकाबद्धयामांक्रौ पिहितुं कृतस्वस्तिकाकारेत्यर्थः॥ गौरी च शिववामागे॥ रूपनारा
यणो ये तु अक्षसूत्र कमंडलुधराभय हस्ते त्फलं॥ लक्ष्मीरूपं॥ पाशासमालिकांभोज सृणिर्निर्याम्यसौ
म्यये॥ पद्मासनस्थांकुर्वात श्रियं त्रैलोक्यमातरं॥ गौरवर्णरूपांच सर्वालंकारभूषितां॥ रौक्मपद्मकरव्यग्रां
वरदां दक्षिणेन तु॥ ऊर्ध्वं दक्षिणे करे पाशाक्षमाले॥ ऊर्ध्व वामे पद्मांकुशौ॥ अधो वाम दक्षिणे॥ यो हैम पद्मास
नस्था द्विभुजा कर्तव्या वरदा सदा॥ दामोदरीनिगमे॥ आपो ध्रुवश्च सोमश्च धरश्चैवानलोऽनलः॥ प्रत्युषश्च प्रभास
श्च वसवो नाम ज्ञि॥ स्मृत इति॥ पद्मासनस्था द्विभुजा पद्मगर्भाभिकांतयः॥ करादिस्कंधपर्यंतं नीलपंकजधारि
णः॥ अधः संस्थित मेषादिराशयः॥ वन्हतां घ्रिकाः मेषादिराशिरूपं दामोदरीये॥ मेष वृष कर्क टसिंह वृश्चिक
मीनाः स्वनामानुरूपाः॥ बाणधरो दंपती मिथुनं॥ करद्वयाधृतसस्यमंजरी कन्या॥ तुलाहस्तो नरस्तुला मृगा
स्यो ध्वज घनो मकरः॥ घटशिरा नरः कुंभः॥ ध्राहतांघ्रिका मीनाः॥ छिन्नचरण इति दामोदरः॥ ब्रह्मा द्वादशादि
त्यास्ते जोमंडलमध्यगाः॥ इंद्रादिनामानि हरिर्विवस्वानिंद्रो विष्णुर्भगस्त्वष्टा वरुणो शौर्यमा रविः॥ पूषा मित्रो यमश्चैव पर्ज

॥७९॥ मोक्षाद्दशस्मृता इति॥ मरुतस्तु धावन्नूहलम्मगारुडो वरदध्वजधारिणा॥ उँतन पंचारात्र॥ शिवादिप्रतिमायाः प्रायु॥
क्ताः॥ अष्टादशधान्यानि प्रत्येकं द्रोणपरिमितानीति केचित्॥ पूर्वेशानंतरायनं प्रद्युम्नं पूर्वदक्षिणे॥ पश्चात्तिंद
क्षिणे देशे संकर्षणमतः परं॥ पश्चिमे चतुरो वेदाननिरुद्धमतः परं॥ अग्नि उत्तरतो हैमं वासुदेवमतः परं॥ समंता
द्रुद्रुपीपस्थानर्चयेत्को चनान्बुधः॥ स्थापये द्वस्त्रसंवीतान्प्रत्येकं मानदरौ वट्॥ अनंतव्यापनस्वरूपंवि
ष्णुधर्मोत्तरे॥ देवदेवस्तु कर्तव्यः शेषस्तु मध्ये चतुर्भुजः॥ एकः पार्श्वेस्य कर्तव्यो लक्ष्मीमुखंगगतः प्रभो॥ तथा परस्य
कर्तव्यः शेषभोगांकसंस्थितः॥ एकः करोस्य कर्तव्यस्तत्र जानौ प्रसादतः॥ कर्तव्यो नाभिदेशस्थस्तस्यापरः क
रः॥ नाभीसंभृतकमलेसुखवासीनः पितामहः॥ नालसन्थैतु कर्तव्यो पद्मस्य मधुकैटभौ शंखचक्रगदादीनि
मूर्तानि परितो न्यसेत्॥ प्रद्युम्नलक्षणं पंचरात्रादिषु॥ दक्षिणो ध्वंकरो पद्मे दद्याछंखमधःकरो॥ चक्रमूर्ध्व
तथा वामे गदां दद्यात्तथा बुधः॥ चापेषु धन्वा प्रद्युम्नो रूपवान् विश्वमोहक इति॥ प्रकृति र्यग्र प्रव्यक्तरूपिणी राम
तथापि तत्स्थितिलक्ष्मी प्रतिमानिवेशणात्तदुक्तं मार्कंडेयपुराणे॥ सर्वस्याद्यामहालक्ष्मी स्त्रिगुणा परमेश्वरी॥ ॥६३२॥

मातुलिंगगदां खेटं पानपात्रं च बिभ्रती॥ नागं लिंगं च बिभ्रती॥ नृपमूर्धनि॥ संकर्षणरूपं विष्णुधर्मोत्तरे॥ वासुदे
वस्य रूपेण कार्यः संकर्षणः प्रभुः॥ सतु शुक्लवपुः कार्यो नीलवासा यदूत्तम॥ गदास्थाने च मुसलं चक्रस्था
ने च लांगलं वेदलक्षणमहाभूत षट्टेव दुर्युतं॥ तथा लक्ष्मं च चतुर्भुजं दक्षेशारस्त्र श्वेतपीतं रे॥ धनुःखेट धरं वी
रं च अनिरुद्ध प्रवक्षत इति ईनारदीये॥ अपि प्रतिमा प्रायुक्ता॥ वासुदेवप्रतिमापि नारदीये॥ वासुदेवः शिवः शां
तः सिताब्जश्च चतुर्भुजः॥ योगमूर्ध्नि दिशं रक्ष्य हृद्देशार्पितहस्तकः॥ धारयेद्युत्तरे चक्रं करे वै दक्षिणे गदामिति
एताश्च प्रतिमाः प्रकृत दानपरिमाणात्स्वप्रकार्यः॥ एता मधुउपी वस्थान र्चयेत्॥ पूर्णकुंभानास्थापयेद्दिक्षु तत्र समंता
द्दिक्षु नु पंजनीयं॥ तथा॥ दशैव धेनवो देयाः सहेमांबरदोहना॥ पादुकोपानहच्छत्रचामरासनदर्पणैः॥ भक्ष्य भो
ज्यान्नदीपेक्षुफलमाल्यानुलेपनैः॥ होमाधिवासनांते च तत्रापितो वेदपुंगवे॥ इमस्तु चारयेन्मंत्रं त्रिः कृत्वा प
प्रदक्षिणा॥ सहेमांबरेति हेमश्रृंगाः सवत्साः कांस्यदोहनाः॥ एताश्च दक्षिणार्थमुपकल्प्याः॥ नविष्णेतु सुवर्णमे
व दक्षिणार्थमुपकल्प्यमपि तत्कं॥ इमसु चारयेद्दितिव्रस्तां उत्रिः प्रदक्षिणीकृत्य मंत्रं पठेत्॥ तत्र मंत्र॥ प्रयो

दानम्.

॥८०॥

गेदेय॥ एवं प्रणम्यामरविघ्नगर्भं दद्याद्द्विजेभ्यो दत्त्वा धाविनम्य॥ भागद्वयं तत्र गुरोः प्रकल्प्य सम ज्येष्ठेषमनुक्र
मेण समं न ज्येष्ठेषमनुक्रमेण॥ सममं नज्येष्ठेषमिति॥ गुरोर्भागद्वयं प्रकल्प्यावशिष्टभागानामेकैकं भागं त्रेधा
विभज्य चतुर्विंशतिसंख्येभ्य ऋत्विग्भ्यः समं दद्यात् दानवाक्यं तु ज्ञावदेव ज्ञेयं॥ तन्या॥ स्वल्पे च होमं गुरुरे
क एव कुर्यादित्येकाग्निविधानयुक्ता सएव संप्रपूज्य तमोल्पवित्तैर्यथोक्तवस्त्राभरणादिकेन॥ अत्र मत्स्या पल्प
त्रउत्तममत्स्य द्वंद्वेन मध्यमस्त्र द्वैना धम पदं स्वल्पत्वं ज्ञेयो विंशतिपलनिमिते स्वल्पत्वमित्येके॥ एकाग्निविधाने
प्रतीच्यां वह्निं कुंडमिति परिभाषायामुक्तं॥ एक एव ऋत्विग ध्वकं विनित्यर्थः॥ इत्थं च एतद्रविलं पुरुषोन्न कुर्याद्ब्र
ह्मांड दानमधिगम्य महद्धिमानं॥ निर्धूतकल्मषविशुद्धतनुर्मुरारेरानंदकृत्पदमुपैति सहाप्सरोभिः॥ संतारये
त्पितृपितामहपुत्रबंधुप्रियातिथिकलत्रशताष्टकेच॥ ब्रह्मांडदानसकलीकृतपातकोऽयं त्वानं ददये च जनन्नी
कुलमप्यशेषं॥ इति ब्रह्मांडदानं॥ अथ प्रयोगः॥ यजमानो देशकालौ संकीर्त्य सकलपातकक्षयपितामहप्र
पितामहपुत्रपौत्रबंधुप्रियातिथिकलत्रपुरुषशताष्टकतारणविलीनसंकलपातकाशेषमाट्ठकुत्सापा

राम:

॥६३॥

तकौघशकलीकरणसंतारणानंदपूर्वकाप्सरःसंघसहितविमानकरणकमुरारिपदप्राप्तिकामो हेम्नो ब्रह्मां
डमहादानं प्रतिपादयिष्य इति संकल्प्य तुलापुरुषदानवत् प्रारब्धोपवासो गोविंदादिपूजादि मंडपपूजावार्यादि
विनियोगांतं विदध्यात्॥ तत आचार्यो वेदिरचितषोडशार चक्रोपरिस्थतिलद्रोणोपरि ब्रह्मांडं स्थापयेत्॥ ए
तत्माणादिदिक्षु दिग्गजाष्टकलोकपालाष्टकप्रतिमा॥ स्थापयित्वा पश्चिमायां वेदचतुष्टयतदंगषट्कप्रतिमा
:स्थापयेत्॥ ब्रह्मांडोपरि शिवो माच्युतलक्ष्मीसूर्यप्रतिमां मध्ये चतुर्मुखप्रतिमां मध्य एव समंताद्दशवसुद्वादि
शादित्यमरुद्गणप्रतिमां नवरत्नानि च॥ तिस्थापयित्वा द्रोणपरिमिता शंदवा धान्यानि परितो निधाय प्रा
च्यादिदिक्षु षडुपीठेषु अनंतशयनप्रद्युम्नप्रकृतिसंकर्षणवेदचतुष्टयानिरुद्धाग्निवासुदेवप्रतिमाष्टकेच
निधाय स्थापयित ब्रह्मांडादिप्रतिमा॥ क्रमेण नाममंत्रैः राव प्राचीयित्वा परितो दत्त्वा पूर्णकुंभानुसवस्त्रान्स्था
पयेत्॥ ततः पादुकोपानच्छत्रचामरासनदर्पणभक्ष्यभोज्यफलमाल्यदीपानुलेपनमंत्रैः सह कांस्यदोहनादियु
क्तदश धेनुरूपकल्प्य ब्रह्मांडोपरि वितानं बध्नीयात्॥ कुंडसमीपस्थकुंभस्थापनवन्नस्थापनादिपूर्णाहुतिरग्नि

दानम:
॥६१॥

षेकांतंतुलापुरुषवत्॥ एवमभिषिक्तोयजमानःशुक्लवेषोजलिंबध्वाब्रह्मांडं त्रिःप्रदक्षिणीकृत्यनयामोस्तुविश्वे
श्वरविश्वधामजगत्सवितेभगवन्नमस्ते॥ सप्तर्षिलोकामरभूतलेशगर्भैरासांडविततान्निर्भिन्नं येदुः रविता
स्तेसुखिनोभवंतुप्रयांतुयायैयातिचराचराणां॥ त्वद्दानशास्त्रावहतकानां ब्रह्मांडदोषाप्रलयंब्रजंतितिपवेत्
ततोयजमानःपश्चिमतउपविश्यगोहस्ताके नमह ब्रह्मांडं दत्वाधाविभज्याचार्यायभागद्वयं भागाष्टकमृत्वि
ग्भ्योदद्यात्॥ अद्यामुककालेसकलपापैतकर्त्यकामइत्यंतेसंकल्प्य वाक्यमुक्त्वा ब्रह्मांडमेतावत्सप्तमित
सुवर्णरचितं निर्णोपरिस्थापितमेतत्सर्वोपस्करयुतंयुष्मभ्यंगुर्वित्विग्भ्यःसंप्रददइति गुर्वादिहस्तेषुजलंदद्या
पेत्॥ ब्राह्मणांश्चब्रह्मांडस्यष्टशःप्रतिग्रहस्तायुः॥ ततःकृतेतत्रब्रह्मांडदानप्रतिष्ठार्थमिदंहिरण्यमाग्नेयं
स्वामाहिंदिंचगुरवेसंप्रददेइतिदद्यात्॥ ऋत्विग्भ्योपियथाशक्तिहिरण्यंदद्यात्॥ अन्येभ्यश्चेगुरवे
स्वशाखयापश्चिमायांदत्तकुंडे हवनादिकुर्यात्॥ ब्रह्मजापकादयोपिप्रयोगांतरवत्कार्याभित्विजः॥ त
तोगृहवेश्यांग्रहादिपूजनादिविसर्जनांतंगुरुःकुर्यात् इत्येकाध्वर्युपक्षः॥ इतिब्रह्मांडदानप्रयोगः॥ अ

रामः
॥६३४॥

थकल्पपादपदानं॥ मात्स्ये॥ कल्पपादपदानाख्यमत॥ परमुत्तमं॥ महादानंप्रवक्ष्यामिसर्वपातकनाशनं॥ पुण्यंदि
नमथासाद्यतुलापुरुषदानवत्॥ पुण्याहवाचनंकुर्याल्लोकेशावाहनंतथा॥ ऋत्विङ्मंडपसंभारभूष
णाच्छादनादिकं॥ कांचनंकारयेद्वृक्षान्नानाफलसमन्वितान्॥ नानाविहंगवस्त्राणिभूषणानिचका
रयेत्॥ नानाफलानित्रीपुरुषगोगजवाजिमाणिकनकरजतमयफलादीनितिके—त्॥ फलान्येवेत्यन्येश
क्तितस्त्रिपलादूर्ध्वमासहस्रात्प्रकल्पयेत्॥ अर्धक्षसमसुवर्णस्यकारयेत्कल्पपादपं॥ कल्पपादपदानार्थमुप
स्कृत्यसुवर्णस्यार्धेनब्रह्मादिप्रतिमासहितंकल्पपादपंकुर्यात् द्वितीयार्धेतुवाविभज्यैकेकभागेनस्वस्वदे
वताप्रतिमासहितान्वृक्षान्नानादीन्कुर्यादिसर्थः॥ गुडप्रस्थोपरिष्टाच्चसितवस्त्रयुगान्वितं॥ ब्रह्मविष्णुशिवोपेतं
पंचशाखंसभास्करं॥ प्रस्थोद्वात्रिंशत्पलः परिभाषायांदर्शितः॥ षोडशपलोवा॥ ब्रह्मादिप्रमाःप्राग्दर्शिताः॥ का
मदेवमधस्ताच्चसकलत्रंप्रकल्पयेत्॥ विष्णुधर्मोत्तरे कामदेवस्तुकर्तव्योरूपेणाप्रतिमोभुवि॥ अष्टबाहुः
प्रकर्तव्यःशंखपद्मविभूषितः॥ चापबाणकरश्चैवमदोद्वंचितलोचनः॥ रतिःप्रीतिस्तथाशक्तिर्मदशक्तिस्तथो

ज्यायतस्त्वमस्यकर्तव्याः पत्योत्तूपमनोहरा॥ चत्वारश्चकरास्तस्यकार्यानार्यास्थितोपगाः केतौश्वमकरः का
र्यपंच बाणास्तथोमहानिति॥ दामोदरीयेतु॥ चापेषुध्वजकम देवोत्रूपवान्विश्वमोहनइतिचोक्तं॥ अथ पत्ताद्दि
तिब्रस्नादिभिरप्यन्वेति॥ सतानं पूर्वतस्तदतुरीयांशेनकल्पयेत॥ तुरीयांशोपरार्द्धस्पवतिनगुडपुस्त्छोपु
रितत्वसितवस्त्रयुग्मशाखापंचकफलान्वितत्वंचोक्तं मंदाराद्दिषुविवस्त्रयुग्मं घन्वेति॥ मंदारं दक्षिणेपार्श्वे
श्रियासहद्युतोपरिपश्चिमे पारिजातंतु सावित्र्यासदजीरके॥ सुरभीसंयुतंतद्वत्तिलेषुहरिचंदनं तुरीयांशे
नकुर्वीतसौम्येनफलसंयुतं॥ तुरीयेनेतिमंदारपरिजाताभ्यामप्यन्वेति॥ पंचाप्येते द्रुमाः क्रमादन्वछनि
वार्कपारिजद्विल्वतरुतुल्याः कार्याः शिष्टाचारादिति दामोदरः॥ स्वाप्रतिमोक्ताव्रतांडे॥ पस्तासनाचसा क्रि
सा द्वासस्तत्क्रमं उरुतुरिति॥ सवत्सासुरभीधेनुरागता प्रास्तस्तनीति सुरभीलक्षणं॥ एतादिकमपिवत्स्य रामः
परिमितं ग्राह्य॥ कोशेयवस्त्रसंवीतानिकुम्भाल्यफलान्वितान्॥ तथाष्टौपूर्णकलशान्पादुकावानभाज
नं दीपिकोपानहछत्रचामरासनसंयुतं॥ फलमाल्पयुतंतद्वदुपरिष्टाद्वितानकं॥ तथाष्टादशधान्या ॥६२५॥

नि समंताद्दुपकल्पयेत॥ अंशानभाजनं भोज्यपूरितभाजनं॥ धान्यानि प्रत्येकं द्रोणपरिमितानि॥ होमाधिवा
सनांते चस्थापितो वेदपुंगवैः॥ त्रिःप्रदक्षिणमावृत्यसमंत्रमेतमुदाहरयेत॥ अधिवासनांते प्रातः पूर्णकृत्वा द्विक
मीन्वरंगुणाह्वाचूनेकृतेकुंडान्याशाकलशैः स्थापितइत्यर्थः॥ मंत्रापाद्योगे ज्ञेयः॥ एवमामंत्र्य तं दद्यात्कुरवेक
ल्पपादपं चतुर्भिः शापिकृत्विग्भ्यः संतानादीन्प्रकल्पयेत् कुंड चतुष्टयसंबंधिभ्योष्टभ्यऋत्विग्भ्यः संतानादीन्
चतुरो दद्यादिति मदनः॥ चतुर्णामेवऋत्विजो अत्रवरणमितिहेमाद्र्यादयः जपकादिभ्यो चैवदक्षिणा देया
स्वल्पैवकाम्यवस्तुयांकुरीरेवाभिपूजनं॥ नवितन्यभ्रूकुटीतनवविस्मयवान्भवेत॥ अनेन विधिनायस्तु
महादानं निवेशयेत॥ सर्वपापविनिर्मुक्तः सोश्वमेधफलं लभेत॥ अप्सरोभि॥ परिवृतः सिद्धचारणकिंनरैः
भूतान्भव्यांश्चमनुजांस्तारयेद्रोमसंमितान्॥ स्तूयमानो दिवः पृष्ठे पुत्रपौत्रप्रपौत्रवान्॥ विमानेनार्कवर्णे
न विष्णुलोकं सगच्छति॥ द्विविकल्पद्रुमातंतिष्टेजाजराजोभवेत्ततः॥ नारायणबलोपेतो नारायणपरायण
॥ नारायणयपासक्तो नारायणपुरं व्रजेदिति कल्पपादपदानविधिः॥ अथप्रयोगः॥ यजमानोदेशकालौच्चा

दानम:

॥६३॥ रणां ते सर्वपापक्षयपूर्वकाश्वमेधफलप्राप्तिपितृतुष्ट्यादित्वग्रोमसंमितवत्सरपर्यंतस्वकीयकुलपुरुषसंतारणाप्सर

सिद्धचारणकिंनरसेवितबहुसर्वकामयमानत्वविशिष्टार्कवर्णविमानकरणक विष्णुपुरगमनपूर्वककल्पशता

वच्छिन्नकालवैष्णवस्वर्गलोकनिवासपूर्वकनारायणपरायणत्वनारायणतुल्यबलत्वनारायणकथासक्तत्व

विशिष्टत्रलोकराजराजत्वानंतरनारायणपुरप्राप्तिकामः श्वः कल्पपादपमहादानं प्रतिपादयिष्य इति

संकल्पाद्यारब्धोपवासो गोविंदाद्विमंडपपूजान्वा यादिविनियोगो तं कुर्यात्॥ ततो गुरुः षोडशारचक्रबद्धे धुप

रिपुउपस्थे निधाय तदुपरि ब्रह्मविष्णुशिवभास्करप्रतिमाभिः सह पंचशाखं सितवस्त्रयुगान्वितं कल्पवृक्षम

ध्ये स्थापयित्वा गुडप्रस्थे सदारकामप्रतिमया सह निर्मितं सितवस्त्रयुगान्वितं संतानं पूर्ववत्॥ स्थापयित्वा त

ये घृतप्रस्थोपरि श्रीप्रतिमान्वितं मंदारं दक्षिणत॥ स्थापयित्वा पश्चिमे जीरकप्रस्थोपरि सावित्रीप्रतिमान्वि

तं पूर्ववत्पारिजातं स्थापयित्वोत्तरे तिलप्रस्थोपरि सुरभिप्रतिमान्वितं हरिचंदनं स्थापयित्वा प्रत्येकं द्रोण

मितधान्यान्युपविधाय वेद्यां वितानं च बध्वा मंत्रेण पंचपादपान् क्रमेण प्रतिष्ठाप्य ब्रह्मविष्णुशिवार्कस- राम: ॥६३॥

हिताय कल्पपादपाय नमः॥ सदारकामसहिताय संतानाय नमः॥ श्रीसहिताय मंदाराय नमः॥ सावित्रीसहिताय पारि

जाताय॰ सुरभिसहिताय हरिचंदनाय त्येवं प्रकारेण यथासंभवमावाहितानाद्युपचारैः संपूजयेत्॥ ततः

कुंडसमीपकुंभस्थापनग्रहस्थापनप्रभृतिपूर्णाहुत्यभिषेकांतं तुलापुरुषवत्कुर्यात्॥ एवमभि

षिक्तो यजमानः शुक्लवेषो धृतः पुष्पांजलिः कल्पपादपान् प्रदक्षिणीकृत्यः तत्पश्चिमतः उपविश्य न

मस्ते कल्पवृक्षाय चिंतितार्थप्रदायिने॥ विश्वंभराय देवाय नमस्ते विश्वमूर्तये॥ यस्मात्त्वमेव विश्वात्मा ब्रह्मा

स्थाणुर्दिवाकरः॥ मूर्त्तामूर्त्तं परं बीजं अतः पाहि सनातन॥ त्वमेवामृतसर्वस्वमनंतपुरुषोव्ययः॥ संतानाद्यैरुपे

तः सन्पाहि संसारसागरात्॥ इत्युक्त्वा पुष्पांजलिं क्षिप्त्वा नवेदिपश्चिमतः प्राङ्मुखो॰ऽद्येत्याद्युक्त्वा सर्वपातकक्ष

र्वपातकक्षयेत्यादिनारायणपुरप्राप्तिकामः इत्यंतमुच्चार्य इतेमुकगोत्रेत्यादिविशेषणविशिष्टमुच्चार्य तु-

भ्यंगुरव इमं कल्पपादपं भूतदेशस्थापितब्रह्मविष्णुशिवभास्करप्रतिमं गुडप्रस्थोपरिस्थितं सितते

वस्त्रयुगान्वितं कौशेयमंडपवितानकलशाष्टकेक्षुमाल्यफलपादुकासनभाजनदीपिकोपानच्छत्रादिसहितं सविता

तं संप्रददइति गुरुहस्ते जलं क्षिपेत्। गुरुश्च स्वस्तिशब्दपूर्वकं देवस्यत्वेति प्रतिगृह्य कामस्तुतिं पठेत्। ततए
तत्प्रतिष्ठार्थमिदं हिरण्यं ग्रामरत्नादिकं च दक्षिणां तुभ्यं गुरवे संप्रददे इति तां निदध्यात्। एवं पूर्वतो गुडप्र
स्थोपरिस्थितं सदारकामप्रतिमान्वितमिक्षुमाल्यफलाद्युपकरणानि संतानं तुभ्यं बह्वृचायर्त्विजे संप्रददइति
ततो दक्षिणे घृतप्रस्थोपरि मंदारं श्रीयुतं यजुर्विदे ऋत्विजे पश्चिमायां जीरकस्थसावित्रीप्रतिमान्वितं पारिजातं
सामवेदाध्यायिने उत्तरे तिलप्रस्थोपरिस्थितं मूलेसुरभीप्रतिमान्वितं हरिचंदनमथर्वविदे दत्वा चतुर्भ्यो
पि सुवर्णग्रामरत्नादिरूपां दक्षिणां दद्यात्। यद्वा गुर्वादीन्संतोष्य तदनुज्ञयान्येभ्योपि दद्यात्। ततश्चाचार्यः
पुण्याहवाचनांते पुनर्ग्रहादिपूजां कारयित्वा पीठादिदेवताविसर्जनं कुर्यात्। इति कल्पपादपदानविधिः॥ अ
थ गोसहस्रं॥ मात्स्ये अथातः संप्रवक्ष्यामि महादानमनुत्तमं॥ गोसहस्रप्रदानाख्यं सर्वपापहरं शुभं॥ पुण्यांति
थिमथासाद्य युगमन्वंतरादिकं॥ पयोव्रतं त्रिरात्रं स्यादेकरात्रमथापि वा॥ लोकेशावाहनं कुर्यात्तुलापुरुषदा
नवत्॥ पुण्याहवाचनं कुर्याद्धोमः कार्यस्तथैव च॥ ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं॥ वृषं लक्षणसं

युक्तं वेदिमध्येधिवासयेत्॥ गोसहस्राद्विनिष्क्रम्य गवां दशकमेव च॥ इत्यादि॥ पयोव्रतं दानात्पूर्वं॥ वृषश्च पुष्टः सु
रूपो तारुण्यग्राह्यः॥ यत्तु केचित् उन्नतस्कंधककुदमुज्वलापतकंबलमित्यादीनि वृषोत्सर्गप्रकरणे मात्स्येउ
क्तानि लक्षणानि ग्राह्याणीत्युक्तं तत्र मूलं मृग्यं गोसहस्राद्विनिष्क्रम्येति दशोत्तरगोसहस्रादित्यर्थः। तथा च दशा
धिकं गोसहस्रं ज्ञेयं। तत्राप्यधिवासनीयं गोदशकं॥ सहस्रगोषु तु नावश्यं धेनुत्वादर विवेक इति केचित्। गो
सहस्रं बहिः कुर्याद्वस्त्रमाल्यविभूषितं॥ सुवर्णशृंगाभरणं रौप्यपादसमन्वितं॥ बहिः। कुर्यान्मंडपाद्बहिरासा
दयेत्। अंतः प्रवेश्य दशकं वस्त्रमाल्यैः प्रपूजयेत्॥ सुवर्णघंटिकायुक्तं ताम्रदोहनिकान्वितं॥ सुवर्णतिलको
पेतं हेमपट्टैरलंकृतं॥ कौशेयवस्त्रसंवीतं माल्यगंधविभूषितं॥ हेमरत्नयुतैः शृंगैश्चामरैश्चापि शोभितं॥ पा
दुकोपानहच्छत्रचामरासनसंयुतं॥ सुवर्णघंटिके अत्र सुवर्णशब्दः द्वादशमाषपरिमितहेमपरः। सकलस्थलेषु सुवर्ण
त्राद्यामतयैव प्रसिद्धेः॥ अत्र शृंगे दशसुवर्णिके खुराः पंचपलाः॥ पंचाशत्पलं दोहनपात्रमित्यन्यत्रोक्तं ग्रा
ह्यमिति केचित्॥ यथाशक्तीति परे। पादुकोपानहादिपंचकं गोदशकसमीपे स्थाप्यं॥ गवां दशकमध्ये स्था

दानमयूखे ०

॥८५॥ कांचनोनंदिकेश्वरः। कौशेयवस्त्रसंवीतो नानाभरणभूषितः। लवणद्रोणशिखरे मात्स्येक्षुफलसंयुतः। ऊर्ध्वंस्थि
तेन द्विभुजः सौम्यास्यो नंदिकेश्वरः। वामे त्रिशूलं दक्षे चाक्षमालासमन्वितः। ऊर्ध्व इति स्थितः इत्यर्थः। कुर्या
त्पलशताटूर्ध्वं सर्वमंतदशेषतः। शक्तितः पलसाहस्रं वित्तं पूर्वं देवतु। सा नरणानंदिकेश्वरनिर्माणमेतम
मानमिति हेमाद्रौ। गोत्तृषणं घृतेनमध्य इति दानसागरादौ। गोत्रातेवैदृशं शेनसर्वमेतत्प्रकल्पयेत्। गोत्रा
तारवमहादानं सप्तदशमिति दानसौख्ये पुण्यं दिनमथासाद्य गीतमंगलनिस्वनैः। सर्वौषध्युदकस्नानस्नापिता
वेदपुंगवैः। इममुच्चारयेन्मंत्रं गृहीतकुसुमांजलिः। मंत्रप्रयोगे ज्ञेयः। इत्यामंत्र्य ततो दद्यात्कुरवेनंदिकेश्वरं। सर्वो
पकरणोपेतं गोपुंगव विचक्षणः। कृत्विग्भ्यो धेनुमेकैकां दशकाद्विनिवेदयेत्। गवां शतमथैकैकं तदर्धं वाथ
विंशति। दशापंचाथवा दद्यादन्येभ्यस्तदनुज्ञया। अनेकृत्विजः दासीनश्चविप्राः सर्वपक्षेषु द्विगुणगुरवे देयाः।
नैका बहुभ्यो दातव्या यतो दोषकरा भवेत्। बह्वीत्वेकस्य दातव्याः श्रीमदारोग्यवृद्धये। श्रावयेच्छृणुयाद्वापि महा राम:
दानानुकीर्तनं। तद्दिने ब्रह्मचारी स्याद्यदिच्छेद्विपुलां श्रियं। अनेन विधिना यस्तु गोसहस्रप्रदो भवेत्। सर्वपाप ॥६३८॥

विनिर्मुक्तः सिद्धचारणसेवितः। विमानेनार्कवर्णेन किंकिणीजालमालिना। सर्वेषां लोकपालानां लोके संपूज्यते न
रैः। प्रतिमन्वंतरं तिष्ठेत्पुत्रपौत्रसमन्वितः। सप्तलोकानतिक्रम्य ततः शिवपुरं व्रजेत्। शतमेकोत्तरं तत्र तिष्ठेद्गणता
रये बुधः। मातामहानां तद्वत्पुत्रपौत्रसमन्वितः। यावत्कल्पशतं तिष्ठेद्राजराजो भवेत्ततः। अश्वमेधशतं
कुर्याच्छिवध्यानपरायणः। वैष्णवं योगमास्थाय ततो मुच्येत बंधनादिति। अथ प्रयोगः। यजमानोधिवास
नदिनात्पूर्वं त्र्यहमेकाहं वा यथामात्राहारोधिवासनदिने ताबुस्का सकलपापक्षयानंतरसिद्धचारणसेवि
तत्वार्कवर्णस्वर्णकिंकिणीजालमालिविमानारोहणोत्तरैकैकमन्वंतरावच्छिन्नेंद्रादिसकललोकपाललोकाधि
करणकपुत्रपौत्रसमन्वितनिवासामरकर्तृकपूजापूर्वकसप्तलोकातिक्रमणोत्तरपुत्रसमन्वितशिवालयगम
नैकोत्तरशतपितृपितामहकुलतारणकल्पशतावच्छिन्नशिवपुरनिवासानंतरराजराजीभवनाश्वमेधशत
कर्तृत्वशिवध्यानपरत्वविष्णुसायुज्यपावनयोगप्राप्तिहेतुकसंसारमोचनकामोहं गोसहस्रदानमहं करि
ष्य इति संकल्प्य उपवासगोविंदादिपूजादिमंडपपूजाचार्यादिविनियोगांतं कृत्वा ततो गुरुर्वेदिमध्ये षोडश।

रंविलिख्य पुष्पैरवकीर्य पूर्ववेदिकं वृषं धेनुदशकं च वस्त्रमाल्यसुवर्णघंटासुवर्णतिलकसुवर्णशृंगरौप्यखुरदोहन
पात्रकौशेयवस्त्रपादुकोपानहछत्रचामरासनाद्युपशोभितं वेद्यां परितः स्थापयेत्। मंडपाद्दक्षिणे गोसहस्रं सुवर्ण-
शृंगासहितं चाधिवासयेत्। ततः स वृषगोदशकं मध्ये षोडशारक्तलवणद्रोणोपरि कौशेयवस्त्रसंवीतं माल्यसुफला
दिसंयुतं प्रागुक्तं नंदिकेश्वरं स्थापयेत्। पूजयेद्दूपरिवितानं बध्नीयाच्च। ततः कुंडसमीपतः कुंभस्थापनग्रहस्थाप
नग्रहस्थानपूर्णाकृत्य निषेकांतं तुलापुरुषवत्। ततो यजमानः पश्चात्स्थित्वा पुष्पाण्यादाय स वृषं गोदशकं नमो वो
विश्वमूर्तिभ्यो विश्वमातृभ्य एव च। लोकाधिवासिनीभ्यश्च रोहिणीभ्यो नमो नमः। गवामंगेषु तिष्ठंति भुवनान्येक
विंशति। ब्रह्मादयस्तथा देवा रोहिण्यः पातु मातरः। गावो मे ह्यग्रतः संतु गावो मे संतु पृष्ठतः। गावो मे हृदये नि-
त्यं गवां मध्ये वसाम्यहं। यस्मात्त्वं वृषरूपेण धर्म एव सनातनः। अष्टमूर्तेरधिष्ठानमतः पाहि सनातन इत्या वा
हयेत्। ततो वेदिपश्चिमे भागे उपविश्य कुशतिलजलान्यादाय देशकालोच्चारणांते सकलपापक्षयानंतरेत्य
द्विसंसारमोचनकाम इत्यंते संकल्प्य उच्चारितेन तासुवर्णशृंगाद्यं तं कृतां सवृषं सवर्णद्रोणोपरिस्थितनं

दिकेश्वरसहिता। पादुकोपानहछत्रचामरासनसंयुतसवत्सं सुवर्णालंकृत धेनुदशकसहिताः सहस्रं गाः वित
ताद्युपस्करसहिता। अमुकामुकशर्मभ्यो युष्मभ्यमहं संप्रददे इति दद्यात्। ते विप्रास्ततीत्यक्त्वा पुच्छेषु प्रतिगृह्य
कृजायगामित्याद्युक्त्वा स्वस्वकामस्त्विति पठेयुः। दाता दानप्रतिष्ठार्थं ते पुरः दक्षिणां दद्यात्। सोपकरणं नंदिके
श्वरं प्रत्यक्षवृषं धेनुदशकं सोपकरणं धेनुद्वयं गोसहस्रात् द्वयं गुरवे दद्यात्। ऋत्विग्भ्यश्च दशकांतर्गतां
नामेकैकां गोसहस्राच्च प्रत्येकं शतमित्येकः पक्षः। जापकादीनामन्येषां दक्षिणां देया ग्रामाः। दीनानां तोषयेत्
छंविभाग इति प्रागुक्तं। ततः पुण्याहवाचनांते ग्रहपूजनं तद्विसर्जनादि सर्वं प्रकृतिवद्भवेत्। अस्मिन्
दिने दुग्धमात्राहारो ब्रह्मचारी च भवेत्। कर्मसाद्गुण्यार्थं यथाशक्ति ब्राह्मणान्॥ ॥ इति गोसहस्रदानप्रयो
गः॥ अथ हिरण्यकामधेनुः॥ मात्स्ये॥ अथातः संप्रवक्ष्यामि कामधेनुविधिं परं सर्वकामप्रदं नृणां सर्वपातकनाश
नं। लोके ह्यावाहनं तद्वद्धोमः कार्योऽधिवासनं तुलापुरुषवत्कुर्यात्कुंडमंडपवेदिकां। स्वल्पे ह्येकाग्निवत्कुर्याद्गुरुरे
कः समाहितः। कुंडमंडपेति गोविंद पूजादि ब्राह्मणभोजनांत धर्माणामुपलक्षणं। गुरुरेक इत्यृत्विक्निषेधो न जाप

दानम०

॥६८॥ कानां॥ कांचनस्यापि सुश्लक्ष्णे धेनुं वत्सं च कारयेत्॥ उत्तमा फलसाहस्त्रैस्तदर्द्धेन तु मध्यमा॥ कनीयसी तदर्द्धेन॥
कामधेनुः प्रकीर्तिता॥ यद्यपि पीठोक्ता दिवत्स ह स्रगं गगणा॥ साहस्रं बहुवचनेन च तत् कृत्वे उक्तेन च सहस्रं पला
नीति जाति तथापि कलातर्वाघ प्रकर्षवहुत्कर्षोपितत्तुल्परा वोचित॥ उपनायनमिति ब्रूनु साहस्त्रैरिति हस्रा
नुरोधेन दैर्घ्यं पलपदस्यापि पूर्वनिपातत्वार्षः तेन पलसहस्त्रैरित्यर्थः॥ स्मनारायणदामोदरयोप्येवं पलसा
हस्त्राति ख्याविकामपाऽऽदरेप्यसुमेवार्थं संवदति॥ शक्तितस्त्रियलाहूर्ध्वं स्वशक्त्यापि हि कारयेत्॥ गुडधेन्वादि
षु चतुर्थांशेन वत्सः स्यादित्यभिधानात्॥ अत्रापि हेमसुवर्णं च तुर्थांशेन वत्सः कार्य इति निबंधकृत॥ वेदी
कृष्णाजिनं न्यस्य गुडरत्नस्तसमन्वितं॥ तथाष्टादशधान्यानि समंतात्परिकल्पयेत्॥ इक्षुदंडाष्टकं तद्वन्नाना फ
लसमन्वितं भाजनं चासनं तद्वत्ताम्रदोहनकं तथा॥ भाजनं भोजनपात्रं कौशेयवस्त्र द्वयं संवृतां गीदीपातपत्राभ
रणाभिरामं॥ कुंडलिनी सघंटा गणित्रिका पादुकरौप्य पादां॥ रसैश्च सर्वैः परतो भिक्षुद्वं हरिद्रा पुष्प फले दानम:
रनेकैः॥ कुंडलनी कर्णयोः कुंडलयुता॥ अजाजिकुस्तुंबुरुशर्करा भिर्वितानकं चोपरि पंचवर्णं गणित्रिका ॥६८॥

क्षमाला॥ दामोदरीये तु गोलत्रिकेति पाठः॥ पादकिंकिणीति तदर्थः॥ पादुकेति पादुकाः काष्ठमय्यः॥ रौप्यं रौप्याल
कारः तद्द्वयमपि पादेषु यस्याः सा॥ अजाजीरकं॥ कुस्तुंबरुधान्याकं॥ रसैर्मधुराम्लतिक्तकषायकटुलवणरस
युतैर्द्रव्यैः॥ स्नातस्ततो मंगलवेदघोषैः प्रदक्षिणीकृत्य सपुष्पहस्तः॥ आवाहनं तां गुडधेनुमंत्रैर्द्विजाय दद्या
द्धृतदर्भपाणिः॥ त्वामं सर्वगुणोपरूप गुणान्वितायत्र विप्राय यः कनकधेनुमिमां प्रदद्यात्॥ प्राप्नोति धामस
पुरंदरदेवजुष्टं कन्यागणैः परिवृतः पदमिंदुमौले॥ विप्रायेत्येकवचनमेकाग्निपक्षे जापकादिभ्योऽन्येन बदक्षि
णा॥ अनेकाग्निपक्षे तुल्यपुष्पवत्सहत्रयमितिकेचित॥ पक्षद्वयेप्येकस्मा एव विप्रायेति तु युक्तं॥ आमंत्रणमं
त्रास्तु प्रयोगे ज्ञेयाः इति॥ इति हिरण्यकामधेनुदानविधिः॥ अथ प्रयोगः॥ तत्र यजमानो नोऽद्येत्याद्युच्चार्य सर्वपाप
क्षयपूर्वकं रुद्रकन्यागणेन्द्रादिसेविता शिवं पदप्राप्तिकामः श्रीहिरण्यगर्भकामधेनुमहादानमहं प्रतिपादयिष्ये
इति संकल्प्य गोविंदादिपूजा हिमंडपपूजादिगुर्वादिनियोगांतं तुलादानवत्कुर्यात्॥ गुरुर्वेद्यां षोडशारं विरच्य तदुप
रि कृष्णाजिनं प्रागग्रीवं गुडरस्तोमकं न्यस्य तदुपरि मंडपस्यं च न्यतदुपरि यतत्र यथाधिकयाशक्ति हेमोका मध्ये

दानम.
॥ ६६॥

नुमालंकारांनिर्माययुक्तरीन्मागनिर्मितिंवसुसंत्तनन्निमुरवदक्षिणदिगवस्थितंविधाय पंचरत्नालंकृतांकौशेयव
स्त्रसंवीतांसौवर्णवत्सुरद्वयमैवैवयकसौवर्णकुंडलद्वयघंटापादकिंकिणीकाष्टपादुकद्वयरोप्यपादचतु
ष्टयाभरणयुतोताम्रदोहनान्वितांतवामतुस्थापयित्वातत्समंताद्धारिद्रुर्णकुंभाष्टकंनानाफलानिअष्टादश
धान्निरक्तुदेडाष्टकंभोजनपावदीपछत्रषड्रसद्रव्याणिहरिद्रांपुष्पाणिजीरकंधान्याकंद्राकरादिस्थापयेत्॥
ततोवितानंबध्वाप्रतिष्ठापूर्वकंनाममंत्रेणयथाशक्त्युपचारैःपूजयेत्॥ततःकुंडसमीपस्थकुंभस्थापनपूर्णकु
त्यंतंश्याभिषेकांतंतुलापुरुषवत्॥एवमभिषिक्तोयजमानोगृहीतकुसुमांजलिःतांप्रदक्षिणीकृत्योपविश्य॥ॐया
लक्ष्मीःसर्वभूतानांयाचदेवेष्ववस्थिता॥धेनुरूपेणसादेवीममशांतिंप्रयच्छतुदेहस्थायाचरुद्राणीशंकरस्यस
दाप्रिया॥धेनुरूपेणसादेवीममपापंव्यपोहति॥विष्णोर्वक्षसियालक्ष्मी॥स्वाहायाचविभावसो॥चंद्रार्कशक्र
शक्तिर्याधेनुरूपास्तुसाश्रिये॥चतुर्मुखस्ययालक्ष्मीर्यालक्ष्मीधनदस्यच॥लक्ष्मीर्यालोकपालानांसाधेनुर्वरदा राम:
स्तुमे॥स्वधायापितृमुख्यानांस्वाहायज्ञभुजांचयासर्वपापहरेधेनुतस्माछांतिंप्रयच्छतु॥इतिपुंडधेनुमंत्रेणावाह्य ॥ ६५॥

ॐत्वंसर्वदेवगणानंदिरमंगभूताविश्वेश्वरित्रिपथगोदधिपर्वतानां॥त्वद्दानशस्त्रशकलीकृतयाजकौघःप्रा
प्तोस्मिनिर्वृतिमतीवपरांतमासि॥लोकेयथेप्सितफलानुविधीयानीत्वामामसाधकोहिभवदुःखमुपैतिम
र्त्यः संसारदुःखशमनायपतस्वकामधेनुरितिदेवगणावदंति॥इत्थमामंत्र्यधेत्वादिकीर्तनांत्वेसर्वपापक्षयपूर्व
कारुद्रकन्यागणोअदिसेवितशिवपदप्राप्तिकामःस्वर्गकामईश्वरप्राप्तिकामोवाग्रवेपूर्वोक्तवत्सपंचरत्नालंका
राद्युपेतामिमांकामधेनुतुभ्यंसंप्रददेइतिदद्यात् ततः॥कृतैतद्दानप्रतिष्ठार्थंग्रामरत्नादिहिरण्यंवासंप्रददे
नममेतिवदेत्॥ततःपुण्याहवाचनानंतरंयजमानोग्रहादिसंपूज्यपंक्तिसाहितं॥विसर्जयेत्॥मंडपाद्युपक
रणंगुरवेनिवेदयेत्॥कर्मसांगतासिध्यर्थंब्राह्मणान्भोजयेत्॥इतिहिरण्यकामधेनुप्रयोगः॥अथहिरण्या
श्वरथदानंमात्स्ये॥अथातःसंप्रवक्ष्यामिहिरण्याश्वविधिपरंयस्यप्रसादाद्भुवनमनंतंफलमश्नुते॥पुण्यांतिथि
मथासाद्यकृताब्राह्मणवाचनं॥लोकेशावाहनंकुर्यात्तुलापुरुषदानवत्॥ऋत्विङ्मंडपसंभारभूषणाछादना
दिकं॥स्वल्पेवेधेकाग्निवत्कुर्याद्धेमवाजिमखंततः॥स्थापयेद्वेदिमध्येतुकृष्णाजिनतिलोपरि॥कौशेयवस्त्र

दानम०
॥८९॥

सर्वांतंकारयेद्धेमवाजिनं॥ शक्तितस्त्रिंशत्फलादूर्ध्वमासहस्रपलाद्बुधः॥ पादुकोपानहछत्रचामरासनभाजनं पूर्ण-
कुंभाष्टकोपेतंमाल्येक्षुफलसंयुतं॥ सव्यासोपस्करां तद्वद्धेममार्कंडसंयुतां॥ मार्त्तंडसंयुतामिति दीर्घः पाठः॥ शय्या-
विशेषणं चेति दामोदरः॥ ह्रस्वपाठेनाश्वस्येति हेमाद्रिमदनौ॥ ततः सर्वौषधिस्नानस्नापितो वेदपुंगवैः॥ इममुच्चार-
येन्मंत्रं गृहीतकुसुमांजलिः॥ मंत्रः प्रयोगे ज्ञेयः॥ गुरव एवेति वाचस्पतिमिश्राः॥ युक्तं चैतत् पलस्य ऋणमानाभावात्
दत्वा पापक्षयाज्ज्ञानी लोकमभ्येति शाश्वतं॥ गोभिर्वै नवतस्मादृत्विजः परिपूजयेत्॥ सर्वधान्योपकरणं गु-
रवे विनिवेदयेत्॥ इमं हिरण्याश्वविधिं करोति सं पूज्यमानो दिवि देवतैश्च॥ विमुक्तपापः सपुरंदरारेः प्राप्नोति सिद्धैर-
भिपूजितः सन्निति॥ अथ प्रयोगः॥ यजमानः अद्येत्याद्युक्तासकलदुरितक्षत्रिसमवंतरशाश्वतसूर्यलोकप्राप्ति-
पूर्वकदेवेंद्रपूज्यमानताविशिष्टस्वर्गलोकमनोरसिद्धपूजितत्वविशिष्टविष्णुलोकप्राप्तिकामः॥ अश्वो हिरण्या-
श्वमहादानमहं प्रतिपादयिष्य इति संकल्प्य गोविंदादिमंडपपूजनादिविनियोगांतं सर्वं पूर्ववत्कुर्यात्॥ ततो
गुरुः षोडशारं चक्रं वेद्यां विलिख्य तदुपलाधिकमहस्रपलपर्यंतं वा वित्तानुसारं सुवर्णघटितं भास्करप्रति-

रामः
॥६५२॥

मायुतं हेमवाजिनं कौशेयवस्त्रसंवीतं प्राङ्मुखं वेस्थापयित्वा समंतादष्टपूर्णकुंभाष्टकं पादुकोपानहछत्रचा-
मरासनभाजनमाल्येक्षुफलान्यष्टादशधान्यानि च स्थापयित्वा सोपस्करां शय्यां च संनिधापयेत्॥ शय्यो-
पकरणानि च तूलिकोपधानप्रच्छदपटफलपुष्पकुंकुमकर्पूरागुरुचंदनतांबूलदर्पणकंकतिकाचाम-
रव्यंजनासनासिपुत्रिकादीपिकोपानत्ताम्रघटिकाजलपात्रवितानानि॥ ततो भास्कराधिष्ठिताय हिरण्याश्वा-
य नमः इति प्रतिष्ठापूर्वकं यथासंभवोपचारैरभ्यर्च्योपरि वितानं बध्नीयात्॥ ततः कुंडसमीपस्थकुंभेनाऽस्या-
पन पूर्णाहुत्यभिषेकांतं प्रकृतिवत्॥ एवमभिषिक्तो यजमानो गृहीतकुसुमांजलिर्हिरण्याश्वं त्रिः॥ प्रदक्षिणी-
कृत्योपविश्य नमस्ते सर्वदेवेश वेदाहरणलंपट वाजिरूपेण मामस्मात्पाहि संसारसागरात्॥ त्वमेव सप्त-
धा भूत्वा छिंदोरूपेण भास्कर॥ यस्माद्भावयसे लोकानतः पाहि सनातनेति॥ अथ मंत्रं नमस्कृत्याद्येत्याद्युक्ते सक-
लेत्यादि प्रागुक्तसंकल्पांते इमं हिरण्याश्वरुक्माजिनापरिन्यस्ततिलद्रोणोपरिस्थितं कौशेयवस्त्रसंवीतं उप-
र्यारूढमार्त्तंडप्रतिमं शय्यामाल्येक्षुफलादिपूर्णकुंभाष्टकसर्वोपस्करयुतममुकगोत्राय गुरवे संप्रददे इ-

दानम०

॥ ९८॥

तितद्धत्तेजलं क्षिपेत्॥ एतद्दानप्रतिष्ठार्थं सुवर्णं दक्षिणां समं प्रदद्यात्॥ छिद्रं दत्वा ऋत्विगादिभ्यो गाः शय्यासुपकरणं दत्वा
पुण्याहवाचनादि ग्रहविसर्जनान्तं कृत्वा ब्राह्मणान् भोजयेत्॥ इति हिरण्याश्वप्रयोगः॥ अथ हिरण्याश्वरथ
दानं मात्स्ये॥ अथातः संप्रवक्ष्यामि महादानमनुत्तमं॥ पुण्यमश्वरथं नाम महापातकनाशनं॥ पुण्यदिनमथा
साद्य कृत्वा ब्राह्मणवाचनं लोकेशावाहनं तद्वत्तुलापुरुषदानवत्॥ ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं
कुर्याज्जिनेति ज्ञानं कृत्वा कारयेद्रथं॥ अष्टाश्वं चतुरश्वं वा चतुश्चक्रं सकूबरं॥ इंद्रनीलेन कुंभेन ध्वजरूपेण सं
युतं॥ लोकपालाष्टकोपेतं पद्मरागदलान्वितं तिलद्रोणमिति॥ आभागात्त्रिलाद्र्ध्वं रश्मितः कारयेद्बुधः॥ भारःप
लसहस्रद्वयं त्रिंशत्तुलापलशतं भारः स्याद्विंशतिस्तुलेति विधानात्॥ एतच्चत्वर्णमानं कूबरध्वजलोकपा
लाश्वचक्ररक्षकसहितस्येति निबंधकृतः॥ कूबरोऽस्तु गाधारकाष्ठं॥ लोकपाललक्षणं ब्रह्मांडउक्तं॥ चत्वारः पूर्ण
कलशा धान्यान्यष्टादशैव तु॥ कौशेयवस्त्रसंवीतं उपरिष्टाद्वितानकं॥ माल्येक्षुफलसंयुक्तं पुरुषेण समन्वितं रामः
पुरुषेणेष्टदेवताप्रतिमायासमन्वितमधिष्ठितं॥ छत्रचामरकौशेयवस्त्रोपानहपादुकाः॥ गोभिर्विभिर्वजः सा ॥ ६४२॥

र्दद्याच्छयनादिकं॥ अश्वाष्टकेन संयुक्तं चतुर्भिरथवाजिभिः॥ द्वाभ्यामथ युतं दद्याद्धेमसिंहध्वजान्वितं
अष्टाश्वं चतुरश्वं चेति कांचनाश्वपरं॥ अश्वाष्टकेनेत्यादि तु प्रत्यक्षाश्वपरमिति भेदः॥ तत्र पक्षद्वयपक्षे हे
ममयसिंहांकितध्वजयुक्तता॥ अवशिष्टपक्षद्वये कांचनाश्वोक्तेः इन्द्रनीलकुंभांकितध्वजयुक्तरथ इति व्यव
स्था॥ यत्तु हेमाद्रौ सप्ताश्वकेन संयुक्तमिति क्वचित्पाठः॥ स सर्वपुस्तकविसंवादादुपेक्ष्यः॥ एतेन यत्केनचिदुक्त
त्वा वालंबने नोक्तमष्टाश्वमित्यनेन पौनरुक्त्याभावादुभयत्रापि हैमाश्वा ग्राह्या न कश्चिदपि स्वाभाविकाश्व इ
ति तदपास्तं॥ चतुरथवाजिभिरिति अस्य चतुरश्वैरित्यनेन पौनरुक्त्यस्यापरिहारश्च॥ चक्ररक्षानुभौ तस्य तुरग
रक्षावथाश्विनौ चक्ररक्षौ चक्रसमीपस्थौ अश्विनौ कार्यौ॥ लक्षणं सुक्तं तुलायां॥ पुण्यकालं ततः प्राप्य पूर्ववत्स्थापि
तो द्विजैः॥ त्रिः प्रदक्षिणमावृत्य गृहीतकुसुमांजलिः॥ शुक्लमाल्याम्बरो दद्यादिमं मंत्रमुदीरयन्॥ मंत्रः प्रयोगे ज्ञेयः॥ इ
ति चतुरथगरथप्रदानमेतद्भवभयसूदनमत्र यः करोति॥ सकलुषपटलैर्विमुक्तदेहः परममुपैति पदं पिना
कपाणेः॥ देदीप्यमानवपुषा विजितप्रभावमाक्रम्य मंडलमखंडमथेंदुरश्मेः॥ सिद्धांगनानयनषट्पदपीय

मानवश्चांबुजेंबुजन्मवेन चिरं सहास्ते ॥ इति हिरण्याश्वरथदानविधिः ॥ अथ प्रयोगः ॥ यजमानो देशकालाद्युक्त्वा सकलकलु
षपटलविमुक्तिनवनयानावपूर्वकपिनाकपाणिपरमपदप्राप्तिकामो देदीप्यमानस्ववपुःप्रभावितचंद्रमंडलाक्र
मणसिद्धांगनानयनषट्पदपेपीयमानवदनांबुजत्वपूर्वकचिरकालब्रह्मसहवासकामः श्रीहिरण्याश्वरथमहा
दानमहं प्रतिपादयिष्य इति संकल्प्य गणेशविप्रादिपूजादि मंडपपूजांतं वा होमविनियोगांतं प्रकृतिवत्कुर्यात् ॥ ततो गु
रुर्वेद्यां षोडशारचक्रादिविरचनं तत्र न्यस्तकृष्णाजिने द्रोणपरिमितान् तिलान् स्थापयित्वा तदुपरि प्रागुक्तकूबर
ध्वजपताकादिभिरष्टभिश्चतुर्भिर्वाश्वैः सह यथाशक्तिवर्णघटितं चतुश्चक्रमिंद्रनीलमयचक्रनाभिकं हेमध्वजयुतं प्र
त्सलाश्वद्वयपक्षे हेमंतं सिंहांकितध्वजसंयुतं प्रागादिदिगष्टकस्थितलोकपालाष्टकप्रतिमायुतं सपद्मरागद
लसौवर्णविष्णुदेवताप्रतिमाधिष्ठितं सवितानकं यथाशक्ति लक्षणयुक्तं समीपस्थाश्वारूढचक्ररक्षाश्विनीकु
मारप्रतिमाद्वययुतं प्रागुक्तकुंभधान्याद्युपेतं सवितानकं यथाशक्ति लक्षणयुतं निर्मितं हेमकैर्विश्वस्तुर्भिर्वा
श्वैर्द्वाभ्यां वा प्रत्यक्षाश्वाभ्यां युतरथं स्थापयेत् ॥ ततो हिरण्याश्वरथाय नम इति संपूज्योपरि वितानं बध्नीयात्

ततः कुंडसमीपस्थकुंभस्थापनपूर्णाहुत्यंतं अभिषेकं च प्रकृतिवत् ॥ एवमभिषिक्तो यजमानो गृहीतकुसुमां
जलिस्त्रिः प्रदक्षिणीकृत्य नमो नमः पापविनाशाय विश्वात्मने वेदतुरंगमाय धाम्नाम धीनायमवाय पापौघदा
वानलदेहि शांतिं ॥ नस्त्वष्टकादिमरुद्गणानां त्वमेव धाता परमं निधानं ॥ यतस्ततो मे हृदयं प्रयातु धर्मैकता
नत्वमघौघनाशात् इति मंत्रमुक्त्वा पुष्पांजलिं प्रदाय प्रणम्य त्वोपविश्य देशकालाद्युक्त्वा सकलकलुषेत्यादि संकल्पांते
गुर्वृत्विग्भ्यो ब्राह्मणेभ्य इमं हिरण्याश्वरथं हैमाश्वं हैमचतुरश्वं वाससर्वोपस्करसहितं संप्रददे न मम इति तत्
हस्ते पुजलं क्षिपेत् ॥ कृतैतद्दानप्रतिष्ठार्थं गतान् सुवर्णान् युष्मभ्यमहं संप्रददे इति वदेत् ॥ अत्राप्यल्पव्ययत्वे
एकाग्निविधानादिकं ज्ञेयं ॥ ततः पुण्याहवाचनं देवताविसर्जनं तं कृत्वा प्रकृतिवत् ब्राह्मणान् भोजयेत् ॥ इति हि
रण्याश्वरथप्रदानप्रयोगः ॥ अथ हेमहस्तिरथप्रदानं मात्स्ये ॥ अथातः संप्रवक्ष्यामि हेमहस्तिरथमुत्तमं ॥ यस्य प्रदा
नात् भवनं वैष्णवं यांति मानवाः ॥ पुण्यां तिथिमथासाद्य तुलापुरुषदानवत् ॥ विप्रवाचनिकं कुर्याल्लोकेशावाह
नं बुधाः ॥ कृत्विग्मंडपसंभारभूषणाच्छादनादिकं ॥ अत्राप्युपोषितस्तद्वद्ब्राह्मणैः सह भोजनं ॥ कुर्यात्पुष्परथा

दानम.
॥र्ग २॥ कारं काचनं मणिमंडलं ॥ बलभीभिर्विचित्राभिश्चतुष्कसमन्वितं ॥ लोकपालाष्टकोपेतं शिवार्कब्रह्मसंयुतं ॥ मध्येना
रायणोपेतं लक्ष्मीपुष्टिसमन्वितं ॥ कृष्णाजिने तिलद्रोणं कृत्वा संस्थापयेद्बुधः ॥ तथाष्टादशधान्यानि भाजनासनचं
दनैः ॥ दीपिकोपानहच्छत्रदर्पणं पादुकान्वितं ॥ ध्वजे तु गरुडं कुर्यात्कूबराग्रे विनायकं ॥ नानाफलसमायुक्तमुपरिसि
तवितानकं ॥ कौशेयं पंचवर्णं च अम्लानकुसुमान्वितं ॥ चतुर्भिः कलशैः सार्द्धं गोभिरष्टाभिरन्वितं ॥ चतुर्भिर्हेममातंगैर्मु
क्तादामसमन्वितैः ॥ स्वरूपतः करिभ्यां च युक्तं कृत्वा निवेदयेत् ॥ कुर्यात्पंचपलादूर्ध्वमाभारादपि शक्तितः ॥ तथामं
गलशब्देन स्नापितो वेदपुंगवैः ॥ त्रिः प्रदक्षिणमावृत्य गृहीतकुसुमांजलिः ॥ इममुच्चारयेन्मंत्रं ब्राह्मणेभ्यो निवे
दयेत् ॥ इत्थं धारात्मकनकेन रथप्रधानं प्राकारयेत्सकलपापविमुक्तदेहः ॥ विद्याधरामरमुनीन्द्रगणाभिजुष्टं प्रा
प्नोत्यसौ पदमतीन्द्रियमिन्दुमौलेरिति ॥ पुष्परथः ॥ क्रीडारथः सर्वोपयोग्यच्छादितो भवति ॥ बलभ्यो लोकपालाश्रया रामः
: ॥ उपरितनलघुगृहाणि तिद्रामोदरः ॥ लोकपालशिवार्कब्रह्मलक्षणानि प्राग्युक्तानि ॥ नारायणप्रतिमान
रद्रूपं चरात्रे नारायणं चतुर्बाहुं शंखचक्रोत्पोतरे ॥ दक्षिणे तु गदापद्मं नीलजीमूतसंनिभं ॥ वामे श्रीवत्सकौ ॥६४५॥

स्तुभौ पुष्टिः पद्मकरा परे ॥ उत्तरे शंखमध ॥ उपरि चक्रं दक्षिणे उपरि गदापद्मम अधः इति वामभागे ॥ गरुडस्तु उपेंद्रस्याग्र
तः पक्षी मुडाकेशः कृतांजलिः ॥ सव्यजानुगतो भूतो मूर्ध्नि च फणमंडितः ॥ पक्षिसंघो मरथी वस्तुगं नासीन रंगक
द्विबाहुपदद्युक्तश्चकर्त्तव्यो विनतासुत इति ॥ विनायकोपि चतुर्भुजस्त्रिनेत्रश्च कर्त्तव्योत्र गजाननः ॥ नागयज्ञोपवी
तश्च व्याघ्रकृतशेखरः ॥ दक्षे दंतं करे दद्याद्द्वितीये वाक्षसूत्रकं ॥ तृतीये परशुं दद्याच्चतुर्थे मोदकं तथेत्युक्तं इत्य
र्थः ॥ पंचपलादिसुवर्णपरिमाणं ध्वजगरुडविनायकादिप्रतिमादिसिद्धि तस्य रथस्य अत्राधिवासनं हेमहस्ति
रथस्यैव स्वरूपं हस्तिनो नस्तु वहिरेव स्थापनं ॥ अथ प्रयोग ॥ यजमानो देशकालौ संकीर्त्य सर्वपापक्षयानंतरसंभा
वितनरकनिवासयातनाचितप्रपुत्रादिसकलवंशोद्धरणपूर्वकविष्णुसदनगमनसमनंतरस्वविष्णुपदप्राप्तिपू
र्वकविद्याधरामरेंद्रादिसेवितनिजदेहमौलिपदप्राप्तिकाम ॥ श्वो हेमहस्तिमहादानमहं प्रतिपादयिष्य इ
ति संकल्प्य प्रकृतिवक्तो विंशादि यज्ञा गुर्वादिविनियोगं तं सर्वं कुर्यात् ॥ ततो गुरुर्वेद्यां षोडशारचक्रे विन्यस्त
दस्तोर्णकृष्णाजिनन्यस्ततिलद्रोणोपरि पलपंचकादाभारांतयथाशक्तिसुवर्णेन गजध्वजलोकपाल-

दानम॰ शिवार्कब्रह्मनारायणादिप्रतिमान्वितं॥ सहनिर्मितं हेमहस्तिचतुष्टययुतं गरुडाधिष्ठितध्वजाग्रं विनायका
॥एं३॥ धिष्ठितकूबरं प्रतित॥ स्थापितधान्याद्युपस्करं प्रत्यङ्गगजद्वयोपेतं सवितानकं रथं स्थापयित्वा ॐ हेम
हस्तिरथाय नमः॥ इति संपूज्योपरि वितानं बध्नीयात्॥ ततः ॐ उसमीपवृत्तं नस्थापूर्नदिपूर्णकृत्यभिषेकांतं
प्रकृतिवत्॥ एवमभिषिक्तो यजमानः सपुष्पांजलिस्त्रिः प्रदक्षिणं प्रक्रम्य नमो नमः शंकर पद्मतार्कलोकेश
विद्याधरपन्नतार्कलोकेशविद्याधरवासुदेवैः॥ त्वं सेव्यसे वेदपुराणयज्ञैर्तेजोमय स्पंदन पाहि तस्मात्॥ यत्र
त्वदंष्ट्रहतमंसुरोरानंदहेतुर्गुणरूपविमुक्तमंत॥ योगैकमानसदृशो मुनयः समाधौ पश्यंति तत्त्वमसि नाथरथा
धेनुरूढ॥ तस्मात्त्वमेव भवसागरसंप्लुतानां मानंदनीउन्नतम धारा पारमात्रं॥ तस्माद् घौघरामनेन कुरु प्रसा
दमाकरे भरथमाधवसंप्रदानात्॥ इति मंत्रैरावाह्य पुष्पाणि प्रक्षिप्य नमस्कृत्य वेदिपश्चिमभागे उपविश्य प्राङ्मु
खः दानसंकल्पमुच्चार्य गुरुं वृत्वा इमं हेमहस्तिरथं यथोक्तसकलोपस्करसहितं प्रत्यङ्गगजद्वययुक्तं पुष्पस्रग् दानमः
संपन्नं दे इति गुर्वादिभ्यो दत्वा सुवर्णदक्षिणां दद्यात्॥ त्रिभागं प्राकृतः स्वस्त्यादिवाचनादिविप्रभोजनांतं प्राकृ ॥६४६॥

तं प्राकृतं॥ स्यात्स्वल्पकालस्य विधानमिति केचित्॥ इति हेमहस्तिरथदानं॥ अथ पंचलांगलदानं॥ अथातः संप्र
वक्ष्यामि महादानमनुत्तमं॥ पंचलांगलकं नाम महापातकनाशनं॥ पुण्यां तिथिमथासाद्य युगादिग्रहणा
दिकं॥ भूमिदानं नरो दद्यात् पंचलांगलकान्वितं॥ खर्वटं खेटकं वापि ग्रामं वा सस्यशालिनं॥ निवर्तनशतं वापि तदर्धं
वापि शक्तितः॥ सारदारुमयान् कृत्वा हलान् पंच विचक्षणः॥ सर्वोपकरणैर्युक्तान् तथान्यान् पंच कांचनान्॥ कु
र्यात् पंचहलानर्धमासहलपलावधि॥ वृषान् लक्षणयुक्तान् स्वदशैव च धुरंधरान्॥ सुवर्णशृंगाभरणान् मुक्तालांगूलभू
षितान्॥ रौप्यपादायतिलकान् रक्तकौशेयभूषणान्॥ स्रग्दामचंदनयुतान् शालायामधिवासयेत्॥ पर्जन्यादि
त्यरुद्रेभ्यः पायसं निर्वपेच्चरुं॥ एकस्मिन्नेव कुंडे तु गुरुर्यस्मै निवेदयेत्॥ पलाशसमिधस्तद्वदाज्यं कृष्णतिलांस्तथा॥
तुलापुरुषवत् कुर्यात् लोकेशावाहनं ततः॥ ततो मंगलशब्देन स शुक्लमाल्यांबरो बुधः॥ आहूय द्विजदंपत्यं हेमसूत्रांगु
लीयकैः॥ कौशेयवस्त्रकटकैर्मणिभिश्चापि पूजयेत्॥ ततः प्रदक्षिणं कुर्याद्गृहीतकुसुमांजलिः॥ इममुच्चारयेन्मं
त्रं मयूपसर्वं निवेदयेत्॥ मंत्रः प्रयोगे ज्ञेयः॥ सप्तहस्तेन दंडेन त्रिंशद्दंडानिवर्तनं॥ त्रिभागहीनं गोचर्ममानमाह

दानम॰
॥ १५४ ॥

प्रजापतिः॥ मंत्रेनानेनयो दद्यानिवर्त्तनशतंनरः॥ विधिनानेनतस्याशु क्षीयते पापसंहतिः॥ सदर्द्धमपियोदद्याद्दपि
गोचर्ममात्रकं॥ भवनस्थानमात्रं वासोपि प्राप्नुयाः प्रमुच्यते॥ सर्वदानादिलक्षणं मार्कंडेये॥ सोस्ये ध्रुवप्राकारं सर्व
तःखानकावृतं॥ योजनार्द्धविष्कंभमष्टनागायुतं पुरं॥ तदर्द्धेन तथा खेटं तत्र्यंशेन च खर्वटं॥ तथा श्रेष्ठजन
प्रायं सुसमृद्धकृषीबलं॥ क्षेत्रोपभोग भूमध्येव सतिर्यातियामसंज्ञिता॥ यावंति लांगलकमार्गमुखानि भूमेर्भर्त्तुर्नि
वेदितुरंगजरोमकाणि॥ तावंति शंकरपुरे स समा हि षष्टिं भूमिप्रदानमिह यः कुरुते मनुष्य इति॥ अथ प्रयोगः॥
यजमानो घेत्यादिसकलपातकक्षयानंतरगंधर्वकिंनरसुरासुरसिद्धसंघसेविताक्षतवामरविमानाधिष्ठानपू
र्वकस्वीयामरनायकत्वपूर्वकपितृपितामहादिवंशसहितशंभुपुरगमनानंतरं तत्पर्यंतलांगलमुखात्कीर्ण
रजःसहितहलसंबद्धवृषरोमसमसंख्यावर्षावच्छिन्नशंभुपुरनिवासकामः स्वः पंचलांगलमहादानं प्रतिपाद
यिष्य इति कृतसंकल्पः प्रकृतिवद्गोविंदादिपूजादिमंडपपूजादि तु वादिविनियोगांतं सर्वं कुर्यात्॥ ततो गुरुः षो
डशारेसारदारुमयानि पंचहलानि युगयोक्त्ररज्जुफालतोदाद्युपकरणयुतानि कांचनोपकरणसहितानि कां

राम:
॥ ६

चननिर्मितानि पंचहलानि तत्सीलांगलाद्युपकरणसहितानि शय्यां ग्रामेकां दोग्ध्रीं परितोष्टादशधान्यानि मंउत्ता
दक्षिणे सहस्रोक्तलक्षणान् वृषान् सोपस्करान् सन्निधिवासवेशुपरिवितानं बध्वा हस्तेभ्यो नम इति मंत्रेण संपूज्य कुं
डान्यां न्यकुंडान्याशेकस्थापनादि वनस्पतिपर्यंतं प्रधानहोमांतं संपादयेत्॥ ततो गुर्वाज्ञया चतुर्णामन्यतमस्मि
विकृस्वकीये कुंडे पर्जन्यादित्येभ्यो रुद्राय जुष्टं निर्वपामीति तत्र देवतायै प्रत्येकं चरुं निरूप्य पयसि श्रपयि
त्वा तेन पलाशसमिद्भिः॥ श्रीवेणाज्येन च श्यामतिलैश्च पर्जन्यादित्यरुद्रेभ्यः तच्छ्रिगकैर्मंत्रैः प्रत्येकमष्टाविंश
तिं जुहुयात्॥ तत्रारुग्वेदिनां स्वशाखावदेति पर्जन्यमंत्रः॥ एवं यजुर्वेदिनां शंनो वातः पवतां॥ सामगानां पर्जन्याय
तामहि ष्पतिमभिक्रंदतानयाद्योदधीति॥ आदित्यरुद्रयोस्तमंत्रात्तत्तच्छाखीयाः सामान्यप्रयोगे पूर्वमुक्ता॥ ग
ताः स्विष्टकृद्धाद्यभिषेको तेततो यजमानाः सपुष्पो लांगलानि त्रिः प्रदक्षिणीकृत्य यस्माद्देवगणाः सर्वे छाद
चाधुरंधरांगे तिष्ठंति तस्माद्भक्तिः शिवास्तु मे॥ यस्माच्च भूमिदानस्य कलां नार्हंति षोडशीं॥ दानान्यन्यानि ते तः
धर्मेण वृषवदहानवेदिकृत्का पुष्पाणि हस्ते शुद्धिं सान्त्वा च वेदिपश्चिमतदुपाविश्य सपत्नीकं गुरुह नाहतो

दानमः

९५

तथाद्येत्यादि प्रधानसंकल्पकीर्तनांते ऽमुकगुरवे तुभ्यं भूमिसंहिता निधुरंधरवृषशय्यादिसर्वोपस्कर समहि ग्रा दपि
सुवर्णसारदारुमयानि ३ नयविधानि हलानि सुवर्णसारदारुमयानि ३ नयविधानि हलानि संप्रदद इ संसर्व
द्यात् । दक्षिणां च कर्तव्यो ऽन्यादक्षिणां च कर्तव्यो ऽन्या दक्षिणात्स्वल्पे स्वेकादशविधा नमिति केचित् । पुण्या
हवाचनं । तत्पूजादेवताविसर्जनविप्रभोजनानि । इति पंचलांगलदानप्रयोगः । अथ धरादानं । मात्स्ये । अथातः सं
संप्रवक्ष्यामि धरादानमनुत्तमं पापक्षयकरं नृणाममंगल्यविनाशनं । कारयेत्पृथिवीं हैमीं जंबूद्वीपानुकारिणीम
र्यादापर्वतवतीं मध्ये मेरुसमन्वितां । लोकपालाष्टकोपेतां नववर्षसमन्वितां । नदीनदसमेपितां संते सागरवेष्टितां
महारत्नसमाकीर्णां वसुरुद्रार्कसंयुतां । हेम्नः पलसहस्रेण तदर्धेनापि शक्तितः । शतत्रयेण वा कुर्याद्द्विशतेन शतेन
वा । कुर्यात्पंचपलादूर्ध्वमशक्तोपि विचक्षणः । पलसहस्रादिमानं प्रतिमादिसहितया । पृथिव्याः । तुलापुरुषवत्
कुर्याल्लोकेशावाहनं ततः । ऋत्विङ्मंडपसंभाररभूषणाच्छादनादिकं । वेद्यां कृष्णाजिनं । कृत्वा तिलानामुपरिन्यसे
त् । तथाष्टादशधान्यानि रसांश्च लवणादिकान् । तथाष्टौ पूर्णकलशान्समंतात्परिकल्पयेत् । वितानकं च कौशेयक

रामः

६४९

लानि विविधानि च । इत्येवं रचयित्वा तामधिवासनपूर्वकं । पुण्यकाले मया सार्घमंत्रानेतानुदीरयेत् । मंत्राः प्रयो
गे ज्ञेयाः । एवमुच्चार्य तां देवीं ब्राह्मणेभ्यो निवेदयेत् । धरार्धं वा चतुर्भागं गुरवे विनिवेदयेत् । शेषं चैवाप्यृत्वि
ग्भ्यः प्रणिपत्य विसर्जयेदिति । एकहस्तेन कर्तव्या चतुरस्रा सुशोभितेति । हेमाद्रिरूपनारायणादिनिबंधेषु रत्नो
त्रा । त्रिकोणा दानसौरव्यदामोदरीये च । परिमंडलेत्यन्ये । अनेन विधिना यस्तु दद्याद्धेमधरामुत्तमां । पुण्यकाले
तु संप्राप्ते स पदं याति वैष्णवं । विमानेनार्कवर्णेन किंकिणीजालमालिना । नारायणपुरं गत्वा कल्पत्रयमसौ रमे
त् । पितृपौत्रांश्च तारयेदेकविंशतिमिति । पृथिवी हैमी कुर्यादित्यत्र सप्तद्वीपवती । करणप्रसंगे जंबूद्वीपानुका
रिणीमिति विशेषणं । जंबूद्वीपानुमाहत्वेपि नानापर्वतसरीवराधिवत्तानुकारप्रसंगे मर्यादापर्वतवतीमित्युक्तं
वतामेरोरेवकरणप्रसंगो मध्ये मेरुसमन्वितामित्युक्तं । जंबूद्वीपस्वरूपं विष्णुपुराणे । नववर्षं तु मैत्रेय वलया
कारः स्थिताः क्षारोदधिबहिः । जंबूद्वीपसमस्तानां द्वीपानां मध्यतः स्थितं । तस्यामेरुर्मैत्रेय मध्ये कनकनिर्मितः ।
चतुरशीतिसाहस्रैर्योजनैरस्य चोच्छ्रयः । प्रविष्टः षोडशाधस्ताद्द्वात्रिंशन्मूर्ध्नि विस्तृतः । मूले षोडशसाहस्रो

दानम०
॥९६॥

विस्तारस्तस्य पर्वतः॥ तथा॥ मेरुश्चतुर्दिशं तत्र नवसाहस्रविस्तृतं॥ इलावृतं महाभाग चत्वारश्चात्र पर्वताः॥ विष्कंभा
रचिता मेरो योजनायतविस्तृताः॥ पूर्वेण मंदरो नाम दक्षिणे गंधमादनः॥ वैभ्राजः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृ
तः॥ मर्यादपर्वतास्तु ब्रह्मांडे जठरो देवकूटश्च पूर्वस्यां दिशि पर्वतौ॥ तौ दक्षिणोत्तरायामावानीलनिषधायतौ
कैलासो हिमवांश्चैव दक्षिणे वर्षपर्वतौ॥ पूर्वपश्चायतावेतावर्णवांतर्व्यवस्थितौ॥ विपक्षः पारिपात्रश्च पश्चिमेव
र्षपर्वतौ॥ तौ दक्षिणोत्तरायामावानीलनिषधायतौ॥ इलावृतस्योभयपार्श्ववर्त्तिनौ नीलनिषधौ द्वौ पर्वतौ दैर्घ्येण
लक्षयोजनौ वर्षाण्युक्तानि ब्रह्मांडे उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणे तद्वै भारतं नाम भारती यत्र संतति
भारतं प्रथमं वर्षं ततः किंपुरुषं स्मृतं॥ हरिवर्षं तथैवान्यं मेरोर्दक्षिणतो द्विज॥ रम्यकं चोत्तरे वर्षं तस्यैवानु हि
रण्मयं॥ उत्तराः कुरवश्चैव यथा वै भारतं तथा वै भारतं तथा॥ मेरोः पूर्वेण भद्राश्वं केतुमालं तु पश्चिमे॥ वर्षे द्वे तु समाख्या
ते तयोर्मध्यमिलावृतं॥ नवसाहस्रमेतेषां एकैकं द्विजसत्तमाः॥ अथ प्रयोगः॥ कर्त्ताद्येत्याद्युक्त्वा सर्वपापामंगल
निवृत्तिपितृपुत्राद्येकविंशतिस्वपुरुषोद्धारणपूर्वककिंकिणीजालमालिनीवर्णविमानकरणकनारायणपुरग

रामः
॥६५९॥

मानानंतरकल्पत्रयावच्छिन्ननारायणपुरनिवासकाम॥ पृथ्वीधरामहादानमहं प्रतिपादयिष्ये इति प्रधानसंकल्पादि
षोडशाराखिरवनांतं प्रकृतिवत्॥ तदुपरि लक्षाजिनमात्रां यंत्रद्रोणमितां तिलानामासाद्य तदुपरि प्रागुक्तलक्ष-
णां मेरोरुपरि पूर्वादिक्रमेण लोकपालाष्टकोपेतां महारत्नयुतां वसुरुद्रादित्यप्रतिमोपेतां धरां स्थापयेत्॥ तस्याश्च
परितः प्रागुक्तां धान्यकुंभाष्टकोपेतनानाविधफलवासः प्रभृतीन्स्थापयेत्॥ धरायै नम इति पूजयेदुपरिवि
तानं बध्नीयाच्च॥ ततः कुंडसमीपस्थकुंभस्थापनादि पूर्णाहुत्यभिषेकांतं प्रकृतिवत्॥ एवमभिषिक्तो यजमानः तां त्रि
ःप्रदक्षिणीकृत्य पुष्पादाय॥ नमस्ते सर्वभूतानां त्वमेव भुवनं यतः॥ धात्री च सर्वभूतानामतः पाहि वसुंधरे॥ वसुधारय
से यस्माद्वसु चातीव निर्मलं॥ वसुंधरा ततो जाता तस्मात्पाहि भयादलं॥ चतुर्मुखोपि नो गच्छेद्यस्मादंतं तवाचले
अनंतायै नमस्तस्मात्पाहि संसारकर्दमात्॥ त्वमेव लक्ष्मीर्गोविंदे शिवे गौरीति संस्थिता॥ गायत्री ब्रह्मणः पार्श्वे
ज्योत्स्ना वेदै रवौ प्रभा॥ बुधिर्बृहस्पतौ ख्याता मेधा मुनिषु संस्थिता॥ विश्वं व्याप्य स्थिता यस्मात्ततो विश्वंभरा स्मृ
ता॥ धृतिः स्थितिः क्षमा क्षोणी पृथ्वी वसुमती रसा॥ एताभिर्मूर्त्तिभिः पाहि देवि संसारसागरात्॥ इत्यभिमंत्र्य पु

दानम॰ ॥ ६७॥

ष्पाणि प्रक्षिप्य तस्योदङ्मुखो वान्ब्राह्मणान्नृपवेश्मपा घेत्याद्युक्त्वा सर्वपापेत्यादिनारायणपुरनिवासकाम
इत्यंतं प्रतिज्ञावत्तच्चाचार्यइमां कृष्णाजिनन्यस्तां तिलोपरिविन्यस्तां पंचपलाधिकयथाशक्तिहेमसपरिकरनि
र्मितां जंबूद्वीपानुकारिणीं मर्यादापर्वतमध्यमेरुनववर्षलोकपालाष्टकनदीनदशतायुतं तत्प्रसागरवेष्टितां फ
लधान्यवस्त्रादिप्रतिमाद्युपेतां धरां विष्णुदैवतां युष्मभ्यमहं संप्रददे इति दद्यात्॥ अर्द्धतुरीयांशं वाचार्याय
त्रिंशं ऋत्विग्भ्यः प्रयच्छति वह्निरागइतिकेचित्॥ नृपकर्तृदानेयमादिदक्षिणा॥ अन्यकर्तृकेन्यथाशक्तिस्तुव
र्णं स्वल्पेत्विकाग्निविधानमितिकेचित्॥ ब्राह्मणार्चनदेवतापूजनविसर्जनविप्रभोजनानि प्रकृतिवत्॥ इति
धरादानप्रयोगः॥ अथ विश्वचक्रदानं॥ मात्स्ये॥ अथातः संप्रवक्ष्यामि महादानमनुत्तमं॥ विश्वचक्रमिति॥
ख्यातं सर्वपापप्रणाशनं॥ तपनीयस्य शुद्धस्य तुद्विश्वादि तु कारयेत्॥ श्रेष्ठं पलसहस्रेण तदर्द्धेन तु म
ध्यमं॥ तस्यार्द्धेन कनिष्ठस्यादि श्वचक्रमुदाहृतं॥ अन्यद्विंशपलादूर्ध्वं अशक्तोपि निवेदयेत्॥ वस्वमा
णाविष्णवादिप्रतिमासहितस्य विश्वचक्रस्येदं मानं॥ षोडशारं ततश्चक्रं भ्रमते स्वष्टकान्वितं॥ अरानाभिस्थष्ट

रामः ॥ ६५०

लानेमिः स्पष्टायाः शाब्दकाः॥ अमंतीनां वलयाकारेण नेमीनां च कावयवानां अष्टकेनावृतं वेष्टितमित्यर्थ
॥ नाभिपद्मे स्थितं विष्णुं योगारूढं चतुर्भुजं॥ नाभिपद्मेनाभिरूपाष्टदलपद्मकर्णिकायामित्यर्थः॥ अष्टसु
दलेषु आवरणरूपदेवताष्टकस्य संनिवेशात् शंखचक्रेस्य पार्श्वे तु देव्यष्टकसमायुतं॥ योगारूढं हृत्स्वदे
शावस्थितसंपुटाकारहस्तद्वयं॥ अष्टौ देव्योपि पंचरात्रे॥ विमलोत्कर्षिणी ज्ञाना क्रिया योगा तथैव च॥ प्र
ह्वी सत्याताः दक्षिणोदश॥ आयुधं चक्रमितिशेषो हरः॥ द्वितीयावरणे तद्वत्सर्वतो जलशायिनं॥ अत्रिर्भृगु
वसिष्ठश्च ब्रह्मा कश्यप एव च॥ मत्स्यः कूर्मश्च वाराहनरसिंहोथवामनः॥ रामो रामश्च कृष्णश्च बुद्धः कल्की
च ते क्रमात्॥ तृतीयावरणे गौरी मातृभिर्वसुभिर्युता॥ चतुर्थे द्वादशादित्या वेदाश्चत्वार एव च॥ पंचमे पंच
भूतानि रुद्राश्चैकादशैव तु॥ लोकपाला अष्टकं षष्ठे दिग्मातंगास्तथैव च॥ सप्तमे स्त्राणि सर्वाणि मंगलानि च का
रयेत्॥ अंतरांतरतो देवान्विन्यसेदष्टमे पुनः॥ तुलापुरुषवत्कुंडं समंतात्परिकल्पयेत्॥ कृष्णाजिनतिला
दीनि धान्यवासः फलानि च॥ होमाधिवासनांते तु गृहीतकुसुमांजलिः॥ होमइत्यादिश्चिकाधिष्ठितविश्व

दानम॰
॥ ५९८ ॥

द्विदैवत्यहोमविधानार्थं स च होमः तन्मंत्रैनामंत्रैर्वा प्राकृतयज्ञामोत्तरं कार्यं॥ आगंतूनामंते निवेश इति
न्यायात्॥ इति केचित्॥ तन्न॥ एतस्य प्राकृतहोमानुवादकतया विधायकत्वाभावात्॥ इममुच्चारयेन्मंत्रं त्रिः
कृत्वा प्रदक्षिणं॥ मंत्रः प्रयोग — य॥ इत्यामंत्रं तु यो हद्या द्विसंध्यं च कविसत्तम॥ विमुक्तः सर्वपापेभ्यो विष्णुलो
के महीयते॥ वै ॐ वलोकमासाद्य चतुर्बाहुः सनातनः॥ सेव्यतेप्सरसां संघैरित्ति इत्कल्पशातत्रयं॥ पुण्यमेवा
स्वयं कृत्वा विष्णुचक्रं दिने दिने॥ तस्यायुर्वर्द्धते नित्यं लक्ष्मीश्च विपुला भवेत्॥ इति मकलसुराधिपाधिवा
सं वितरतियत्तपुनीयषोडशारं॥ हरिभिव नत्तु पागतः स सिद्धैश्चिरमधिगम्य नमस्यते शिरोभिरिति॥ जलशायी
ब्रह्मोउत्कः॥ ऋषिरूपं पंचरात्रे॥ जटिलाः श्मश्रुलाः शांताः कृशा धमनिसंतताः॥ कुंडिकाक्षधराः कार्याः कपि
यो द्विभुजाः स दाधमनिः शिरा कुंडिका श्री कमंडलु॥ अक्षसमाला॥ मत्स्यादयः पंचरात्रे॥ वामे शंखं गदां द
क्षे द्विभुजो मत्स्यरूपधृक्॥ नरांघ्रिर्मत्स्यरूपो वा मत्स्याकृतीजनार्दनः॥ अधोघ्रामत्स्यरूपं चेति विकल्पः॥
दामोदरस्तु मुक्तायुधकरस्वरणाद्युतपुरुषाकारे रामस्य केवलमत्स्याकारस्याविकल्पमाहाकूर्मस्तु क

रामः
॥ ६५१ ॥

च्छयाकारमत्स्यरूपो रूपवान्॥ मधुपिंगलवर्णं च चतुर्बाह्वायुधैर्युतं॥ नरांगं सूकरास्यं च मनाकपानं तु
भाषणं॥ श्रीवामकूर्परस्थां तु धरां नतोपदानुगे॥ एतद्रूपधरं देवं वराहं मुक्तिमुक्तिदं॥ कूर्परदंष्ट्राग्रमिति दामोदरः
ज्वलत्तैदर्शिसमाकारं सिंहवक्त्रं नरांगकं॥ दंष्ट्राकरालवदनं ललज्जिह्वं सुभीषणं॥ वृत्तास्यजटिलस्कंध सपी
नपीनवक्षसं क्षामे घनाद्दानखरमात्मसंहरादानवं॥ तद्वक्षोदारयंतं च कराभ्यां नखरैर्भृशं॥ गदाचक्रेध
रं वाभ्यां नरसिंहं जगत्प्रभुं॥ कुंडी छत्रधरो द्विदो वामनः परिकीर्तितः॥ क्षत्रांतकरणं घोरमुद्वहन् परशुं करे॥ जाम
दग्न्यः कर्तव्यो रामो रोषारुणेक्षणः॥ युवा प्रसन्नवदनः॥ सिंहस्कंधो महाबलः॥ आजानुबाहुः कर्तव्यो रामो बाण
धनुर्धरः॥ मद्यपात्रं च सीरं च वामदक्षिणयोः क्रमात्॥ गदामुसलवज्रं च हलारामः प्रकीर्तितः॥ मुसलहस्तपंकज
मित्यर्थः॥ दक्षिणे धौधा॥ करयोर्मद्यपात्रसीरे॥ वामयोर्गदामुसले इति चतुर्बाहू रामः॥ शंखचक्रधरः श्यामो
द्विभुजः कृष्णसंज्ञकः॥ काषायचैववस्त्रसंवीतः स्कंधसंसक्तचीवरः॥ पद्मासनस्थो द्विभुजो ध्यायी बुधः प्रकी
र्तितः॥ खड्गोद्यतकरः क्रुद्धो हयारूढो महाबलः॥ खड्गोद्यतकरः क्रुद्धो हयारूढो महाबलः॥ खड्गोद्यतकरः क्रुद्धो

हयात्कृडोमहाबलः॥ खड्गोघतकरःक्रुधोहयात्कृडोमहाबलः॥ खड्गोघतकरः॥ क्रुद्धोहयात्कृडोमहाबलः॥ म्लेछोछेद
करःकल्कीद्विभुजःपरिकीर्तितइति॥ अथविश्वचक्रप्रयोगः॥ अधिवासनदिनेयजमानउपविश्यपाद्येत्यादिकीर्त्त
नांतेसकलपापक्षयानंतरविष्णुलोकमहीयमानत्वविशिष्टवैकुंठलोकासादनपूर्वकचतुर्बाहुत्वसनातनत्वा
प्सरःसंघसेव्यमानताविशिष्टकल्पत्रयावधिकतदधिकरणकस्थितिकामोहं अमुं विश्वचक्रमहादानं प्रतिपादयि
ष्यइतिकृतसंकल्पःप्रकृतिवक्तोबिंदादिपूजादिमंडपपूजादिगुर्वादियोगांतसर्वंकुर्यात्॥ ततोगुरुर्वेद्यांषोडशारचक्र
न्यस्तहस्ताजिनेस्थापितद्रोणमिततिलोपरिविश्वचक्रंसंस्थाप्यतस्याष्टदलेकर्णिकायांविष्णुंपूर्वादिदलेषुविम
लाउत्कर्षणीज्ञानाक्रियायोगाप्रह्वीसत्याईशानाइत्यष्टौद्वितीयावरणेषोडशकोष्टेषुजलशाय्यत्रिभृगुवसिष्ट
ब्रह्मकश्यपमत्स्याद्यवतारदशकमितिप्रतिमाषोडशकंतृतीयावरणे॥ गौरीब्रह्माणीरौद्रीकौमारीवैष्णवीवारा- राम:
हीन्द्राणीकौशिकीत्यष्टौ॥ ध्रुवाध्वरसोमआप्यनिलप्रत्यूषप्रभासाख्यानष्टौवसून्॥ चतुर्थावरणेधातार्यममित्र ॥६५२
वरुणांशभगेंद्रविवस्वत्पूषपर्जन्यत्वष्टृविष्ण्वाख्यान्द्वादशादित्यावेदच्चतुष्टयंपंचमेपंचभूतानिपृथिवीवरु

णवह्निवायुविनायकात्मकानिवारणदशरुद्रांस्तुगिरिशानैकपाददहिर्बुध्न्यपिनाकिभुवनाधीश्वरकपालिविश्वशं
वंपतिस्थाणुभगाख्यान्एकादशरुद्रांश्चषष्ठेयथाक्रमयोलोकपालाष्टकंऐरावतपुंडरीकवामनकुमुदांज
नपुष्पदंतसार्वभौमसुप्रतीकइतिदिग्गजाष्टकंच॥ सप्तमेखड्गचक्रशक्तिपाशध्वजगदाशूलशंखकौस्तुभ
वामरछत्रपूर्णकुंभदीपवृषभरूपाणिस्वर्णरत्नानि॥ अष्टमेविष्णुदेव्यष्टकजलशाय्यत्रिभृगुवसिष्टब्रह्म
कश्यपमत्स्यप्रतिमाषोडशकंस्थापयेत्॥ चक्रस्यसमंतात्धामरसद्रव्यपूर्णकुंभाष्टकवस्त्रमाल्येक्षुफलनर
लाशनिवितानकंचवध्नीयात्॥ ततोविश्वचक्रायनमइतिपूजयेत्॥ ततःकुंडसमीपेकलशस्थापनादिपूर्णाहु
त्यंतंप्रकृतिवत्॥ प्राकृतग्रहादिहोमोत्तरंचक्राधिष्ठितविष्ण्वादिभ्यःतत्तन्मंत्रैर्नाममंत्रैर्वा अष्टाविंशत्यादिसंख्म
याहोमकार्यइतिकेचित्॥ ततोभिषिक्तोयजमानोविश्वचक्रंत्रिःप्रदक्षिणीकृत्यनमोविश्वमयायेतिविश्वच-
क्रात्मनेनमः॥ परमानंदरूपीत्वंपाहिनःपापकर्दमात्॥ तेजोमयमिदंयस्मात्सदापश्यंतियोगिनः॥ हृदिजत्वंगुणाती
तंविश्वचक्रंनमाम्यहं॥ वासुदेवेस्थितंचक्रेचक्रमध्येतुमाधवः॥ अन्योन्याधाररूपेणप्रणमामिस्थितावितः॥ विश्व

चक्रमिदं यस्मात्सर्वपापहरं परं ॥ आयुधं वाधिवासश्च नवादुद्धारमामत इतिमंत्रेण मंत्रपुष्पाणि प्रक्षिप्य नमस्कृस
वेदिपश्चिमतउपविश्य पूर्वोक्तं सकलेत्यादिमहासंकल्पमुक्त्वा इदं विश्वचक्रं विष्ण्वादिदेवताधिष्ठितं विष्णुदैवसं
युक्तमहं संप्रददे इति दद्यात् ॥ दानप्रतिष्ठार्थं सुवर्णदक्षिणाविभागः प्राकृतः स्वल्पे त्वेकाग्निविधानमिति केचित्
पुण्याहवाचनदेवताविसर्जनब्राह्मणभोजनानि कुर्यात् ॥ इति विश्वचक्रं ॥ अथ कल्पलतादानं ॥ मात्स्ये ॥ अथातः सं
प्रवक्ष्यामि महादानमनुत्तमं ॥ महाकल्पलता नाम महापातकनाशनं ॥ पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाच
नं ॥ ऋत्विक्संभारउपसंभार भूषणाच्छादनादिकं ॥ तुलापुरुषवत्कुर्याल्लोकेशावाहनादिकं ॥ वापीकरमयाः कुर्याद्दश
कल्पलताः शुभाः ॥ चामीकरं हेम ॥ नानापुष्पफलोपेता नानांशुकविभूषिता ॥ पुष्पफलांशुकानि स्वरूपतः इति के-
चित् ॥ हैमीनात्यपरे ॥ हेमलतानां स्वरूपातः पुष्पफलानां योगानां संनवान्नानि हैमानि अंशुकानि तु कार्पासा
दीन्येव हैमोपादानेतत्पदे लक्षणापत्तेरितितत्त्वयुक्तं प्रतीमः ॥ अत्र फलामात्राद्याकाराणीति रूपनारायणः ॥ का
म्यमानपशुपुत्रादिरूपाणीति दामोदररत्नाकराद्य ॥ विद्याधरसुपर्णानां मिथुनैरुपशोभिता ॥ हारानादि

लम्बिभिर्दैः ॥ फलानि विविधं गमैः ॥ सिद्धाः पक्षिसुरवाः किंनराः ॥ विहंगमो पक्षिणो चेति क्षमो दरः ॥ लोकपालानुसा
रिणः कर्तव्यास्ता देवता ॥ ब्राह्मीमनंतशक्तिं च लवणस्योपरि न्यसेत् ॥ अधस्तात्कृतयोर्मध्ये पद्मशंखधरेऽग्ने
इमासनस्था तु गुडे पूर्वतः कुलिशायुधा ॥ रजन्यजस्थिता ब्राह्मी स्रुवपाणिरथानले ॥ याम्ये च महिषारूढागादि
नीतंडुलोपरि ॥ घृते च नैर्ऋते स्थाप्या सखड्गा दक्षिणापरे ॥ वारुणे वारुणी क्षीरे वृषस्था नागयाशिनी ॥ पताकिनी च वा
यव्ये मृगस्था शर्करोपरि ॥ सौम्या तिलेषु संस्थाप्य शंखरिणी विधिसंस्थिता ॥ माहेश्वरी वृषारूढा नवनीते त्रिशूलि
नी ॥ मौलिन्यो वरदास्तद्वत्कर्तव्या बालकान्विता ॥ मध्ये द्वे लते अष्टदिक्षु वेष्टे ॥ मध्ययोरधः ब्राह्मसनंतशक्तिश्च ॥ अ
न्यासामधो लोकपालशक्तिश्च ॥ इन्द्रस्यैरावतः रजन्यजो हरिणः ॥ छागः ॥ निधिः कलशाकारः ॥ बालकान्विता ॥ क्रो
उरुबाला ॥ शतपापं च फलात् ऊर्ध्वमासहस्रात्प्रकल्पयेत् ॥ सप्रतिमाद्वीनामेतन्मानं ॥ सर्वासामुपरिष्टाच्च पंचवर्णं वि
तानकं ॥ धेनवो दश कुंभांश्च वस्त्रयुग्मानि चैव हि ॥ मध्यमे द्वे तु गुरवे ऋत्विग्भ्यो न्यास्तथैव च ॥ ततो मंगलशब्दे
न स्नातः शुक्लांबरो बुधः ॥ त्रिः प्रदक्षिणमावृत्य मंत्रमेतमुदीरयेत् ॥ मंत्रः प्रयोगे ज्ञेयः ॥ इति सकलदिगंगना ॥

दानम॰

॥१०२॥

प्रदानं नवनयसूदनकारियः करोति॥ अभिमतफलदेसनागलोकेवसतिपितामहवत्सराणित्रिंशत्॥ पितृशतम॰
यतारयेद्वाशीनवहुरितौघविनाशमुच्चैः सुरयुतवनितासहस्रसंख्यैः परिवृतमंबुजसंसदानिवं च॥ अथ
प्रयोगः॥ अद्येत्यादिसकलपापक्षयविशुद्धदेहत्वपूर्वकदेवगणसहस्रपारवृतब्रह्मस्थानिवंदापितृशतम
वाप्तिसंतारणानंतरब्रह्मत्रिंशाद्वत्सरावधिकामितत्॥ फलदनागलोकनिवासकर्मः अद्यः कल्पलतामहा
दानंप्रतिप्रतिपादयिष्ये इति संकल्प प्रकृतिवत्तो विंदादिपूजामंडपपूजागुर्वादिविनियोगांतं कुर्यात्॥ त
तो वेदिलिखितचक्रमस्तलवणकूटोपरिणकोलतां स्थापयित्वातन्मूलेब्रह्मलोन्यसेत्॥ तत्रैवापरां लतां स्था
पयित्वातन्मूलदेशेऽनंतशक्तिं पूर्वादिक्रमात्तगुडहारीद्धागतंडुलः॥ घृतक्षीरशर्करा॥ तिलनवनीतस्था
पलतामूलेषु रेखाद्दिशक्ती॥ संस्थाप्य परितो दश॥ पूर्ववत्कुंभान्॥ दशधेनूर्दशवस्त्रयुगानिफलमाल्यधा
न्यादीनि च विन्यस्य लतास्थिताः शक्तीः प्रतिष्ठापूर्वकं पूजयित्वा ततः कुंडसमीपस्थकलशस्थापनादिपूर्णा
हुत्यभिषेकांतं प्रकृतिवत्॥ एवमभिषिक्तो यजमानः कल्पलतास्त्रिः प्रदक्षिणमावृत्यनमोनमः पापविना

रामः

॥६५४॥

शिनीभ्यो ब्रह्मांडलोकेश्वरमालिनीभ्यः॥ आशंसिताधिकफलप्रदाभ्यो दिव्यमत्तयाकल्पलतावधूभ्य इमं मे
त्रमुच्चार्यपुष्पाणि प्रक्षिप्यनमस्कृत्यवेदिपश्चिमतः॥ उपविश्य पूर्वोक्तमहासंकल्पं यथासंभवं विशेष
णविशिष्टमुच्चार्यदद्यात्॥ तत्रमध्यलताद्वयं गुरवे शेषावष्टभ्यऋत्विग्भ्यः प्रत्येकः पक्षेऽपरपक्षद्वयेतुलावच्च
वस्था॥ ततोदानप्रतिष्ठार्थं सुवर्णप्रत्येकंदक्षिणां दद्यात्॥ स्वल्पद्रव्यत्वपक्षे एकाग्निविधानमिति केचित्॥ प्र
णपाहवाचनदेवतापूजनविसर्जनमंडपादिप्रतिपादनब्राह्मणभोजनानीति॥ इतिकल्पलतादानं॥ अथस
प्तसागरदानं॥ मात्स्ये॥ अथातः संप्रवक्ष्यामि महादानमनुत्तमं॥ सप्तसागरकं नाम सर्वपातकनाशनं॥ कारयेत्स
प्तकुंडानि कांचनानि विचक्षणः॥ प्रादेशमात्राणि तथा रत्निमात्राणि वा पुनः॥ कुर्यात्सप्तपलादूर्ध्वमासहस्रा
च्च शक्तितः॥ संस्थाप्यानि च सर्वाणि कृष्णाजिनतिलोपरि॥ प्रथमं पूरयेत्कुंडं लवणेन विचक्षणः॥ द्वितीयं पयसा तद्व
त्तृतीयं सर्पिषा ततः॥ चतुर्थं तु गुडेनैव दध्ना पंचममेव च॥ षष्ठं शर्करया तद्वत्सप्तमं तीर्थवारिणा॥ स्थापयेल्लव
णस्यांते ब्रह्माणं कांचनं शुभं॥ केशवं क्षीरमध्ये च घृतमध्ये महेश्वरं॥ भास्करं गुडमध्ये च दधिमध्ये सुराधि

दानम.

॥१०२॥ पं॥ शर्करायाम्प्रसेल्लक्ष्मीं जलमध्ये च पार्वती सर्वेष्वपि सर्वरत्नानि धान्यानि च समंततः॥ तुलापुरुषवच्छेषमत्रापि
परिकल्पयेत्॥ ततो वारुणहोमांते स्नापितो वेदपुंगवैः। त्रिः प्रदक्षिणमावृत्य मंत्रानेतानुदीरयेत्॥ मंत्राः प्रयो
गे ज्ञेयाः॥ इति दिशति रमा घृतसंस्तुतान्सुचिरविस्मयदानिहसागरात् त्वमलकांचनवर्णमयानसौ पद
मुपैति हरेरमरार्चितं॥ सकलपापविधौतविराजित॥ पितृपितामहपुत्रकमल्लकं॥ पुत्रशतयंत्रमिति वाचा
मिश्रः पयात॥ पुत्रकलत्रकमिति दामोदररत्नाकरादयः॥ नरकल्लोकसमाकुलमप्ययं झटिति सोपि तयेच्छिवमं
दिरमित्यादि॥ प्रादेशमात्राणीति तिर्यगूर्ध्वं॥ रत्निरंगुष्ठपर्वाणि संख्यया चैकविंशतिः॥ दशात्वंगुष्ठपर्वाणि प्रादे
शः परिकीर्तितः॥ सार्द्धदशांगुलः प्रादेश इति कल्पतरुः॥ ब्रह्मादिप्रतिमा ब्रह्मांडदानेदौ दर्शिताः॥ अथ प्रयोग
ः॥ यजमानो द्योत्पादितसकलकलुषक्षयसंभावितनरकनिवासपितृपितामहपुत्रकलत्रशिवमंदिरनयनपूर्वका
मरामृतत्वविशिष्टस्वीयहरिपदप्राप्तिकामः सप्तसागरमहादानमहं प्रतिपादयिष्ये इति संकल्प्य गोविंदादिप्र राम:
जापुर्वाहविनियोगान्प्रकृतिवत्॥ ततश्चक्रासादितरूप्याजिनन्यस्ततिलद्रोणकमेणलवणभीरुदुग्धघृतगुडदधि ॥६५५॥

शर्करातीर्थवारिभिः पूरयित्वा तेषु सप्तके शावमहेश्वरभास्करसुराधिपलक्ष्मीपार्वतीप्रतिमाः स्थापयेत्॥ परि
तोष्टादशधान्यानि विता॥ नवकंचोपरि सब्रह्मादीन्सागरान्पूजयेत्तत्र ततः॥ ॐ उं देसमीपस्थकलशस्थाय॥
नादिवनस्पतिहोमांतं प्रतिकुंडमष्टाविंशतिमष्टोत्तरशतमष्टोत्तरसहस्रमन्यतमसंख्यया स्वस्वशाखीयैर्वा
रुणैर्मंत्रैस्तिलान्हुत्वा स्विष्टकृदादिपूर्णाहुत्यभिषेकांतं प्राकृतं कुर्यात्॥ एवमभिषिक्तो यजमानः सागरान्त्रि
ःप्रदक्षिणीकृत्य नमो वः सर्वसिंधूनामाधारेभ्यः सनातनाः॥ जंतूनां प्राणदेभ्यश्च समुद्रेभ्यो नमो नमः॥ क्षीरो
दकाज्यदधिमाधुर्यलावणेक्षुसारामृतेन भुवनत्रयजीवसंघात्॥ आनंदयंति वसुभिश्च यतो भवंतस्तस्मान्म
मापय विधातमनंतविधद्धाः॥ यस्मात्समस्तभुवनेषु भवंत एव तीर्थामरासुरवसुमणिप्रदानं॥ पापक्षयामृतवि
लेपनभूषणाय लोकस्य बिभ्रति तदस्तु ममापि लक्ष्मीरित्युक्त्वा मंत्रपुष्पाणि प्रक्षिप्य नमस्कृत्य वेदिपश्चिमत
उपविश्य देशकालकीर्तनांते सकलकलुषक्षयेत्यादि संकल्प्य मुख्यान्सप्तसागरान्॥ ब्रह्मादिप्रतिमासहितान्
सोपस्करान्विष्णुदैवतान्तुलापुरुषोक्तमंत्र्यपुराणीयान्गव्यवस्थया युष्मभ्यमहं संप्रददे न मम इति सुवर्ण

दानम: दद्यात् स्वल्पेनैकाग्निरिति केचित्। ततः पुण्याहवाचनग्रहादिपूजाविसर्जनब्राह्मणभोजनानि कुर्यादिति सप्तसाग
॥१०३॥ रदानविधिः। अथ रत्नधेनुदानं मात्स्ये। अथातः संप्रवक्ष्यामि महादानमनुत्तमं। रत्नधेनुरिति ख्यातं गोलोकफ
लदं नृणां। पुण्यां तिथिमथासाद्य तुलापुरुषदानवत्। लोकेशावाहनं तद्वत्ततो धेनुं प्रकल्पयेत्। भूमौ कृष्णाजिनं कृ
त्वा लवणद्रोणसंयुतं। धेनुं रत्नमयीं कृत्वा संकल्पविधिपूर्वकं। स्थापयेत्पद्मरागाणामेकाशीतिं मुखे बुधः। पुष्प
रागशतं तद्वत् घोणायां परिकल्पयेत्। घोणा नासिका। ललाटे हेमतिलकं मुक्ताफलशतं दृशोः। भ्रूयुगे विद्रुमश
तं शुक्तीकर्णद्वयोः स्थिते। कांचनानि च शृंगाणि शिरो वज्रशतात्मकं। ग्रीवायां नेत्रपटकं गोमेदकशतात्मकं। इंद्र
नीलशतं पृष्ठे वैडूर्यशतपार्श्वके। स्फटिकैरुदरं तद्वत् सौगंधिकशतात्कटिं। सौगंधिकं पद्मरागः सौगंधिकं तु
कल्हारे पद्मरागे स्त्रकरण इति वैजयंतीकोशात्। खुरा हेममयाः कार्याः पुच्छं मुक्तावलीमयं। सूर्यकांतेंदुकांतौ
च घ्राणे कर्पूरचंदनं। कुंकुमानि च रोमाणि रौप्यां नाभिं च कारयेत्। गारुत्मतशतं तद्वद् यानेपरिकल्पयेत्। अथा रामः
न्यानि स्थापयेत्सर्वसंधिषु। कुर्याच्छर्करया जिह्वां गोमयं च गुडात्मकं। गोमूत्रमाज्येन तथा दधि दुग्धं स्वरू ॥६५६॥

पतः। पुच्छाग्रे चामरं दद्यात्समीपे ताम्रदोहनं। कुंडलानि च हैमानि भूषणानि च शक्तितः। कारयेदेवमेवं तु चतु
र्थांशेन वत्सकं। तथा सर्वाणि धान्यानि पादाश्चेक्षुमयाः स्मृताः। नानाफलानि सर्वाणि पंचवर्णं वितानकं। ए
वं विरच्य नेकत्वा तद्वद्धोमाधिवासनं। ऋत्विग्भ्यो दक्षिणां दद्याद्धेनुमामंत्रयेद्बुधः। गुड धेनुवदामंत्र्य इदं चोदा
हरेत्ततः। मंत्रः प्रयोगे ज्ञेयः। आमंत्र्य चेत्थमधिवासितां परिवृत्य च तां पाद दद्यात् द्विजाय गुरवे जल पूर्णकां तां। यः
पुण्यमाप्य दिनमत्र कृतोपवासः पापैर्विमुक्ततनुरेति पदं मुरारेः। इति सकलविधिज्ञो रत्नधेनुप्रदानं वित
रति स विमानं प्राप्नुते दीप्यमानं। सकल कलुषमुक्तो बंधुभिः पुत्रपौत्रैः सह मदनसरूपः स्थानमभ्येति शंभोरि
ति। अथ प्रयोगः। तत्र यमानेनाथ घेत्यादि सकलकलुषप्रदायमदनस्वरूपत्वपूर्वक बंधुवर्गपुत्रपौत्रादिसहितं
विमानारोहणपूर्वकगोलोकप्राप्तिकामस्तद्वच्छंभुपद प्राप्तिकामो वाष्मोरत्नधेनुमहादा
नमहं प्रतिपादयिष्य इति संकल्प्य प्रकृतिवज्जोवृंद पूजादि मंडपपूजागुर्वादिविनियोगांतं कृत्वा गुरुः षोडशो
रेकृष्णाजिनं प्रसार्य तदुपरि लवणद्रोणपरिमितं प्रसार्य तदुपरि रेखामयां प्राङ्मुखीं गां मुद्धपादां दद्याल्लिख्य

दानम०

॥१०४॥

रत्नैरंगानि कुर्यात् ॥ तत्र एकाशीतिपद्मरागैर्मुखं पुष्परागशतेन नासापुटं ॥ ललाटे हेमतिलकं ॥ पंचाशन्मुक्ताफ
लैः नेत्रे कं दृशौ ॥ विद्रुमशतेन विनम्रभ्रूयुगं शुक्तिभ्यां कर्णौ ॥ कांचने शृंगे ॥ हीरकशतेन शिरो गोमेदं शतान्विते
नेत्रनामके न पटेन ग्रीवां वैदूर्यशतेन पार्श्वे स्फटिकशतेनोदरं ॥ पद्मरागशतेन कटिं ॥ शक्तितो हेम्ना खुरान्
सूर्यकांतकर्पूराभ्यां दक्षिणघ्राणपुटं ॥ चंद्रकांतचंदनाभ्यां वामघ्राणपुटं ॥ चंद्रकांतचंदनाभ्यां वामघ्राणपुटं
कुंकुमेन रोमाणि ॥ रूप्येण नाभिं ॥ गारुत्मशतेनापनं रत्नांतरैः सर्वसंधीन् ॥ शर्करया जिह्वां गुडो गोमये आज्यं
मूत्रे ॥ वासरं पुछाग्रे स्वरूपतो दधिदुग्धं ॥ सन्निधौ ताम्रदोहनं ॥ सौवर्णकुंडलयैवेकादीनि स्थाप्यानि ॥ एवं धेनुसा
धनद्रव्यचतुर्थेनांशेन धेनोरुत्तरत प्राङ्मुखमुदक्स्था वसं चरस्च येत् ॥ दधिदुग्धदोहनानि च वस्त्रेण संच्छाद्य
ति समंताद्दशाहृशान्यौ धोनि फलपुष्पवस्त्राणादीनि वासोधरत्नधेनवे समवसायैनम इति पूजयित्वा वितानं बध्नी
यात् ॥ ततः कुंडसमीपस्थकलशस्थापनप्रभृति पूर्ववत् ॥ एवमभिषिक्तो यजमानो रत्नधेनुं त्रिः प्रदक्षिणमाहत्यो राम:
पतिष्ठेत मंत्रास्तु ॥ या लक्ष्मीः सर्वभूतानां या च देवे व्यवस्थिता ॥ धेनुरूपेण सा देवी मम शांतिं प्रयच्छतु ॥ देहस्था ॥६५॥

या च रुद्राणी शंकरस्य च या प्रिया ॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च
विभावसोः ॥ चंद्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रिये ॥ चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च ॥ या लक्ष्मी
र्लोकपालानां सा धेनुर्वरदास्तु मे ॥ स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजां च या ॥ सर्वपापहरा धेनुस्तस्मा च्छांतिं प्रय
छ मे ॥ त्वं सर्वदेवगणधाम यतः पठंति ॥ रुद्रेंद्रचंद्रकमलासनवासुदेवाः ॥ तस्मात्समस्तभुवनत्रयदेवयुक्ते मां
पाहि देवि भवसागरपीड्यमानमिति ततः पुष्पांजलिं प्रक्षिप्य नमस्कृत्य वेदिपश्चिमतः उपविश्योत्तराभिमुखः संक
ल्प्यमुक्ताकाद्यमारत्नधेनुं पद्मरागमुखां पुष्परागघोणां सुवर्णतिलकालंकृतां मुक्ताफलादिरचितनयनाद्य
वयवोपेतां धेनुसा धनं पद्मरागादिद्रव्यचतुर्थांशेन रचितवत्ससहितां परितः स्थापित धान्यपुष्पफलादिमं
तां विष्णुदैवतां गुरवे इह संप्रददइति ॥ एकस्माए वदद्यात् क्षितिभूपालरत्नाकारादय ॥ हेमाद्र्यादयस्तु एकाग्नि
विधानएकस्मै ॥ अनेकाग्निपक्षे तुलापुरुषवद्विभागइत्याहुः ॥ सुवर्णदक्षिणां दद्यात् ॥ ततः स्वस्तिवाचनादियहपू
जनविसर्जनब्राह्मणभोजनादि पूर्ववत् ॥ इति रत्नधेनुदानप्रयोगः ॥ मात्स्ये ॥ अथातः संप्रवक्ष्यामि महादानम

दानम०

॥२०५॥

नुत्तमं॥ महाभूतघटं नाम महापातकनाशनं॥ पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनं॥ ऋत्विग्मंडपसंभारभू-
षणाच्छादनादिकं॥ तुलापुरुषवत्कुर्यान्निलोकेशावाहनं तथा॥ कारयेत्कांचनं कुंभं महारत्नचितं बुधः॥ महा-
रत्नानि त्रिलोकानि॥ प्रादेशादंगुलशतं यावत्कुर्यात्प्रमाणतः॥ क्षीराज्यपूरितं तद्वत्कल्पवृक्षसमन्वितं॥ पद्मा-
सनगतांस्तत्र ब्रह्मविष्णुमहेश्वरान्॥ लोकपालान्महेंद्राद्यान्स्ववाहनसमन्वितान्॥ वाराहेण धृतं तं॥
द्वत्कृत्वा पृथ्वीं सपंकजां॥ वरुणं चासनगतं कांचनं मकरोपरि॥ हुताशनं मेषगतं वायुं कृष्णमृगासनं
ऋग्वेदस्याक्षसूत्रं स्याद्धंसं यजुर्वेदः सपंकजं सामवेदस्य वीणास्य वेणुं दक्षिणतो न्यसेत्॥ अथर्ववेदस्य पु-
छंस्त्रुक्कूर्वो दक्षिणे करे॥ पुराणं वेदो वरदः साक्षसूत्रकमंडलुः॥ अत्र कल्पवृक्षप्रतिमा प्रादेशादिप-
रिमाणं एहितघटसंपादकसुवर्णमानामार्धिकं॥ परितः सर्वधान्यानि चामरासनदर्पणं॥ पादुकोपानहच्छत्र-
भूषणाच्छादनादिकं स्थापयेज्जलकुंभांश्चाष्टौ पंचवर्णवितानकं॥ जलकुंभाः षोडश॥ स्नात्वाधिवासनांते मं- रामः
त्रमेतदुदीरयेत्॥ मंत्रः प्रयोगे द्रष्टव्यः॥ इत्युच्चार्य महाभूतघटं वा विनिवेदयेत्॥ सर्वपापविनिर्मुक्तः स या- ॥६५८

ति परमां [illegible] विमानेनार्कवर्णेन पितृबंधुसमन्वितः॥ स्तूयमानो वरस्त्रीभिः पदं प्राप्नोति वैष्णवं॥ षोडशै-
तानि यः कुर्यान्महादानानि मानवः॥ न तस्य पुनरावृत्तिरिह लोके हि जायत इति॥ अथ प्रयोगः॥ अद्येत्या-
दि सकलपापक्षयपूर्वकपित्रादिसकलबंधुजनसहिताप्सरस्त्रीसेव्यमानार्कवर्णविमानकरणक॰
विष्णुपदप्राप्तिकामः अयोमहाभूतघटमहादानमहं प्रतिपादयिष्य इति संकल्प्य प्रतिवज्जोविंशादिपूजां
मंडपपूजागुर्वादिविनियोगांतं कुर्यात्॥ ततः षोडशारे वज्रमौक्तिकमाणिक्यनीलमरकतारव्यमहा-
रत्नान्वितं तुलाभ्यां गव्यदुग्धघृताभ्यां पूर्णमथस्थापितकल्पवृक्षं घटाकारं महाभूतघटं स्थापयेत्॥
घटमध्ये ब्रह्मादिप्रतिमाः स्थापयित्वा चतुर्दिक्षु अष्टादशधान्यानि छत्रचामरदर्पणशय्यादीनि षोडशाज्य-
कुंभांश्च संनिधापयेत्॥ ततो महाभूतघटाय नमः इति संपूज्य वितानं बध्नीयात्॥ ततः कुंडसमीप-
स्थकं नस्थापनादि पूर्णाहुत्यभिषेकांतं प्रकृतिवत्॥ एवमभिषिक्तो यजमानः महाभूघटं त्रिःप्रदक्षिणी-
मावृत्य नमोवाः सर्वदेवानामाधारेभ्यश्चराचरं॥ महाभूतादिदेवेभ्यः शांतिरस्तु शिवं मम॥ यस्मात्वाकि-

चिदप्युक्तिमहाभूतं विनाशतं ब्रह्मांडे सर्वभूतेषु तस्माच्छीरस्तु मेसदेतित पश्चाद्धपुष्पाणि प्रक्षिप्य नमस्कृ
त्य वेदिपश्चिमत उपविश्य घेत्या दिमहासंकल्पं उच्चार्यइमंमहाभूतघटं महारत्न विरमंत। स्थितं सौव
र्णकल्पवृक्षादि पुराणादेवेदांत प्रतिमा सहितं परितः स्थापिताष्टदश धान्यछत्र चामरासनशय्यापूर्णकुं
भादि सहितं विष्णुदैवतं तुलापुरुषोक्त भागम्यवस्थया तु विविधेभ्यो युष्मभ्यमहं संप्रददेनममेति तद्देभ्येषु
दत्वा सवर्णदक्षिणां दद्यात्। स्वस्यैत्वे कायिविंधानं देयविभागस्तु लापुरुषवक्षोधा ततः पुण्याहवाचनग्रहा
दि पूजन विसर्जन मंडपादि प्रतिपादब्राह्मण भोजनाशीर्वादग्रहणमंगलाचारादीनि॥ ॥इति महाभूतघ
टदानं॥ इति मीमांसक शंकर भट्टात्मज भट्टनीलकंठ कृते दानमयूखे षोडश महादानानि समाप्तानि
॥ अथ दश महादानानि। कौर्मे। कनकाश्वतिलानां गादासीरथमहीगृहाः। कन्या च कपिला धेनुर्म
हादानानि वै दश॥ वह्निपुराणे। राम उवाच। को धार्मिकं समपाकर्म हतं मुनिवरोत्तम। कथं तस्माद्विमुच्ये
हं पापाद्धारणिवधादिकात्। इत्युक्त्वा धर्मतत्वज्ञः पापानां पावनं परं। दानं चेदं सुवर्णस्य तेते तन्नचुर्महर्षय

॥ व्यासः सर्वान् कामानवाप्यच्छंतियेप्रयच्छंति कांचनं। एतद्भिगवान त्रैपितामहसुतो ब्रवीत्। नंदिपुराणे
। तस्मात्स्वशक्त्यादातव्यं कांचनं मानवैर्भुवि। नातः परतरं लोके सर्वपापविमोचनं। सुवर्णस्य सुवर्णस्य सु
वर्णंयः प्रयच्छति। सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते। स्वाद्यस्तु वर्णशादेना हिरण्यमुक्तं। ॥हितीये न चर्शी
ननवर्णत्वं न तायेन परिमाणविशेषः। सुवर्णद्वितयं दत्वा ब्रह्मण्यागतिमाप्नुयात्। दत्वा सुवर्णस्य शतं द्वि
जेभ्यः श्रद्धयान्वितः। ब्रह्मलोकमनुप्राप्य ब्रह्मणा सह मोदते स कुह्ववरितसुवर्णशादसयोऽशमाषप
रिमाणविशिष्टहेमवाचितेति प्रायुक्तं। रजतमितिकेचित् दानमंत्रः। हिरण्यगर्भगर्भस्त्वं हेमबीजं विभा
वसो। अनंतपुण्यफलदमतः शांतिं प्रयच्छमे। कौर्मे पलैकं द्विगुणं वा त्रिगुणं शक्त्या तु कमात्। कनक
स्य प्रवर्णेन दात्म्यं त्रिभिः सदक्षिणं। पलादर्धेवात कुर्याद्दक्षिणास्या घयारुचि। ॥इति सुवर्णदानं। आदि
त्ये दिपसंप्राप्ते विधिमंत्र पुरस्कृतं। ददाति कांचनं यो वै दुःस्वप्नं प्रतिहंति सः। ददात्युदितमात्रे यस्तस्य पाप्मा
विलीयते। कालिकापुराणे। गुंजां गुजार्धमात्रं वा नियतः प्रतिवासरं। कनकं भस्म लिंगेवव्रजेत्तत्पदमुत्तमं।

ब्रह्मांडे। शृणु सावहितो दानं ब्रवीमि तव नारद। शतमानमिति प्रोक्तं सर्वपापप्रणाशनं। आयुष्यं श्रीकरं पुण्यं आरो
ग्यं संततिप्रदं। भुक्तिमुक्तिप्रदं स्वर्ग्यं सर्वमंगलकारणं। पुण्यका——लेषु सर्वेषु चंद्रसूर्यग्रहादिषु। नित्यं वा कार
येद्दानं जन्मर्क्षेषु विशेषतः। पुण्यदेशेषु सर्वेषु गृहे देवालयादिषु। यत्र सा धनसंपत्तिस्तत्र दानं समाचरेत्।
तथा। गव्येन भूमिं शकृता जलेन आलिख्य मध्ये सिततंदुलैश्च। सरोरुहं केसरभूषणाढ्यं सकर्णिकं चाष्टदलं
विलिख्य तस्मिन्। हिरण्यं शतमानमात्रं निधाय तस्योपरि तं विचिंत्य ब्रह्माणमीशं कमलासनस्थं माराध्य
गंधादिभिरादरेण। विप्रं तथा वेदविदां वरिष्ठं विचिंत्य बुध्या तु समर्चयित्वा। दद्यात् सवर्णं शतमानमस्मै संप्री
यतात्मा भूरिसुदार्य। शतमानं शतकृष्णलमाषाद्युमानं। इति शतमानदानं। अथ रजतदानं। स्कांदे। यः प्रयच्छ
ति विप्राय रजतं वापि निर्मलं। स विधूय सर्वपापानि स्वर्गलोके महीयते। रूपवान् सुभगः श्रीमान् इहकाले सु
जायते इति। अथाश्वदानं। स्कांदे। अश्वं यस्तु प्रयच्छेद्वै हेमचित्रं सुलक्षणं। स तेन कर्मणा देवि गंधर्वलोकमश्नुते
भारते। सर्वोपकरणोपेतं युवानं दोषवर्जितं। योऽश्वं ददाति विप्राय स्वर्गलोके महीयते। तथा। यावंति रोमाणि हये

भवंति हि नरेश्वर। तावतो वाजिदा लोकान् प्राप्नुवंतीह पुष्कलान्। कालिकापुराणे। यश्चाश्वाय द्विजायुग्मं शोभ
जे वाथ पादुके। ददाति यः प्रधानं वै ब्रह्मणः स्वः सुसंतयः। तस्य दिव्यानि यानानि रथा ध्वजपताकिनः। हृष्टपुष्टा
न चैवेमं भविष्यति कदाचन। अत्र दिव्यमानरपत्रदुष्टपथ्यविरहसंपत्तिर्यथाक्रमं प्रत्येकं फलं ज्ञेयं कौर्म्ये अ
श्वं तन्मूल्यमथवा कनीयो मध्यमोत्तमं। देयात् वित्तानुसारेण तारागणपरिच्छदं। शाकैः पंचपलैः रौप्यैः सु
वर्णलग्नैरलंकृतं क्रमात्। सलक्षणं सवत्सं च ब्राह्मणायाग्निहोत्रिणे। तारागणास्ता बानुकार्यलंकाराः दानमं
त्रः। उच्चैःश्रवास्त्वमश्वानां राज्ञां विजयकारकः। सूर्यवाहन तुष्ट्यमतः शांतिं प्रयच्छ मे। अथ पश्वेताश्वदानं। गा
रुडे। अश्वमेधमखं यस्तु कलौ कर्तुमनीश्वरः। अश्वदानं तु तेनेह कर्तव्यं विधिपूर्वकं। विधिं तस्य प्रवक्ष्यामि
ब्रह्मणा निर्मितं पुरा। श्वेतमश्वं शुभं तात हेमपार्वणभूषितं। रूप्यैः सुकटकैः शुद्धः करिदंतोपशोभितं। धा
न्यपल्लोपरि स्थं तु वस्त्रकं चं सुदृकं। एवं सुतेजसं चाश्वं ब्राह्मणाय निवेदयेत्। मन्वादिषु युगाद्ययन विषुवोपरा
गादिषु दानं। अश्वपूजामंत्रः। मार्तंडाय सुवेगाय काश्यपाय त्रिमूर्त्तये। जगद्धिपाय सूर्याय त्रिवेदाय नमोऽस्तु ते। ए

॥२०६॥ वंसुसुखरेन्मंत्रं करोदद्यात्तिलोदकं ॥ दानवाक्यं ॥ ॐ यद्येत्यादिन्नमुकगोत्रायामुकशर्मणे ब्राह्मणाय ममस्वं सुव
र्णं तिलकालंकारयुतं लाटप्रैचेयकसुपर्याणान्वितं रौप्यकटारत्नोपशोभितं वज्रनेत्रं ताम्रखुरं क्षौमपुच्छं
सुवाससंयुक्तापटकं वृतं त्वायुधान्वितं धान्यरत्नोपरिस्थितं ॥ बद्धकच्छं सुपट्टकं गंधपुष्पाद्यर्चितं सकल
ब्रह्महत्यादिपापनाशनाकामस्तुभ्यमहं संप्रददे न मम इति ॥ स्वावधिकत्रिंशत्सर्वत्रिंशादपरिंशादपरत्रिंशत्प-
रावरपितृद्धरणकाम इति वा ॥ सूर्यलोकव्रजनकाम ॥ इति वा यथाकाममहं महार्णवे समुत्पन्न उच्चैःश्रव
सुपुत्रक ॥ मया त्वं विप्रमुख्याय प्रदत्तो हयसुखी भव ॥ इमं विप्र नमस्तुभ्यं मम स्वं ते प्रतिपादितं ॥ प्रतिगृह्णाश्व वि
प्रेंद्र मया दत्तं सुशोभनमिति दानमंत्रमुच्चार्य कर्णे समर्पणं कृत्वा विप्रहस्ते जलं क्षिपेत् ॥ ततः सुवर्णं दद्यात् ग
पश्चाद्रश्मपुरेण छेप द्वानिसप्तसप्तति ॥ भास्करे मनसि ध्यात्वा आलोक्य स्वगृहं व्रजेत् ॥ एवं तमश्वं तु यो दद्यात्फलं तद
शगुणं भवेत् ॥ बउवां च तथा दत्वा तुल्यमेव फलं भवेत् ॥ एवं कृते नरव्याघ्र सप्तकल्पान्व्रजेन्नर इति ॥ इति श्वेताश्व रामः
दानं ॥ शिवाया अश्वमलंकृत्य पर्वणि निवेदयेत् ॥ साश्वमेधस्य यज्ञस्य फलमष्टगुणं लभेदिति शिवधर्मे शिवा या ॥६६१

श्वदानमुक्तं ॥ अथ तिलदानं ॥ आदित्यपुराणे ॥ वैशाख्यां पौर्णमास्यां वा तिलान्क्षौद्रेण संयुतान् ॥ यः प्रयच्छेद्द्वि
जातिभ्यः सर्वपापैः प्रमुच्यते ॥ ज्येष्ठे मासि तिलान्दत्वा पौर्णमास्यां विशेषतः ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नो
ति मानवः ॥ माघे मासि तिलान्यस्तु ब्राह्मणेभ्यः प्रयच्छति ॥ सर्वसत्वसमाकीर्णं नरकं न स पश्यति ॥ वसिष्ठः ॥ नित्य
दाता तिलानां यो नरः स्वर्गे महीयते ॥ महाभारते ॥ दानतो शुक्लतश्चैव हरतः प्रतिगृह्णतः ॥ तिलो तिलेतिङोण
सौवर्णानां युधिष्ठिर ॥ तथा ॥ सर्वेषामेव वर्णानां तिलदानं परं स्मृतं ॥ सर्वपापहरं तत्स्यात् पवित्रं स्वर्ग्यमेव च ॥ विष्णुध
र्मोत्तरे ॥ तिला गावो हिरण्यं च अन्नं कन्या वसुंधरा ॥ दत्तान्येतानि विधिवत्तारयंति महाभयात् ॥ तथा ॥ तिलस्नायी
तिलोद्वर्ती तिलहोमी तिलोदकी ॥ तिलदाता च भोक्ता च षट् तिलाः पापनाशनाः ॥ असकृत् षट्तिलान्दत्वा सर्व
पापविवर्जितः ॥ त्रिंशद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ कौर्मे कृष्णाजिने तिलान्दत्वा सुवर्णं मधुसर्पिषी ॥ द्रो
णैकं वासनाछन्नं त्रिधा तद्वत्सदक्षिणं ॥ आहिताग्नौ द्विजे दत्वा सर्वं तरति दुष्कृतं ॥ त्रिधेति हीनमध्यमोत्तमभे
दतः ॥ द्रोणद्वयं द्रोणत्रितयं चेति तद्वत्सदक्षिणं क्रमादेकद्वित्रिसुवर्णसहितं ॥ अत्र दानवाक्यं ॥ अद्येत्यादि

दानम०

॥२०१॥

अमुकसगोत्राय ब्राह्मणाय एवं हृत्वाजिनस्थं सुवर्णमधुसर्पिर्युक्तं वस्त्रछन्नं॥ तिलद्रोणं सर्वपापक्षयकामस्तु
भ्यमहं संप्रददे नमम॥ इति तिलदानप्रतिष्ठासिध्यर्थं इदं सुवर्णं दक्षिणां तुभ्यमहं संप्रददे नमम॥ तिलदानं
यम॥ तिलपात्रं च यो दद्यात् प्रत्यहं वापपर्वणि॥ सदक्षिणं सवत्सं वा धृतिलं वाजनार्दनं॥ नाशयेत्त्रिविधं पापं ध
र्मप्रवचनं यथा॥ स्कांदे॥ त्वमायां दत्तं तत्पितृतारकपितृकं॥ ब्राह्मे ताम्रपात्रं तिलैः पूर्णं प्रस्थयाचैव द्विजाय च
हिरण्यं च यो दद्याच्छ्राद्धचित्तानुसारतः॥ सर्वपापविनिर्मुक्तात्मा लभते परमां गतिं॥ दानवाक्यं तु अद्येत्यादि इदं
ताम्रपात्रं तिलपूर्णं सुवर्णं अशेषपापक्षयकामस्तुभ्यमहं संप्रददे नमम॥ सुवर्णं दद्यात्॥ अथ महातिलपात्रं॥
ताम्रपात्रे तिलान् कृत्वा पलषोडशकल्पिते॥ सहिरण्यं शक्त्या वा षिविप्राय प्रतिपादयेत्॥ नाशयेत्त्रिविधं पापं वा
ङ्मनःकायसंभवं॥ कौर्म्ये॥ तिलपूर्णं ताम्रपात्रं सहिरण्यं द्विजातये॥ प्रातर्दत्वा तु विधिवद्दुःस्वप्नं विनिहंति तिः॥ तिल
पात्रं त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमं॥ ताम्रपात्रे दशपलं जघन्यं परिकीर्तितं॥ द्विगुणं मध्यमं प्रोक्तं त्रिगुणं चोत्तमं रामः
स्मृतं॥ स्वर्णमेकं जघन्ये तु द्विगुणं मध्यमे क्षिपेत्॥ त्रिगुणं चोत्तमे तद्वत्सुवर्णं परिकीर्तितं॥ सुवर्णं दक्षिणां द ॥६६२॥

त्वा सर्वपाप[illegible]यो भवेत्॥ अथ मात्रर्णायाकरणं तिलपूर्णकांस्यपात्रदानं॥ आदित्यपुराणे॥ यज्ञांसौन्नामृणि
कर्त्तुं यदि शक्तिर्न विद्यते महासरस्तथा॥ वापी कूपं कर्त्तुं च दीर्घिकां॥ ऋणं वं रुते मातृकऋणान्मुक्तो भवति मानव
॥ सदक्षिणं कांस्यपात्रं अथ दत्वा प्रमुच्यते॥ शुद्धकांस्यस्य पात्रस्य प्रमाणं पंचविंशतिः॥ पलानाम नाम निर्दिष्टं
पलानां प्रस्थसप्तकं॥ सुवर्णमाषांश्चतुरः पात्रोपरि विधारयेत्॥ वस्त्रेणावेष्टयेत्पात्रं प्रधानेन समन्वितः॥ स्नानं कृ
त्वा निम्नगादौ पितॄन्देवांश्च तर्पयेत्॥ ततो निष्पूजयेच्छंभुं शंकरं हरिमेव वा॥ गोमयेनाथ संलिप्य गृहमध्ये
च सर्वतः॥ लिखेत्पद्मं द्वादशारं कुंकुमेनाथ चंदनैः॥ ततो वह्निं स्थापयित्वा होमं कुर्याद्घृतैस्तिलैः॥ ततो
वह्निं स्थापयित्वा होमं कुर्याद्घृतैस्तिलैः॥ तत्र पात्रं प्रतिष्ठाप्य पूजयेद्भक्तिभावतः॥ ततो ब्राह्मणमाहूय
वस्त्रकृत्य सुसंयुतं॥ पादौ प्रक्षाल्य विधिवन्मातृश्राद्धं समाचरेत्॥ अलंकृत्य यथाशक्ति माध्यां वामं तवा
सरे॥ ग्रहणे रविसोमाभ्यां संक्रांतिषु युगादिषु॥ तथान्यदपि यद्दत्तं माधात्रादिश्यमातरं॥ तदक्षयफलं सर्वं
पुराप्राह महेश्वरं॥ जीवंती अक्षये दस्त्रैर्मास्यै रपि विमर्षणी॥ दत्वा विप्रस्य पात्रं तु होमं कुर्यात्प्रयत्नतः॥ सोप

स्करंसतांबूलंदत्वाप्यविप्रंविसर्जयेत्। अन्येषामपिविप्राणांभोजनानिप्रदापयेत्। इत्यादि। अथास्यप्रयोगः
मातृमृतवासरेमाध्यादौवायजमानोनद्यादौकृतस्नानोगृहमध्येउपलिप्तदेशेकुंकुमचंदनाभ्यांवाऽष्टद
लंपद्मंविरच्यततत्रपंचविंशतिपलमितंकांस्यपात्रंतिलप्रस्थसप्तकपूरितंतदुपरिस्थापितस्वर्णमाषच
तुष्टयंचवस्त्रवेष्टितंस्थापयित्वातत्समीपेहरिशंकरंवाहनाद्युपचारैरभ्यर्च्यपुरतोनिस्थापयित्वास्व
स्त्रविधिनाघृताक्तैस्तिलैर्यवैश्चविष्णुमंत्रेणशिवमंत्रेणवाअष्टोत्तरशताहुतीर्हुत्वामातृहत्याहश्चेन्मा
तश्चाहंहत्वाजीवतांमातरितांवस्त्रादिभिः सत्कृत्यदानपात्रंतथैवाभ्यर्च्योदङ्मुखमुपवेश्यपाद्यैर्गंधादिभि
त्कामुकसगोत्रायब्राह्मणायेदंपलपंचविंशतिनिमितंकांस्यपात्रंप्रस्थसप्तकमिततिलपूरितंसुवर्णसं
वरवस्त्रवेष्टितंसमंतात्स्थापितसप्तधान्यफलादिसहितंमातुरानृण्यकामस्तुभ्यमहंसंप्रददेनममेतिद
द्यात्। मेत्रायतु। कांस्यपात्रंमयादत्तंमातुरानृण्यकाम्यया। भगवद्वचनात्तुभ्यंयथाशक्तितथावद। दशमा
सांश्चउदरेजनन्यासंस्थितस्यमे। क्लेशितावालभावेनस्तनपानाद्विजोत्तम। इयमन्त्राहिमद्दत्तेपलिप्ता

याचमयाकृता। भवतोवचनाद्द्यममसुक्तिर्भवेद्रुणात्। कांस्यपात्रंसुवर्णंचतिलान्वस्त्रादिदक्षिणां
सप्तधान्यंमयादत्तमृणान्मुक्तिर्भवेन्मम। कांस्यपात्रप्रदानेनतत्वज्ञानंशरीरकं तथाहेमप्रदानेनपरमा
त्मानमव्ययं। आच्छादनंदेतुवस्त्रांउद्यप्रमेतत्सदक्षिणं। विप्राच्छादनदानेनपरमात्मासुपूजितः। तिलसं
ख्याकृतंदुःखंमनन्याममसेवितं। तिलपात्रप्रदानेनकृतमुक्तोभवाम्यहमिति। ततःशक्त्यादिहिरण्यंदक्षिणांद
द्यात्। पात्रदानेनजननीसंभवान्दणात्वंमुक्तोभवइतिविप्रोब्रूयात्। पुनर्मातृतिलहोमंकृत्वाविप्रंविस
र्ज्ययथाशक्तिब्राह्मणान्भोजयेत्। इतिकांस्यपात्रप्रयोगः। अथतिलकुंभदानं। वायवायेतिलकुंभमध्ये
वस्त्रेकुंभेपूर्ववदास्थितेत्वारुणेमंडलेदेवंवरुणाकारमर्चयेत्। श्वेतैःपुष्पैःफलैर्गंधैः। कर्पूरेणतुपूजयेत्व
रुणलक्षणंब्रह्मांडदाने। वारुणंमंडलंस्यात्पताकार्धचंद्राकारंकार्यंषड्मान्यारेरेतोन्यस्यततोमंत्रमिमंम
जयेत्। नमोवरुणरूपायरसानांपतयेनमः। रसवारितिमित्राणियंतुनाशमघानिमे। तिलकुंभप्रदानेनप्र
सीदपरमेश्वर। इतिदत्तेविनश्यंतिपापानिजत्वचरिणां। हिंसोद्भवानेत्नानेधुयानकेवावगाहनेरसोपदानज

ष्णमयेयानोपवाछं यात्रोपधं वा पिदेवेशा सर्वमेध्यं भविष्यति शिवलोके वसेत्कल्पान्शतपंचदशावरान् इ
तितिलकुंभदानं ॥ अथ तिलकरकदानं ॥ वायुपुराणे ॥ करकं तिलसंपूर्णं मंडले वह्निदैवते ॥ शिवं वह्निवदावाह्य
पूजयेत्करवीरकैः रक्तचंदनगंधेन निर्यासेन च धूपयेत् ॥ वह्निमंडले त्रिकोणमंडलमित्यर्थः ॥ शिवं वह्निं च दिति
वह्निस्वरूपं शिवमित्यर्थः ॥ तच्चोक्तं ब्रह्मांडदाने ॥ निर्यासः सर्जरसः ॥ आदर्शं च ततो दद्याद्दीपानां च चतुष्टयं ॥
वह्निरूपपतिशंभुर्वह्निरूपी तिलाश्रय ॥ तेजोरूपकृतं पापं चाक्षुषं च व्यपोहतु ॥ इति दत्त्वा स्पनरंपति पावान्य
स्थिकृतानि च ॥ याकहोमेषु काष्ठेषु हिंस्यते यानि वह्निना ॥ अंगारवेनदाहादि संभवानि च यानि वै ॥ विरुद्धकरणे
त्यानिरूपयोगोद्भवानि च ॥ परदारपरद्रव्यपुत्रदर्शनजानि च ॥ शिवादिदर्शनोत्थानि नेत्रदोषकृतानि च ॥ यएवं कु
रुते दानं शिवभक्तायतव्रतः ॥ शिवलोके वसेद्भूयः कल्पत्रयमशंकितः ॥ इति तिलकरदानं ॥ अथ गजदानं ॥ कौ
र्मे ॥ दद्याद्गजं पुराणोक्तं अल्पं पंचाशतानि च ॥ वित्तानुसारात त्रापि कनिष्ठोत्तममध्यमं ॥ स्वरूपतो गजदानमुत्त
मः पद्मः तन्मूल्यं हेममाषशतपंचकं मध्यमः ॥ शतद्वयमधम इति केचित् ॥ पंचशतमाषत्त्वहर्द्धंतदर्द्धं नि

म्पते ॥ ताहशास्सुवर्णं इत्यपरे ॥ रूप्यस्थूणालंकरणं स्वर्णतारा विभूषणं ॥ सदक्षिणं वित्तरूपं प्रदत्वा शिवपुरं व्रजेत्
स्थूणारज्जु ॥ तारागणैर्मौक्तिकरत्नालम्बको गजालंकारविशेषः ॥ तथा ॥ यथालाभोपपन्नं वायः प्रयच्छति दंतिनं
ब्राह्मणाय दरिद्राय स्वर्गलोके महीयते कमहयादिद्विगत्यमहाराजो गजाधिपः ॥ सर्वपापविनिर्मुक्तो जाय
तेनात्र संशयः ॥ हस्त्यश्वशकटादिदानफलं भारते ॥ षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ॥ भोगान्भुंक्त्वा मर
पुरे राजा कालक्षयादिहेति ॥ अत्र दानवाक्यं ॥ अद्येत्याद्युक्त्वा षट्षष्टिवर्षसहस्राधिकामरपुरस्थो गोत्तरमहारा
जत्वकामोहममुकशर्मणे मुगत्राय ब्राह्मणाय इमं हस्तिनं कक्षारज्जु स्थिरासनसहितं कांचनमालादिकीर्णचा
मरगंधपुष्पालंकृतं प्रजापतिदैवतं तुभ्यमहं संप्रददे न मम इति करं दत्त्वा दद्यात् ॥ सुवर्णं दक्षिणां तुभ्यमहं सं
प्रददे न मम इति ॥ इति हस्तिदानं ॥ निवेदयति मातंगं भक्त्या स्वर्णाद्यलंकृतं ॥ शिवाय पर्वदिवसं तस्य पुण्यफलं श्रु
णि वत्सादिना शिवधर्मादौ शिवाय गजदानमुक्तं ॥ अथ दासीदानं ॥ वह्निपुराणे ॥ स्थिरनक्षत्रसंयुक्ते सौम्ये सौ
म्यग्रहान्विते दानकालं प्रशंसंति संतः पर्वणि वा पुनः ॥ अल्पं कृत्य यत्नपा वासोभिर्भूषणैस्तथा ॥ ब्राह्मणाय

दानम०

॥१२२॥

प्रदातव्या मंत्रेणानेन रक्षिता। इयं दासी मया तुभ्यं श्री ब्रह्म प्रतिपादिता। सर्वकामकरी भोग्या यथेष्टं भद्र
मस्तु ते। पंचवर्षाधिका सा तु चत्वारिंशत्समावधि। दासी द्विजाय दातव्या दासदानेप्ययं विधिरित्यादि। अत्र दा
नवाक्यं। अमुकसगोत्राय इमां दासीं सुवर्णालंकारवतीं पुष्पाद्यर्चितामक्षय्यसुखप्राप्तिकामस्तुभ्यमहं प्र
ददे न ममेति शिरसि धृत्वा दद्यात्। सुवर्णालंकारवतीं पुष्पाद्यर्चितामक्षय्यसुखप्राप्तिकामस्तुभ्यमहं सं
प्रददे न ममेति शिरसि धृत्वा दद्यात्। सुवर्णं दक्षिणां च दत्वा क्षमापयेत्पश्चाद्ब्राह्मणं वस्त्रकांचनैः। अनुगत्वा
सीमायां द्विजं विसर्जयेत्ततः इत्यादि। अश्वमेधफलप्राप्तगुणफलकामः शिवाय दासीं विनिवेदयेदिति शिवाय दा
सीदानमप्युक्तं। इति दासीदानं। अथ रथदानं कौर्मे। रथं चतुर्बलीवर्दैर्वरूढं धान्यावृतं तथा। वित्तानुसारात्स
र्वैश्च रथोपकरणैर्युतं। सदक्षिणं च विप्राय दत्वा शिवपुरं व्रजेत्। धान्यावृतमष्टद्रोणधान्यावृतं रथोपकरणा
नि युगयोक्त्रतोत्रवरत्रादीनि। धान्यावृतं त्रिधेति पाठः। त्रिद्व्येकसुवर्णदक्षिणा च तमष्टद्रोणत उत्तममध्यम
कनिष्ठेन दत्वा त्रैविध्यमिति हेमाद्रिः। दानवाक्यं। अमुकसगोत्राय ब्राह्मणाय चतुर्बलीवर्दैर्युक्तं अष्टद

दाम:

॥६६५॥

त्रा धान्यपरिवृतं सर्वोपकरणयुतमेतं रथं विश्वकर्मदैवतं अक्षय्यस्वर्गादिसुखकामस्तुभ्यमहं संप्रददे न ममेति
मंत्रस्तु रथाय रथ्यनाथाय नमस्ते विश्वकर्मणे। विश्वरूपाय नाथाय अरुणाय नमो नमः इति सुवर्णं दक्षिणां द
द्यात्। गारुडे ग[illegible]तुरगसंयुक्तं यो ददाति द्विजातये। सर्वकामसमृद्धात्मा स राजा जायते भुवीति। गंत्री रथवि
शेषः। सा च चतुर्भिरश्वैर्गजैर्वृषैर्वेष्टिता। गंत्रीमिमां प्रयच्छामि विश्वकर्माधिदैवतां। दानेनानेन भगवान् प्रीयतां
मे पशुपतिरिति गंत्रीदाने मंत्रः। इति रथदानं। मार्गशुक्लैकादश्यां माघफाल्गुनयोर्वा वैशाखे वा हिरण्मयं हरि
मभ्यर्च्य जागरं च कृत्वा प्रातः त्रिविक्रमं विप्राय दत्वा तस्य वर्षाशनं त्रिविक्रमार्द्धकानां च वर्षार्द्धमन्नं कल्पयित्वाति
विपुलभोगानंतरं विष्णुसायुज्यमाप्नोतीति। एतन्मूलं हेमाद्रौ वह्निपुराणे। अथ महादानं कौर्म्ये गोचर्ममात्रं
भूखंडं अधिकं वा सस्यरक्षितं। त्रिधा सदक्षिणां कृत्वा दत्वा शिवपुरं व्रजेत्। त्रिद्व्येकसुवर्णरूपा दक्षिणा त्रिधेत्य
र्थः। बृहस्पतिः। अपि गोचर्ममात्रेण सम्यक् दत्तेन मानवः। धौतपापो विशुद्धात्मा स्वर्गलोके महीयते। दशह
स्तेन दंडेन त्रिंशद्दंडा निवर्तनं। त्रिभागहीनं गोचर्ममानमाह प्रजापतिः। मानेनानेन गोदद्यान्निवर्तनद्वा तं बु

ध इति । तथा । गवां शतं वृषं श्चैको यत्र तिष्ठेदयंत्रितः । तद्धि गोचर्ममात्रं तु प्राहुर्वेदविदो जनाः । तावन्ना गोच
र्मप्रकारेषु उत्तममध्यमाधमभावेन व्यवस्था ज्ञेया । तथा । षष्टिवर्षसहस्राणि स्वर्गे वसति भूमिदः । आ
छेत्ता चानुमंता च तावंति नरके वसेत् । तत्र पुराणे दानानां फलश्रवणेपि स्वकामितमेव फलमुक्तेरयं
मंत्रोपि यथा भूमिप्रदानस्य कलां नार्हंति षोडशीं । दानान्यानि मे यांति भूमिदानाद्भवत्विह । अमुक ब्राह्मणा
यामुककामः षट्षष्टिसहस्रवर्षपरिमितस्वर्गवासकामः शिवपुरप्राप्तिकामो वा सर्वपापक्षयकामो वा भूमि
तुभ्यमहं संप्रददे न ममेति कुशतिलोदकं ब्राह्मणहस्ते निक्षिपेत् । ब्राह्मणसमीपस्थां भूमिं प्रदक्षिणीकृत्य
प्रतिगृह्णीयात् । विप्रकस्तं तु मनसा प्रदक्षिणीकृत्यान्तर्हि भूमेः परं यत्तु गोः सुवर्णं च किंचन तत्र तो भूमौ ग विप्रा
ज्ञे । सुवर्णं दक्षिणा मम मेति मां उक्तवचनादत्र सुवर्णमेव दक्षिणा । विश्वामित्रः । ग्रामं वा नगरं वापि विप्रे न्यो यः प्रय
च्छति । क्षेत्रं वा सस्यसंपन्नं सर्वपापैः प्रमुच्यते । स्वदत्तां परदत्तां वा यो हरेच्च वसुंधरां । स विष्ठायां कृमिर्भूत्वा पितृ
भिः सह मज्जति । तथा अपि पापकृतां राज्ञां प्रतिगृह्णंति साधवः । पृथिवी नेतदिच्छंति नान्यदिच्छंति पावनं